CC-0. Digitized by eGangotri and MIDF- Delhi

१०

॥ अथश्रीकृष्णामाहात्म्यप्रारंभः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥श्रीकृष्णवेण्यैनमः॥ऋषयऊचुः॥त्यक्ष्यामोभगवन्प्राणान्धर्मस्या
र्थेसुदुस्त्यजान्॥संगदोषादन्नदोषान्निर्वीर्यान्भ्रष्टबीजकान्॥१॥तदेवंकलिदोषेभ्योभीताः
स्वामिन्समुद्यताः॥वयंमहापथंगन्तुंकंयावःशरणंवद॥२॥नारदउवाच॥सत्यंसंतिमहा
भागादुर्निवाराश्चतेकलौ॥एतदेवसमुद्दिश्यगताःपार्थामहापथं॥३॥तथापिविप्रदेहानांध्
यायदिहलभ्यते॥मरणेननतल्लभ्यंमृत्युंनेच्छेदतःसुधीः॥४॥किंचानात्मवताद्वेष्यःकलिर्नै
वभवादृशैः॥कलौयुगेतुयत्पुण्यंनतत्तुल्यंकृतेयुगे॥५॥अनात्मनोह्यभक्तस्यभवेत्कलियुग
सदा॥सुधीयःश्रीशभक्तस्यसदाह्लादिकृतंयुगं॥६॥यत्तुकलिस्वभावेननिहितः[1]केशवः
कलौ॥तत्रापिभूयतांत्राणंदेवैरेवहिनिर्मितं॥७॥सृष्ट्यर्थेनोदितोब्रह्माकल्पादौकिलविष्णु
ना॥प्रांजलिस्तुप्रणम्येशमिममर्थंव्यजिज्ञपत्॥८॥श्रीब्रह्मोवाच॥कार्यान्वतुर्युगावस्था
सर्वस्यैवत्वदाज्ञया॥चतुर्युगसहस्राणांकथंकल्पस्थितिःप्रभो॥९॥श्रीविष्णुरु०॥सत्यं-
ब्रह्मंस्त्वयात्राणंकार्यंनैवान्यतःस्थितिः॥तत्त्वंतदर्थंतीर्थानिकल्पयित्वापुनःपुनः॥१०॥पर्व
ताश्चमहानद्योनदप्रस्रवणानिच॥विविधानिचतीर्थानिसृजत्वंपूर्ववद्भुवि॥११॥मातरंस
र्वतीर्थानांनदीनांमग्रजांत्वहं॥स्रक्ष्यामिपूर्ववत्कृष्णांमन्मयींजगतःस्थितेः॥१२॥तीर्थानां
हिप्रभावेनकलिकल्मषशत्रुणा॥कृष्णायाश्चापिसांनिध्यात्पापंनैवभविष्यति॥१३॥क

१ टि· आच्छादित इत्यर्थः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोजुषाणास्तीर्थानिमांचकृष्णांविशेषतः॥धीराःकेचिद्भविष्यंतिबीजंकृतयुगस्यहि॥
१४॥नारदउवाच॥एवमुक्त्वास्वयंविष्णुर्गर्गादिमुनयस्तदा॥ससर्जकृष्णांब्रम्हापितीर्था-
न्यन्यानिचाज्ञया॥१५॥इत्थंदुर्वारदोषौघत्राणार्थंनिर्मितानिहि॥कलौतीर्थानितद्भक्तंनदो
षःकेऽप्यनित्यस्पृशेत्॥१६॥यथामंत्रौषधाभिज्ञोज्वालामध्येनदह्यते॥एवंसदैवतीर्थार्थीअ
धृष्यःकलिजैरघैः॥१७॥तस्माद्भजततीर्थानिस्मरतोघहरंहरिं॥एवंकृतयुगंचस्यात्समाम-
यातमहापथं॥१८॥ऋषयऊचुः॥अहोभगवतानूनंरक्षार्थंब्रूहिनोनघ॥मुनीशत्वंहिभू-
तानांत्राणंपरमिहोक्तवान्॥१९॥भूयःकथयकारुण्यात्तांकृष्णांतीर्थमातरं॥यथाससर्ज
लक्ष्मीशःस्वयंप्राहचयादृशीं॥२०॥नारदउ॰॥तदेवंब्रम्हणाप्येवंपृष्टोविस्मयशालिना
॥तस्यामाहात्म्यमतुलंभूयःप्राहेतिकेशवः॥२१॥श्रीभगवानु॰॥जगत्स्थित्यैमयाब्रम्हन्
कल्पेकल्पेविसृज्यते॥कृष्णानाममहापुण्यामलकलाघौघनाशिनी॥तयाकलिःक्षयंसर्वो
नीतोसौजगदार्तिकृत्॥अतिभीतस्त्वसंत्रासात्तुनिःशंकोनप्रवर्तते॥२३॥तस्याःसंस्मरणेनै
वपानस्नानस्तवादिभिः॥निःपापामनुजादिव्यालभंतेगतिमीप्सितां॥२४॥बहुनाकिंसकृ
त्स्पृष्ट्वासाक्षाद्धर्मनदीमिमां॥स्पृशन्सर्वगतोवायुःपावयत्यखिलंजगत्॥२५॥कायद्वयंस
मुद्दिश्यकृष्णावेणीभवाम्यहं॥जगतांधारणार्थायसद्भक्तानांचमुक्तये॥२६॥अग्निमुक्तो

१ टि॰ इदंसंबोधनं. २ पापस्येतिअर्थः ३ इदंपूर्वान्वयि.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुयोयोगः सयोगोप्यतिदुष्करः॥ सुकरस्त्वेषसर्वेषांकृष्णावेण्यासमाश्रयः॥२७॥ कलिदुष्टा
स्त्विमांमर्त्याभजमानामदात्मिकां॥ कीर्तयंतः स्मरंतोवाभक्तानांचपरस्परं॥२८॥ यथायथाभ
जेन्मर्त्यः सिद्धिर्भूयात्तथातथा॥ प्रणयात्प्रयतानित्यंभक्त्यायेताम्नुपासते॥२९॥ पिबंतस्तज्जलं
नित्यंतादात्म्यात्तद्धृदिस्थयं॥ प्रविश्यवर्धयत्यासुज्ञानंभवभयापहं॥३०॥ अद्योवतांसर्वजगत्त
मोघ्नींसुरस्यामिमांतेकलिनिःसृजस्व॥ लोकांश्चतुर्वक्त्रनहिस्थितायामेकप्रभायांतमसोभिभूतिः
॥३१॥ नारदउ॰॥ इत्युक्त्वाभगवान्विष्णुर्महामाहेश्वरस्ततः॥ कृष्णांससर्जस्वतनोर्दिव्यमूर्ति-
स्फलोचनां॥३२॥ श्यामलांशंखचक्रांकांचतुर्बाहुस्वभूषितां॥ पीतांबरांसुप्रसन्नांसाक्षात्कल्प
लतामिव॥३३॥ चंद्रादिकांतिमुत्सृज्यवसुकांतिप्रदायिनीं॥ रेजेसाक्षाद्दिवोत्पन्नासालावण्या-
धिदेवता॥३४॥ प्रसन्नादर्शनीयाचतन्मुखप्रभयादिशः॥ मालिन्यंतत्यजुःकांताश्चिरमिंदुवि-
योगजं॥३५॥ तांजगत्पावनींदृष्ट्वाकलेर्भीतिकरींशुभां॥ पुत्रित्वेजगृहेब्रह्माप्रसन्नस्यहरेर्व
रात्॥३६॥ ततःसृष्ट्वाजगत्सर्वंतत्रतीर्थान्यकल्पयत्॥ ब्रह्माजगदघघ्नानियथाप्राहजग
द्गुरुः॥३७॥ कृष्णातुब्रह्मलोकाच्चपश्चाद्देवीभुवंगता॥ पावयत्स्वखिलंलोकमनेकमहिमा
स्पदा॥३८॥ एवमेषाजगन्माताकृष्णाविष्णुतनुःस्वयं॥ माहात्म्यमस्यास्त्वखिलमनेकंको
वदिष्यति॥३९॥ सुरभिःसुरकामधुक्स्मृताभुविकृष्णेष्टफलप्रपूरिणी॥ सुरभेरियमेव
चाधिकास्वजनेभ्योधिककर्ममोक्षदा॥४०॥ ॥इतिश्रीस्कंदपु॰कृ॰मा॰प्रथमोऽध्यायः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशाय नमः॥ ॥ऋषय ऊचुः॥ स्वामिन्कथय कारुण्याद्भूयो माहात्म्यमुत्तमं॥ कृ
ष्णायां न हि नस्तृप्तिः शृण्वतां तु वचो मुने॥१॥ कथं देवी भुवं नीता कानि तीर्थानि तत्र च॥आ
श्चर्यमेतद्भुक्तं च त्वदन्यः को वा वदिष्यति॥२॥ इत्युक्तो विप्रमुख्यैस्तैर्मुनिर्भागवतोत्तमः॥ कृ
ष्णाप्रियकथां पुण्यामब्रवीच्च प्रशस्य तां॥३॥ ॥नारद उ०॥ अहो मुक्तिः करस्था वो म
नः कृष्णाकथास्क्रयत्॥ अहं च धन्यः संगाद्वो यावत्ज्ञानं वदामि तत्॥४॥ कृष्णात्मनो वि
ष्णुरयं ईश्वरो वा तदात्मकः स्यात्सकलान्गुणोघान्॥ स्कंदो भवेद्वा यदि पितुः प्रसादाद्यो वेदवक्त्रेण
न वै चतुर्थः॥५ श्रीकृष्णावेणामाहात्म्यं शृण्वंतु मुनिसत्तमाः॥ कलेर्दतुं न मित्याहुर्यत्तदारव्या
नमुत्तमं॥६॥ यत्रैतत्पठ्यते देशे कलिदोषाः समंततः॥ पलायंते च गरुडं दृष्ट्वा भीता इवो
रगाः॥७॥ विपदोत्पावनं सर्वसंपदाकर्षणं त्विदं॥ आरव्यानं पठ्यते यत्र देशः स्याच्च शुभो
दयः॥८॥ अतिगूढमिदं पूर्वं सर्वज्ञेनैव शंभुना॥ स्कंदायोक्तं प्रसन्नेन ततोस्माभिश्च विश्रुतं
॥९॥ वक्ष्याम्यहं वो यूयं च शृणुध्वं भो मुनीश्वराः॥ नैव देयं भवद्भिश्च नास्तिकेषु कदाचन॥
॥१०॥ शैवा भागवताः सूज्ञाः सात्विका ये स्कमेधसः॥ तेष्वेव दर्शयेद्गुढं स्फुरत्नं कोविदेष्विवपि
॥११॥ महिम्नस्त्वद्भुतस्यास्य छादितस्य स्वमायया॥ भक्तेष्वेवात्मभूतेषु रव्यापनं स ह्यतेहरिः
॥१२॥ नास्तिका दांभिकाश्चापि हैतुका विषयात्मकाः॥ कृष्णाकथामृते दिव्ये नैव योग्या स्त्वि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मेद्विजाः॥१३॥क्लिश्यमाना भवांबोधौघिरोधात् शर्ममिच्छतां॥कृष्णामाहात्म्यंमर्त्यानां-
देयंदिव्यमिवौषधं॥१४॥स्वस्थाःशृण्वंतुमेसर्वेकथांकृष्णाश्रयामिमां॥तदेकार्दयिताभ-
क्तिराविर्भवतिकामधुक्॥१५॥सद्भक्त्याशृण्वतांयांतिपापानिदारुणान्यपि॥अनात्मा-
नोघसंकल्पायांतिदत्वास्वकंपदं॥१६॥प्रभावंयोहिदुर्ज्ञेयंरव्यापयेत्सुसमाहितः॥सलोकं
लोकशमनमशोकंपरमश्नुते॥१७॥तत्स्पर्शस्नानपानादिदूरेतिष्ठत्यहोद्विजाः॥कृतकृ-
त्योभवेन्मर्त्यःकृष्णास्मरणकीर्तनैः॥१८॥मायामयोद्भवाःपाशाःकृष्णामाहात्म्यवेदिनां॥
नैवस्युःसुप्रबुद्धानांस्वाप्निकोपद्रवाइव॥१९॥सर्वंतत्सुदिनंचैवसर्वाच जगतीशुभा॥स्म
रणंकृष्णावेणायाःक्रियतेयत्रवैजनैः॥२०॥नकिंचित्पापजालंचजायतेमुनिपुंगवाः॥स
र्वथापरमाश्चर्यंसर्वंचैतत्प्रभाषितं॥२१॥शृण्वंतु संमुखीभूत्वापुण्यमेतन्मुनीश्वराः॥
माहात्म्यंकृष्णावेणायाः सर्वपाप प्रणोदनं॥२२॥आख्यानंचपुरावृत्तंयत्पूर्वंशृणुतद्विजाः
पूर्वंवैसकलादेवाःकृष्णामाहात्म्यमुत्तमं॥२३॥सम्यक्तुज्ञातुमिच्छंतस्तस्योपायमचिंत-
यन्॥तेचसर्वेश्वरंदेवंमहादेवमनुत्तमं॥२४॥जग्मुःसर्वेतदातत्रयत्रतिष्ठतिवैशिवः॥त-
त्रस्तेदद्दृशुर्देवाःसर्वालंकारभूषितं॥२५॥सर्वपापहरंपुण्यंशंभुंचानुपमंसुराः॥तांभवा
नींचकांतानांसर्वासामधिकांपुरा॥२६॥कदाचित्तंतुसर्वेशमासीनंरुचिरासने॥चतुर्मुख १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुखाः सर्वेउपासांचक्रिरेसुराः ॥ २७ ॥ तंजगल्लतिकाबीजंजगज्जलधिशीतगुं ॥ जगद्वन
महावह्निमद्वितीयंमहेश्वरं ॥ २८ ॥ चतुर्दशजगत्क्रीडालंकैःक्रीडंतमव्ययं ॥ अगाध महिमा
सिंधुमणिमाद्यष्टभिःश्रितं ॥ २९ ॥ कालेनाविकृतंस्थाणुमनंतास्यंतुसाक्षिणं ॥ ब्रम्हेंद्राद्य
धिपैःसार्धंस्कंदोनम्रःसमाययौ ॥ ३० ॥ मुनिभिर्लोकगुरुभिरनुयातश्चषण्मुखः ॥ रेजेषडंग
वान्वेदःपुराणैरिवसर्वदा ॥ ३१ ॥ प्रणतःसंपरिष्वक्तःशिवाभ्यामुपवेशितः ॥ क्षणमंकेप्र-
शस्तेचसुखस्पर्शेसुखासने ॥ ३२ ॥ दर्शनानुगृहीतश्चप्रणेमुर्मुनयोमुदा ॥ सभायांसिद्ध
जुष्टायांअदूरात्समुपाविशत् ॥ ३३ ॥ ततोब्यजिज्ञपत्स्कंदश्चंद्रमौलिंकृतांजलिः ॥ दधा
नंशिरसाचंद्रंउपायनमिवप्रियं ॥ ३४ ॥ ॥ स्कंदउ० ॥ देवप्रसादाज्जगतामनुग्राहककविग्रह
॥ अजेयज्ञातिसारायनमस्तेप्रत्यगात्मने ॥ ३५ ॥ यत्तिष्ठस्यक्षिविषयेभक्तवत्सलतात्विदं
॥ वपुश्चतवदेवेशजगतांहितदायकं ॥ ३६ ॥ तथाहिजटिलत्वेनतपोलोकेप्रशंससि ॥ धृत्वा
चैर्वाविचित्रांचकपालीप्रदर्शयन् ॥ ३७ ॥ प्रदर्शयस्यनित्यत्वंविरक्तौसर्वदेहिनां ॥ तथैव
ब्रम्हचर्यंचसमाचरसिसर्वदा ॥ ३८ ॥ वनाश्रयोगिरिचरःस्मरंस्यस्यखिलेश्वर ॥ भुजंगहार
युक्तश्चसामर्थ्यंस्मृतपस्यतः ॥ ३९ ॥ गजाजिनप्रावरणःकृच्छ्रचांद्रायणादिभिः ॥ शरीरं
पीडनीयंवैविरक्तैरितिसूचयन् ॥ ४० ॥ कपालमालीभिक्षाशीभस्मछन्नःश्चरम्भो ॥ विडंब

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यसिदुर्लक्ष्यान्मंदधीनिवशिक्षयन् ॥ ४१ ॥ नरोनारायणश्चैवइतिकृष्णाइतिप्रभुः ॥ तेदृष्ट्वा
तादृशंनाशंप्रजानामयघाद्द्विजं ॥ ४२ ॥ उत्पादितभिश्चेच्छाभिर्जगतांहितबोधकं ॥ जगद्गु
रुमथोनाथंपृच्छामित्वांमनोगतं ॥ ४३ ॥ अगस्त्योमुनिमुख्यैश्चपुरापृष्टोभ्यधात्कथां ॥ त्व
दीयैरेवतैरंशैस्त्वत्प्रसादात्पृथग्विधैः ॥ ४४ ॥ अथतैःकृष्णावेणायाःपृष्टोमाहात्म्यमुत्त-
मं ॥ कारुण्याद्वदविज्ञानंसर्वज्ञंत्वामुपागतः ॥ ४५ ॥ शुश्रूषंतेचसर्वेमीपुराणकरुणोचि
ताः ॥ मुनयःस्तत्प्रसन्नस्त्वंत्वंभिषग्भवरोगिणां ॥ ४६ ॥ इतिप्रश्नंसमाकर्ण्यजहृषुस्तेस
भासदः ॥ स्तुवंतःषण्मुखंचाथकृष्णामाहात्म्यकांक्षिणः ॥ ४७ ॥ अथोदर्शितगंभीरध्व-
निरीशोभ्यभाषत ॥ द्विजावलिप्रभोत्कृष्टदीप्तिशुभ्रांशुभूषणः ॥ ४८ ॥ ईश्वरउ॰ ॥ साधु-
वत्सकृतःप्रश्नःकृष्णामाहात्म्यसंश्रयः ॥ ज्ञातव्योद्धेषयत्तेनसर्वैःसर्वतमोपहः ॥ ४९ ॥-
कृष्णेयंकृष्णरूपस्यतनुर्मर्मजलात्मिका ॥ मत्तःकृष्णासमुत्पन्नातत्प्रभावंपरंविदुः ॥ ५०
॥ सकृद्यत्पदसंस्पर्शाद्गंगाभूत्स्मृतिमोक्षदा ॥ तस्यविष्णोस्तनुःसाक्षात्कृष्णेयंकथमोच्य
ते ॥ ५१ ॥ सृष्टेयंविष्णुनादेवीदुहितृत्वेनकल्पिता ॥ कस्माद्दोसर्वजगतांअघौघशमनायच ॥
५२ ॥ नदीनामप्रजननान्माहात्म्याडुच्चमहत्त्वतः ॥ महाघशमनाच्चापिरव्यातालोकेमहा
नदी ॥ ५३ ॥ तीर्थैश्चब्रम्हणाविष्णुरर्थितोस्यांसमावृणोत् ॥ माहात्म्यमायथौतेनतादृशंज्ञा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृ॰म॰ ६ यतेजनैः॥५४॥कृष्णाचहृष्टाकृष्णेनभुवंनीताचयादिवः॥सर्वंकर्षतिचाघौघंतेनकृ अ॰ २
ष्णाप्रकीर्तिता॥५५॥संक्षिप्यवक्ष्यामिनिबोधकृष्णामाहात्म्यमस्मिन्यदिविस्तरस्या-
त्॥स्वल्पोहिकल्पोयमितिप्रबद्धैर्नैवक्षितोस्यान्महिमाह्यपारः॥५६॥ ॥इतिश्रीस्कं
दपुराणेऋषिनारदसंवादेकृष्णामाहात्म्येद्वितीयोध्यायः॥ ॥शुभंभवतु॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

३

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति
द्वितीयो
ध्यायः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ईश्वरउ०॥ कस्मादौकृष्णावेणाख्याइयंदिव्यवसत्सुरा॥ वैष्णा-
वीब्रम्हणःपुत्रीपूज्यमानासुरर्षिभिः ॥१॥ लथापुण्यमयीसृष्टिःसर्वत्रसुधियोजनाः
॥समायुषःसमाधानानोत्तमाधममध्यमाः॥२॥ लेषांस्वभावात्संसिद्धिह्लादिनीवरसोल्ल-
सा॥अथकालस्वभावेनपापबिंदुःसमागमत्॥३॥ लेषांमिथःसुसंघर्षात्सिद्धिर्नष्टा
रसोल्लसा॥पुनर्ब्रम्हप्रसादेनकल्पादौजनितास्तदा॥४॥ जातास्तेप्यथदृष्ट्याथन्दृणांदो
षास्तिरोभवन्॥पुनस्तेषांहिवृध्यर्थंऔषध्यःस्वयमुत्थिताः॥५॥ नानारसफलास्ता-
श्चतद्दोषाद्भुवमाविशन्॥पुनस्तैरर्थितोब्रम्हावृत्यर्थैसमकल्पयत्॥६॥ वृष्टिमौषध-
सिध्यर्थैहरसात्सिद्धिंचकर्मजां॥ धर्माधर्मव्यवस्थाश्चमर्यादाश्चपृथग्विधाः॥७॥ नृणां
सर्वजगत्स्थित्यैमन्वादिभिरकारयत्॥ अत्रांतरेचतत्स्थित्यैधर्माज्जातश्चतुर्वपुः॥८॥
नरोनारायणश्चैवहइतिकृष्णइतिप्रभुः॥ तेदृष्ट्वाताद्दृशंनाशंप्रजानामघवृद्धिजं॥९॥ सं-
चिंत्यरक्षणोपायंस्वानुजंकृष्णामब्रवीत्॥गच्छाशुब्रह्मसदनंकृष्णामानयनस्तनु॥१०॥ स-
र्वशांत्यैतुजगतांतदर्थंसातुनिर्मिता॥पितामहश्चवक्तव्यःसर्वतीर्थान्यनेकशः॥११॥ भूमौ
प्रकल्पयेत्त्येवंभगवानथचोस्थितः॥ ॥ईश्वरउ०॥ तथेतिगत्वाकृष्णोथनिवेद्यब्रम्हणो
खिलं॥१२॥ कार्यंलेभेततःकृष्णांबहुमानसमर्पितां॥ब्रम्हणासर्वदेवेशस्तत्रेत्यभगवान्सु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रवाः॥१३॥तामादायययौकृष्णः पूज्यमानस्सुरोत्तमैः॥ब्रह्माविष्णुस्तथारुद्रः सर्वेदेवाःस
हर्षिभिः॥१४॥सोत्साहंमानयं तस्तामनुजग्मुस्तदाभुवं॥कस्मिन्देशेतुकृष्णोतिमंत्रयंतः
सुरास्तदा॥१५॥गच्छंतोददृशुः कंचिन्महात्मानंतपस्विनं॥तेतमूचुर्मुनेकस्त्वंकिमिच्छसि
वृणीष्वतत्॥१६॥देव्यागमोत्सवेह्यस्मिन्देयंयत्तदभीप्सितं॥तच्छ्रुत्वासोथहृष्टात्माता
न्प्रणम्यकृतांजलिः॥१७॥कृष्णंकृष्णांचतान्प्राहसह्याद्रिंवेत्थमांसुराः॥देव्यागममिहज्ञा
त्वासमाराधयितुंस्थितः॥१८॥मत्तःप्रवर्ततामेषासाक्षाद्विष्णुमयीत्विह॥अस्याःपुण्यजल
स्पर्शादहंयास्यामिपुण्यतां॥१९॥धन्यतांचापिलोकेस्मिन्तीर्थमातुर्हिगौरवात्॥तच्छ्रुत्वाह
र्षितैर्देवैर्हर्षितांभून्महानदी॥२०॥एवमस्तुगिरिश्रेष्ठत्वत्तःसंप्रभवाम्यहं॥स्रुतांचलेभविष्या
मिसह्यजेत्यभिविश्रुता॥२१॥एतत्तुमेप्रियतरंकीर्त्यानामभविष्यति॥नद्यस्त्वन्यामदनुजा
भविष्यंत्युत्तमोत्तमाः॥२२॥त्वत्तएवजनिष्यामिवरान्मेभूधरोत्तम॥ ॥इश्वरोवा०॥एवमस्मि
न्वरेदेशेसहसाविस्मयंययुः॥२३॥भक्तवत्सलतांदेव्यादृष्ट्वाविष्णोरिवामराः॥सोपिप्रसादइ
त्युक्त्वाप्रणम्यमुदितोगिरिः॥२४॥कृष्णातदाथतैर्देवैःसहितास्वपदंययौ॥नरोनारायणश्चैव
गिरिश्चापिसमागतः॥२५॥अन्येचतत्राप्सरसःसिद्धविद्याधरोरगाः॥तदासह्यगिरौत
त्रभुवनानिचतुर्दश॥२६॥तेसमेत्यातिहर्षेणद्रष्टुंकृष्णामहोत्सवं॥कृष्णांप्रशंसतांहर्षा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दूर्वाणांपितृणांतथा ॥ २७ ॥ सुराणांचतथावाचस्तत्रशुश्रुविरेमिथः ॥ अहोकृतार्थामनु-
जाएषाकृष्णाखिलेष्टदा ॥ २८ ॥ कामधेनुःसमायाताभूलोकालंकृतिःशुभा ॥ वयंचधन्या
मनुजैःकृष्णायांचसुकृतार्पिताः ॥ २९ हव्यैःकव्यैश्चपूजाभिःप्राप्स्यामोनिर्वृतिंपरां ॥ लभ्यतेसु
कृदप्यत्रयदिकृष्णाजलांजलिः ॥ ३० ॥ तर्हिनोनित्यतृप्तानांस्वधयासुधयापिकिं ॥ अहोस्व
दृक्कृतापूर्वसुपूताचभविष्यति ॥ ३१ ॥ प्रवाहेणचलेनास्याःसर्वामंगलहारिणा ॥ सभाग्या
स्तेनरालोकेतेचदेशाःशुभोदयाः ॥ ३२ ॥ तान्येवपुण्यक्षेत्राणियत्रकृष्णावहिष्यति ॥ स्व-
र्गविस्तारमेष्यंतिसंकोचंनरकाभृशं ॥ ३३ ॥ इयंस्वर्गामिनीश्रेणिःसुलभात्रश्रितापुरा ॥ भ
विष्यद्देहसंबंधःकृष्णातीरेतुसर्वदा ॥ ३४ ॥ भिन्नेनजंगमत्वेनस्थाणुत्वेनापिवापुनः ॥ ॥
ईश्वरउ० ॥ इत्थंहर्षात्प्रजल्पंतःसहोत्तस्थुःसुरादयः ॥ ३५ ॥ स्तुवंतश्चततोदेवींगायंतश्चापि-
किंनराः ॥ ३६ ॥ साद्भिःपुष्पफलैर्दिव्यैःसर्वेषामथसोद्रिराट् ॥ तेषांचक्रेमहापूजांकृष्णायाश्च-
विशेषतः ॥ ३७ ॥ अथस्वयंजगन्नाथोविष्णुःकृष्णांप्रहर्षयन् ॥ शृण्वतांसर्वदेवानांप्राहवा-
चंगिरिंचतं ॥ ३८ ॥ ॥ विष्णुरुवाच ॥ अहमत्रनिवत्स्यामिश्वेताश्वत्थवपुःसदा ॥ मत्पा
दाग्निःसृतात्वंचनदीपुण्यजलाभव ॥ ३९ ॥ ॥ ईश्वरउ० ॥ इत्युक्त्वाभगवान्विष्णुर्येनाश्व
त्थोभवत्स्वयं ॥ तन्मूलस्थाच्चसादेवीतोयधाराभवत्क्षणात् ॥ ४० ॥ ततोजयजयेत्युच्चैस्तुष्टु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ·म त्रुर्विबुधादिवि॥हर्षान्नृत्यत्सुमुनिषुप्रससारमहानदी॥४१॥देवदुंदुभयोनेदुःपुष्पाणिमु अ·
८ मुचुर्घनाः॥गंधर्वाश्चजगुर्हर्षात्कृष्णोदयमहोत्सवे॥४२॥सोथकृष्णांमुनिर्देवींहर्षयन्पुरे ३
तोययौ॥मुनिसंघवृतःश्रीमानन्येत्वनुययुःसुराः॥४३॥इतिजगदघनाशनायकृष्णाद्य
वलवपुर्धरणींविभूषयंती॥त्रिभुवनदुरितानिवर्जयंतीपवनरवेणजगामपूर्वकाष्ठां॥४४॥
अधर्मोराक्षसाःक्लेशाःकलिश्चदुरितानिच॥दौर्मनस्यंपरंजग्मुर्भुविदेविसमागमात्॥
४५॥यदाकृष्णाभुवंयाताततःप्रभृतिपुत्रकाः॥अधर्मव्याधिर्दुष्टाशानिरुद्धालोकना-
शिनी॥४६॥मुक्तायुगक्रमंलोकेनोपवर्द्धेतविपर्ययः॥महानदीप्रभावेनयावत्कल्पविक
ल्पना॥४७॥एवमेषाजगन्मातासर्वपुण्यमयीशुभा॥तथात्वतीवपुण्यानितीर्थान्यत्रप
देपदे॥४८॥यथासर्वाघसंघघ्नीपुण्याऋग्वेदसंहिता॥तथाह्यतीवपुण्यानितत्रसूक्ता
निवैपृथक्॥४९॥तथास्यांपुण्यनद्यांवैदिव्यतीर्थानिसंतिहि॥तेषांमाहात्म्यमतुलमनं-
तंगुह्यमुत्तमं॥५०॥एवंसंक्षेपतःप्रोक्तंदेव्यामाहात्म्यमुत्तमं॥सविस्तरंतुसत्वेनविक्षिप्तं
मदनुग्रहात्॥५१॥मुनिभ्योवदरम्यंहिजगतांहितकाम्यया॥तीर्थानिचात्रगुह्यानिमत्-
प्रसादाद्विवक्ष्यसि॥५२॥ ॥नारदउ०॥इत्युक्तोनुगृहीतश्चस्कंदोदेवेनशंभुना॥प्रण-
म्यचययौधामस्वकीयंमुनिभिःसह॥५३॥सोथब्रवीन्मुनिभ्यस्तन्माहात्म्यंसर्वगुह्य- २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वित् ॥ सह्यात्प्रभृतितीर्थानि यावत्सागरसंगमः ॥ ५४ ॥ तानिवक्ष्याम्यहंवाञ्चा शृणुध्वंमु-
निपुंगवाः ॥ तीर्थानितत्रगुह्यानिस्कंदंनत्वाजगद्गुरुं ॥ ५५ ॥ यश्चेमंसंभवंदेव्याः कृष्णाया
नयनंतथा ॥ स्मरेद्भक्त्यासपूतात्मासयातिपरमंपदं ॥ ५६ ॥ श्रीकृष्णानद्यागमनंमुनींद्रा-
साक्षाच्छिवोक्तंपरमंपवित्रं ॥ शृण्वन्समाप्नोतिसदीर्घमायुरारोग्यमैश्वर्यमथोविमुक्तिं ॥ ५७
॥ ॥ इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येब्रह्मनारदसंवादेतृतीयोध्यायः ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउ०॥ तीर्थानिकृष्णवेणायाः समारभ्यामिद्विजोत्तमाः॥ यथा
वत्तेप्रवक्ष्यामिगुह्याद्गुह्यतमानिच ॥१॥ सह्याद्युत्तरतः शृंगंतत्रब्रम्हगिरिस्मृतः॥ यत्र
ब्रह्मातपस्तप्त्वालेभेप्रांशुपदंहरेः॥२॥ तस्माद्दक्षिणतोविप्रारम्योवेदगिरिस्मृतः॥ य
त्रवेदाः सहांगैश्चमूर्तिमंतः सह्यासते॥३॥ तयोर्मध्येमहातीर्थंपुण्यमामलकंस्मृतं॥ यत्रा
मलकिवृक्षोसौदेवैरेवप्रदृश्यते॥४॥ तस्यमूलात्समुत्पन्नावेणानाममहानदी॥ तस्मि
न्देशेऽश्वत्थमूलात्कृष्णाचैवसमुद्गता॥५॥ तत्रादौविष्णुतीर्थंतुपापिनामतिदुर्लभं॥ त
त्रस्नात्वासकृन्मर्त्यः सारूप्यंलभतेहरेः॥६॥ अमावास्यांगुरोर्वारेतत्स्थानंमुक्तिसाधनं
॥दृष्ट्वापितत्सकृन्मर्त्यः पुरेरुद्रविरिंचयोः॥७॥ ततश्चवेगोवेणायाः सर्वसिद्धिकरोनृणां
॥ येनेदंकृष्णवेणेतिसर्वलोकेषुगीयते॥८॥ कृष्णाचयाजगच्छांत्यैब्रम्हणानिर्मितापुरा
॥वेणाप्राक्कृष्णयायुक्तामहतीख्यातिमापन्ना॥९॥ ततः ककुद्मतीसंगंकृत्वास्मिन्वारु
णंजपं॥ गायत्र्यष्टशतंचापिमुच्यतेसर्वपातकैः॥१०॥ शिलीभूतंमहाकायंराक्षसंदुष्टचेतसं
॥भित्वाधाराभिरुग्राभिःकालेनप्रेषितंद्विजाः॥११॥ यत्रसद्या समायातातत्रतीर्थंमहाफलं
॥विहंगंनामलोकेस्मिन्तीर्थानामुत्तमोत्तमं॥१२॥ यत्रतीर्थस्ययशसालेभेसर्वमनोरथा
न्॥ तत्तीर्थंशंभु सान्निध्यात्पवित्रंपापनाशनं॥१३॥ यत्रजातिस्मरः स्नात्वाविहंगः स्वर्गमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुयात्॥ यत्रास्तेशंकरः साक्षात्स्वयंभूर्हितकाम्यया॥१४॥ ततोवेदनदोनामकृष्णायास
हसंगतः॥गिरेरुत्तरदिग्भागादागतः पुण्यदः किल॥१५॥ तस्यसंगेमहालिंगंधूर्जटिर्नाम
नामतः॥ तस्यदर्शनमात्रेणचतुर्वर्गफलंलभेत्॥१६॥ ततः क्रमाद्रुद्रतीर्थेगोकर्णाख्यो
महान्नृषिः॥ यत्रतस्यातपोघोरंगतिपापसुदुर्लभां॥१७॥ ॥ऋषयऊ॰॥कस्यपुत्रो-
महायोगीगोकर्णोनामषण्मुख॥ किंकृतंतेनसुकृतंयन्नाम्नातीर्थमुत्तमं॥१८॥ ॥नार
दउ॰॥ भरद्वाजकुलोत्पन्नोऋषिर्विद्वान्सधार्मिकः॥गोकर्णोनामसुतपाः शिवार्चनरतः
सदा॥१९॥मानापमानयोस्तुल्यस्तृष्णालोभविवर्जितः॥मदमत्सरहीनात्मासर्वभूतहि
तेरतः॥२०॥येनकेनचिदाछन्नोयेनकेनचिदास्थितः॥संपादयन्क्रियाकांडंशिवेनित्य
महैतुकं॥२१॥ऊर्ध्वरेतामुनिर्नित्यंकृष्णातीरमुपाश्रितः॥ कालेनस्वल्पतः सिद्धिर्जाता
कृष्णांबुसेवनात्॥२२॥ तस्यप्रसन्नोभगवान्सोमः सोमार्धभूषणः॥प्राहगंभीरयावाचावरं
वरयसुव्रत॥२३॥देवर्षिपितृगंधर्वैः सिद्धैरपिसुदुर्लभं॥ज्ञानविज्ञानसहितंददामिचतवे
प्सितं॥२४॥इत्युक्तः सुसंमुनिः प्राहदेवंत्रिभुवनेश्वरं॥ आत्मारामंपूर्णकामंसोमंसोमवि-
भूषणं॥२५॥ॐनमोभवायरुद्रायशर्वायपशुपायच॥उग्रायमहतेनित्यंभीमायशंभवे-
नमः॥२६॥इतिमंत्राष्टकंदेवप्रणवाद्यंनमोंतकं॥त्वदग्रेयः पठेन्नित्यंतस्याभीष्टप्रदोभव- १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२७॥मन्नाम्नालिंगमूर्तिस्त्वंआश्रमेममशंकर॥सर्वकामप्रदःसर्वतीर्थेहित्वंमहेश्वर॥
॥२८॥पुत्रहीनाश्चयानार्यःपतिहीनाश्चपुत्रिकाः॥अस्मिन्ममहातीर्थेस्नानाच्छुध्या
भवंतुताः॥२९॥गोकर्णाख्येमहातीर्थेस्नात्वापिंडप्रदानतः॥प्रयातुपितृभिःसार्धंरुद्र-
लोकमनामयं॥३०॥इत्युक्तस्तेनमुनिनातथेत्याहचशंकरः॥पुष्पकेमुनिमारोप्यजगा-
मस्वपदंहरः॥३१॥इत्येतत्कथितंविप्रागोकर्णंदक्षिणेतटे॥कृष्णायाःसर्वपापघ्नंगंगा
द्वारसमीपतः॥३२॥द्वैसहस्रेद्विगुणितेपर्वताच्चाद्विजोत्तमाः॥धनुषांकृष्णासांन्निध्येगोक
र्णाख्यंमहाफलं॥३३॥यःप्रातरुत्थायसदाग्रजन्माश्रृणोतिचाख्यानमिदंपठेद्वा॥कृष्णाश्र
यंसर्वसुखास्पदंसुदापदंमुरारेरमृतंप्रयाति॥३४॥ ॥इतिश्रीस्कंदपुराणेब्रम्हनारद
संवादेकृष्णामा॰गोकर्णतीर्थवर्णनंनामचतुर्थोध्यायः॥ ॥शिवायनमः॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ चतुर्थोऽध्यायः समाप्तः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउ०॥ ततोन्यत्संप्रवक्ष्यामिकृष्णायादक्षिणेतटे॥गणि
काख्यंमहातीर्थंसर्वपापप्रणाशनं॥१॥धनुषांषट्सहस्रेतुगोकर्णात्द्विजसत्तमाः॥सर्वपा
पक्षयकरंमहापातकिनामपि॥२॥ ॥स्कंदउ०॥नरोनारायणश्चैवमानसौब्रम्हणःकृ
तौ॥कृष्णांद्रष्टुंसमायातौअर्थितौब्रह्मणास्वयं॥३॥ततःसरित्समुत्पन्नासर्वतीर्थात्क
मंडलौ॥कृष्णयासंगतातेननाम्नाख्यातोकमंडली॥४॥ततस्तत्संगमेपुण्येतप
स्तेपेचक्रतुश्चिरं॥कालेनाल्पेनतौसिद्धौपरांसिधिमवापतुः॥५॥तस्यतीर्थस्यमाहा-
त्म्यंत्रिषुलोकेषुविश्रुतं॥महापापक्षयकरंशृणुध्वंभोमुनीश्वराः॥६॥ऋषिरासीन्म
हातेजागौतमोवृद्धसंमतः॥महाकुलवनेरम्येधनधान्यसमन्विते॥७॥श्रुताध्ययन
संपन्नःसदाचारोतिथिप्रियः॥ज्ञानेनभक्तियोगेनप्रशांतात्माशिवार्चकः॥८॥तस्य
रूपवतीभार्यावृद्धस्यतरुणीमता॥नाम्नासिंव्होदरीख्यातासिंहीवरमणप्रिया॥९॥
भर्तारंयाचते सर्थंत्वंरमस्वस्वरूखंमया॥तडिच्चंचलमायुस्तेकौरूमंयौवनंमम॥१०
॥इत्युक्तोपिसधर्मात्माअनुवेलंप्रशास्यतां॥नरेमेसतयाचोक्तःपश्यन्कालस्यदुष्ट-
तां॥११॥एवंबहुतिथेकालेभर्त्स्यनात्पूर्ववत्तथा॥तथाचोक्तःसविप्रेंद्रोह्यपुत्रस्त्वंनलो
कभाक्॥१२॥एवमुक्तःसधर्मात्मादुःप्रजाभयभृत्ततः॥संध्याकालेपिस्रुतरांरेमेविप्र

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तयासह ॥ १३ ॥ ततंदेवगर्भमाधत्तेभार्यातस्यमहात्मनः ॥ पुत्ररूपंपहापापंप्राप्तेकालेह्यसू
यत ॥ १४ ॥ विलोक्यजातकंतस्यगर्गःप्रोवाचसंमतः ॥ अहोबतमुनिश्रेष्ठकश्चमीदृ-
क्सुतस्तव ॥ १५ ॥ सुदामानामपापात्मापितृवंशभयंकरः ॥ ब्रह्महाऽयंसुरापश्चमा
तृगामीकुलांतकः ॥ १६ ॥ भविष्यतिदुराचारस्तदर्थंशांतिमिच्छसि ॥ ॥ स्कंद उ॰ ॥ इ-
त्याकर्ण्यसधर्मात्मामूर्छयाविधृतोभृशं ॥ १७ ॥ निनिंदसुतरांजायांप्रोवाचेदंपुनःपुनः ॥
अपुत्रस्यगृहंशून्यंतथामूर्खसुतस्यच ॥ १८ ॥ दुःपुत्रस्यगृहंशून्यंआतिथ्यविमुखस्य-
च ॥ विष्णुभक्तिविहीनस्यधर्मशून्यस्यवैतथा ॥ १९ ॥ अग्निहोत्रविहीनस्यनित्यश्राद्धमकु
र्वतः ॥ भार्याजितस्यचतथापितृवाक्यमकुर्वतः ॥ २० ॥ दुराचारस्यचतथादुःपुत्रजनकस्य
च ॥ एवमुक्त्वासधर्मात्माजायांपश्यन्रुदन्मुहुः ॥ २१ ॥ हृदयस्फुटमासाद्यतत्रैवनिधनं
गतः ॥ सातस्यतरुणीभार्यामदविह्वललोचना ॥ २२ ॥ मृतंपतिंसुतंबालंसमुत्सृज्यग-
तान्यतः ॥ तरुणीरूपसंपन्नामध्यक्षामासुलोचना ॥ २३ ॥ ततोन्यत्कुलमासाद्यवेश्या-
नांसुखतांगता ॥ कामसेनेतिविख्यातारूपयौवनशालिनी ॥ २४ ॥ कान्यकुब्जेस्थितिंकृ-
त्वायूनांसर्वस्वहारिणी ॥ कुसुंभरक्तवसनाचंदनगंधानुलेपना ॥ २५ ॥ माणिक्यमुक्ताभरणा
पर्यंकेतुहिरण्मये ॥ बहुभिर्वारमुख्याभिःसेव्यमानासमंततः ॥ चामरैर्व्यजनैर्धूपैःपुष्पैरंभै

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वनंदने॥२६॥ एवंचसत्यासुतस्याश्च चतुर्दशसमागताः॥ तावत्संवर्धितोबालः कुहृद्भिः
पापचेष्टितः॥२७॥ कुदामामेखलांभित्वायातिधूतालयंसदा॥ निवारितोपिसततंकुहृ-
द्भिःसहसंगतैः॥२८॥ नशृणोतिवचस्तेषांपानगोष्ठीरतःसदा॥ कुलंविसृज्यसकलंसंज-
तःपापपूरुषः॥२९॥ कदाचित्तस्करैःसार्धंगतवान्मार्गलुंपकैः॥ तैःसार्धंविप्रमुख्यांश्चज-
घ्नेबहुधनान्बहून्॥३०॥ तद्विभज्यधनंसर्वंगतास्तेनिजमंदिरं॥ कान्यकुब्जेगतःसोपिकु-
दामाकामलोलुपः॥३१॥ चकमेकामसेनांतांबहुवित्तेनपापकृत्॥ कात्वंकस्यकुतःकाले
संप्राप्तावारमुख्यतां॥३२॥ इत्युक्तातेनसातथ्यमब्रवीद्दुःसतीसती॥ गौतमोनामविप्रेंद्रो
वृद्धत्वाद्विकलेंद्रियः॥३३॥ तस्याहंतरुणीभार्यासततंरतिमिच्छती॥ धर्मात्मासप्रजाकां-
क्षीनसरेमेतथापियत्॥३४॥ मयानिर्भर्त्सितःक्रुद्धःसंध्याकालेप्यलोलुपः॥ दुष्कृतंग-
र्भमाधत्ततमुत्साद्यदिवंगतः॥३५॥ मृतंपतिंशिशुंपुत्रंआश्रमंसपरिच्छदं॥ समुत्सृज्यग-
तान्यत्रत्वपूर्णविषयाऽसती॥३६॥ इत्यप्रियंवचस्तस्याःसमाकर्ण्यविरज्यसः॥ द्विजसूनु-
र्विलप्याथतथापापोह्यरौरवीत्॥३७॥ समुत्पत्यचपर्यंकान्मूर्ध्नास्तंभंगृहाणसः॥ हाधा-
तःकिंकृतंमेयद्दुःकृतंदुःकृतात्मनः॥३८॥ किंततोब्रह्महाभूत्वामातृगामीसुरापगः॥ कथं
तरामिद्वृजिनंकोमेशुद्धिंप्रयच्छति॥३९॥ इत्युक्त्वासतुपापात्मामूर्छयाभिहतोभृशं॥ त-

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वसंज्ञः शिरोधुन्वन्लज्जयापर्यतप्यत ॥४०॥ सातंनिजकृतंज्ञात्वाजगर्हेवारमुख्यतां ॥
अहोबतमहत्पापंकृतंमेकागतिर्मम ॥४१॥ क्वब्रह्मभार्याक्वचवारमुख्याक्वधर्मपत्नीक्वचपु
त्रभोगी ॥ क्वपुण्यपाकात्कुलधर्मिणामहोनदेहपापाद्दुरितंतरेमहि ॥४२॥ इतिकृत्वातमुत्सृ
ज्यत्यक्त्वाबहुधनंगृहं ॥ वनंजगामतन्वंगीमरणेकृतनिश्चया ॥४३॥ निर्गतांतांसमालोक्य
विरक्तांकारणंपरं ॥ संजातंद्विजमुख्यस्यनिर्विण्णः सवनंययौ ॥४४॥ तौवनंकुत्रमनसौज
ग्मतुर्भृशदुःखितौ ॥ परस्परमपश्यंतौदेवलंतावपश्यतौ ॥४५॥ तौदृष्ट्वादेवलः प्राहविरक्तौ
दुःखितौनरौ ॥ युवाभ्यांकिंकृतंकर्ममर्तुंव्यवसितौयतः ॥४६॥ तावाहतुर्मुनिश्रेष्ठंदुष्कृतंस्व
कृतंमहत् ॥ आश्राव्यचाघनाशायप्राहतौकृपयामुनिः ॥४७॥ युवाभ्यांसंचितंयत्तुतस्यदुः
कृतकर्मणः ॥ निःकृतिर्नक्वचिद्दृष्टाविनाकृष्णांबुसेवनात् ॥४८॥ ॥स्कंदउवा०॥ ता
वूचतुर्मुनिंनत्वाब्रूहिकृष्णांमहामुने ॥ कासाकृष्णाकुतःकृष्णाकथंकृष्णाहिनोभवेत् ॥
४९॥ देवलउ०॥ ॥अस्तिप्राच्यांदिशिमहान्सह्याद्रिर्नामशैलराट् ॥ वैकुंठस्यतनुःसाक्षा
त्तस्माच्छैलाद्विनिःसृता ॥५०॥ सर्वदेवमयीकृष्णासर्वोपनिषदांतनुः ॥ युवयोःशरणंसैव
नान्यत्पश्येन्महाघयोः ॥५१॥ ब्रह्मनद्याश्चसंभेदेनरनारायणाश्रमे ॥ तत्रमाघंशतंकृत्वाधू
तपापौभविष्यथः ॥५२॥ ॥स्कंदउवाच॥ इत्यादिष्टौतुमुनिनाविरक्तौतौकृपालुना ॥ जग्म

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुर्दक्षिणामाशांसह्याद्रिंदेवपर्वतं ॥ ५३॥ नारायणाश्रमेकृष्णांदृष्ट्वारोमांचितावुभौ ॥ वेप
थुंपरमंप्राप्तौसह्यजादर्शनेननु ॥ ५४ ॥ ऊचतुः परयाप्रीत्यामातर्नौदेहिसद्गतिं ॥ इत्युक्त्वा
सह्यजांपुण्यांकृत्स्नातौसंगमेतयोः ॥ ५५॥ वस्तुंव्यवसितौतावत्तस्मिन्नारायणाश्रमे॥ताव
द्दृषीश्वरंदृष्ट्वान्नपयानिर्गतौततः ॥ ५६॥ गणिकापश्चिमेगत्वासह्यजादक्षिणेतटे ॥न्य
वसत्कृतविश्वासानिराहाराजितेंद्रिया ॥ ५७॥ नित्यंत्रिषवणंस्नात्वाप्युत्थसत्वाविरक्तधीः
॥ प्रायोपविष्टागणिकामरणेकृतनिश्चया ॥ ५८॥ दृष्ट्वाप्रोवाचनंदीतांगणिके किंनु
गृध्नसे ॥ सातंप्रोवाचहसतीकृतेभर्तामहेश्वरः ॥ ५९॥ यस्याग्रेसंचितंदुःखंकथ्यतेमूल
मंहसां ॥ तंप्रसाद्यकृपासिंधुंदुःखंनंदिंनविद्यते ॥ ६० ॥ त्वयावृषेणमेदुःखंविश्लेष्टुंनैवश
क्यते ॥ इत्थंप्राहहसन्नंदीमहादेवंव्यजिज्ञपत् ॥ ६१ ॥ देवसत्यंगणिकयावचउक्तंवृष-
ध्वज ॥ शरण्यस्त्वंहिजगतांविरक्तानां विशेषतः ॥ ६२॥ अतस्त्वयैवसंतप्तानिर्वाप्या
गणिकामृदु ॥ तथेत्युक्त्वासभगवान्नरनारायणाश्रमे ॥ ६३॥ प्रायोपविष्टांगणिकांसम-
भ्येत्याब्रवीदिदं ॥ अपिकल्याणिकिंतेद्यकृष्णातीरेपरिविद्यसे ॥ ६४॥ द्वादशाब्दैर्नतद्विद्य
द्यत्तुकृष्णानिषेवणात् ॥ यागतिर्योगयुक्तानांमुनीनामूर्ध्वरेतसां ॥ ६५॥ सागतिःसर्वजंतू
नांकृष्णातीरनिवासिनां ॥ आजन्मब्रह्मचर्येणयत्पुण्यंलभतेकलौ ॥ ६६ ॥ तत्पुण्यंप्राप्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

तेभद्रेसह्यजांबुनिषेवणात्॥त्वयातीवसुपुण्येस्मिन्कृष्णातीरेकलेवरं॥६७॥निर्धूतंब्रू
हिकल्याणिकिंतेकुर्वंवरानने॥तथाचास्तुविशुद्धत्वाद्दूरदोहंसमागतः॥६८॥इत्युक्ता
गणिकातत्रदेवदेवेनशंभुना॥प्रणम्यदंडवद्भूमौप्रोवाचेदंविरक्तधीः॥६९॥देवदेवजग
न्नाथयन्मयादुष्कृतंकृतं॥तत्वयाहृदिसंस्थेनज्ञातंकिंपुनरुच्यते॥७०॥यदिप्रसन्नोभग-
वान्सर्वभूतभयापहः॥यन्मूलंभयमुत्पन्नंतस्मान्मुच्येतमांशिवः॥७१॥गणिकाचस्कनि
व्यापायन्मयाप्रार्थितःपुरा॥मन्नाम्नाचाथकृष्णायास्तीरेतिष्ठमहेश्वर॥७२॥अस्मिन्म
ममहातीर्थेगणिकायावरप्रदे॥यःस्नातिमाघमासेचसपुण्यांलभतेगतिं॥७३॥ब्रम्हघ्नोथ
स्करापोवामातृगोगुरुतल्पगः॥अस्मिन्माघव्रतंकृत्वामुक्तोभवतुतत्क्षणात्॥७४॥स्नात्वा
पिंडप्रदोयस्तुश्राद्धंकृत्वाहिरण्यदः॥अस्मिन्ममहातीर्थेससौम्यांलभतेगतिं॥७५॥
यन्मयादुष्कृतंभर्गधर्मनाशात्कृतंमत्॥महद्वीजंभर्जयतांभवदंभवनाशन॥७६॥इत्थंग
णिकयाप्रोक्तंसमाकर्ण्यांतकांतकः॥तथेतिनंदिमारुह्यतामादायदिवंययौ॥७७॥विमुक्ता
गणिकायत्रकृष्णातीरेमहांहसः॥तन्नाम्नाप्रवरंतीर्थंततोजातंतपोधनाः॥७८॥द्वेसहस्रे
तुदंडानांततोनारायणाश्रमात्॥श्रीकृष्णनद्याश्चरितंमहाद्भुतंशृणोतियश्श्रावयतिद्विजाग्र्य
सम्बुद्धसत्वेष्टफलप्रदोभवेत्प्रयात्यभीष्टांगतिमीप्सितांच॥७९॥ ॥इ॰प्र॰गणि॰पंचमो॰॥ ३

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशाय नमः॥ ॥स्कंद उ०॥ ॥अथान्यत्संप्रवक्ष्यामि नरनारायणाश्रमे॥
कमंडल्याश्च संभेदे ऋषितीर्थमनुत्तमं॥१॥ नरनारायणौ यत्र चिरमास्तां तपस्विनौ॥ य-
त्रर्षयः सिद्धा गंधर्वाः समहोरगाः॥२॥ अग्निष्वात्तादिपितरो मूर्तिमंतः सहासते॥ ऋ
षितीर्थं परं पुण्यं संगमादुत्तरे तटे॥३॥ पितृतीर्थं तटे याम्ये देवतीर्थं च पूर्वतः॥ यत्र सिद्धेश्व
रो देवो यत्र धौम्यो महातपाः॥४॥ रुद्रा मा यत्र पयसि स्नान मुक्तो महांहसः॥ धूतं तेन महापा
पमश्राव्यं दुःकृतैरपि॥५॥ धूतपापं ततः प्रोक्तं पापिनामपि दुर्लभं॥ संगमात्क्रोशमात्रे तत्
किंचिन्न्यूनं द्विजोत्तमाः॥६॥ पितृतीर्थे तु यः स्नायात्तिलैरारण्यकैर्द्विजाः॥ तर्पयेत्स्वपितृन्द
त्तं तत्कृतं त्वजरं भवेत्॥७॥ यः श्राद्धं कुरुते यत्र हिरण्येन महात्मनः॥ सक्तुभिर्निर्वपेत्पिंडां
तस्य गोत्रं हि वर्धते॥८॥ मिष्टान्नेन च यः श्राद्धं कुर्यान्नारायणाश्रमे॥ पितृंस्तस्योपतिष्ठेत
क्षीरं सर्पिर्मधूदकं॥९॥ संगमादुत्तरे स्नात्वा दद्यादन्नं यवैर्युतं॥ ऋषींस्तस्योपतिष्ठेत क्षी-
रं सर्पिर्मधूदकं॥१०॥ यत्फलानि प्रयच्छेत तिलैर्मिश्राणि संगमे॥ नरनारायणौ प्रीतौ तस्य तु
ष्टिं प्रयच्छतः॥११॥ माघमासे सकृत्स्नात्वा ऋषीन्देवांस्तु पूजयेत्॥ फलैश्च नारिकेर्विप्रा-
न् रुद्रलोकं स गच्छति॥१२॥ देवतीर्थे ततः पुण्ये प्रातः स्नायी भवेन्नरः॥ सर्वपापविशुध्य
र्थं मंत्रेणानेन रुद्रताः॥१३॥ सवित्रे प्रसवित्रे च परं धाम जले मम॥ त्वत्तेजसा परिभ्रष्टं पा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पंचाशुसहस्रधा ॥१४॥ दिवाकरजगन्नाथप्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेवस्नानंत्वे
तन्ममाच्युत ॥१५॥ एवमुच्चार्यसन्मंत्रमागमोक्तंविशुद्धिदं ॥ पावनंवरुणंनत्वाततस्नाय
द्विशुद्धये ॥१६॥ माघस्नायीरवेर्बिंबंभित्त्वायातिपरंपदं ॥ मोक्षभागीद्विजश्रेष्ठामाघस्नायी
प्रकीर्तितः ॥१७॥ एवंविधोमाघमासस्तपस्वीजनवल्लभः ॥ तस्यपक्षेशुभेमुक्तेभवेत्सैकाद-
शीतुया ॥१८॥ हस्तनक्षत्रसंयुक्तामहापातकनाशिनी ॥ स्कंदउ० ॥ इतिसंजल्पतांतेषांधूत
पापोयतोभवत् ॥१९॥ रुद्रामापिद्विजश्रेष्ठाधूतपापंततःस्मृतं ॥१९॥ शातकान्वयसंभूतोधौ
म्योनाममहातपाः ॥ जपन्पंचाक्षरींविद्यांपरांसिद्धिमवाप्नुयात् ॥२०॥ यदग्रेस्थापितंलिंगंक-
त्याध्यानगर्भया ॥ यावदर्चयितुंनैच्छत्तावज्जातःस्वयंशिवः ॥२१॥ ततोंतरिक्षाद्सृजत्पुष्प
वृष्टिंप्रभंजनः ॥ मेघाःसौम्यांतदावृष्टिंमुमुचुस्तस्यचातु मनः ॥२२॥ महापापहरंनृणांमहा
ज्ञानप्रदंसदा ॥ सिद्धेश्वरेमहातीर्थेव्यतीपातेचसंक्रमे ॥२३॥ स्नात्वापिंडप्रदोयस्तुससौ
म्यांगतिमाप्नुयात् ॥ माघमासेव्यतीपातेतथाचंद्रक्षयेद्विजाः ॥२४॥ तर्पयेद्यःपितॄन्भक्त्यासघृते
गुडपायसैः ॥ धूतपापेमहातीर्थेसरुद्रस्यालयंव्रजेत् ॥२५॥ सिद्धेश्वरेमहातीर्थेसह्यजाउ-
त्तरेतटे ॥ हिरण्यंयःप्रयच्छेत्ससौरांगतिमाप्नुयात् ॥२६॥ इत्येतत्कथितंविप्राधूतपापंमहा
फलं ॥ यत्रमुक्तोमुनेःसूनुःप्राप्तवानुत्तमांगतिं ॥२७॥ कमंडलीसंगमतःसुपुण्यंनारायण १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याश्रममाहुरग्र्यं ॥ तटद्वयेसह्यसकलांबुधालंश्टृवन्नरोयातिहरेः परंपदं ॥ २८ ॥ इत्थंमुरारेस्त
नुजाकथांसतीयः श्रावयेद्भक्तियुतोहिविद्वान् ॥ सदीर्घमायुः सधनंसधर्मसंप्राप्यचांतेधृति
मेतिपुण्यं ॥ २९ ॥ ॥ इतिश्रीस्कंदपुराणेब्रम्हनारदसंवादेकृष्णामाहात्म्येधूतपापवर्णनंना
मषष्ठोध्यायः ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ ७ ॥ ॥ ७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति षष्ठोऽध्यायः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ततोन्यत्संप्रवक्ष्यामिसह्यजादक्षिणेतटे॥
सत्यतीर्थंमहापुण्यंक्रोशांतेधूतपापतः॥१॥ ऋषिरासीद्बहुधनस्तपनोनामधार्मिकः॥
तस्यपुत्रद्वयंजज्ञेसत्योवेदइतिश्रुतौ॥२॥ तौपठित्वासुविद्वांसौसंजातौतर्ककर्कशौ
पित्राहृष्टवतिप्रौढौपितुर्द्रव्यविरोधिनौ॥३॥ तौचाहूयाब्रवीत्पुत्रावस्तिमेविपुलंध
नं॥तद्गृह्णीतंमहाभागौधर्मकार्यार्थसाधनं॥४॥ निवृत्तविषयेणात्रत्रिवर्गःसाधि-
तोमया॥एतदेवहिमेशिष्टंयद्योगेनात्मदर्शनं॥५॥ अगस्त्यंमुनिशार्दूलंसत्यंकृत्वाय
थांशतः॥भवनस्थगिरेःप्रस्थेस्थापितंमेधनंबहु॥६॥ इत्युक्त्वातौपिताविद्वान्जगाम-
तपसेवनं॥तत्रागस्त्यंसमाहूयविभागंकुरुमेमुने॥७॥ श्रेष्ठांशंनैवगृण्हामिसत्योप्याहानु
जंरुषा॥वेदोप्याहाग्रजंमूढयाहिभंगंनसत्यभाक्॥८॥ सत्योपिमुष्टिघातेनविनिहत्यानु
जंबलात्॥तावद्गुडमादायवेदेनैवाग्रजोहतः॥९॥ निवार्यमाणावपि तौमुनिना
ज्ञानयोगिना॥प्रवारितावप्यन्योन्यंजघ्नतुस्तौपरस्परं॥१०॥ धनलोभ्यंतयोर्दृष्ट्वाजहर्षुः
शमिनस्सदा॥निजघ्नेवानुजंसत्यस्तावत्तेनैवताडितः॥११॥ जगामपितरंवक्तुंसहिक्षि
तस्तुवैसदा॥दृष्टःपित्रासशमिनानिहतोधनलिप्सया॥१२॥ पितोवाचव्यवसितंचि-
त्रंचैवदुःखदं॥पश्यतांशमिनामद्यत्वयानोदूषितंकुलं॥१३॥ धिक्तेवक्त्रंनदुर्वृत्तदे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हभाजांनिरर्थक॥ धनंधर्मफलंलोकेधर्मोपिकरुणालयः॥१४॥करुणापिनसौंदर्येययो
स्तुजीवितंवृथा॥ किंधनंधर्महीनंयत्‌किंश्रुतंश्रमवर्जितं॥१५॥ किंकर्मनार्पितंविष्णौ
किंज्ञानंयन्नचैश्वरं॥उपकारविहीनंकिंदेहंगेहमथापिवा॥१६॥जीवितेनापिकिंतेन·
सत्यहीनेनपुत्रक॥जीवितंयस्यधर्मार्थंधर्मोज्ञानार्थएवच॥१७॥ज्ञानंध्यानंचयोगा·
र्थंसोचिरादेवमुच्यते॥ब्राम्हणस्यहिदेहोयंनोपभोगायकल्पते॥१८॥इहक्लेशायमहते
प्रेत्यानंतसुखायच॥प्रशस्तानिनिषेवेतस्वकर्माणिप्रयत्नतः॥१९॥एतावद्धर्मसर्वस्वं
निंदितानिविवर्जयेत्॥ऋजुःस्तपस्वीसंतुष्टःसमःसत्योजितेंद्रियः॥२०॥दांतःशांतो
दयावांश्चब्राह्मण्यान्नावसीदति॥पारुष्यमनृतंहिंसापरस्वंपरयोषितः॥२१॥पैशून्यं
लोकवार्ताञ्चपापभेदान्‌विवर्जयेत्॥परलोकहितंनित्यंशश्वदुत्थायचिंतयेत्॥२२॥अ
न्नैवकर्मणामेवंविपाकंपरिचिंतयेत्॥उर्ध्वबाहुर्ब्रवीम्येतन्नचकश्चिछृणोतिमे॥२३॥
धर्माद्र्थश्चकामश्चसधर्मःकिंन्नसेव्यते॥पूर्वेवयसियोधर्मंनकरोतिसमूढधीः॥२४॥स
पश्चात्तपतेस्फुतोभ्रष्टःस्वार्थादिवाध्वगः॥अप्रमत्तेनसततंधर्मःकार्योविजानता॥२५॥स
हसामरणेप्राप्तेधर्मंकर्तुंनशक्यते॥शून्यमार्गान्निवर्ततेज्ञातयःसहबांधवैः॥२६॥येनतेसह·
गंतव्यंतत्कर्मसुकृतंकुरु॥तोयफेनोपमेदेहेजीवेशकुनिवत्स्थिते॥२७॥अनित्येप्रियसंवासे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कथंस्वपिषिपुत्रक॥ अविश्रामममनालंबमपाथेयमदेशिकं॥२८॥ततः कांतारमध्वानं
कथमेकोगमिष्यसि॥शुभाशुभेसमादायपुमान्यत्रहिगच्छति॥२९॥अन्यत्रैवास्यगच्छं
तिस्रुहृत्संबंधिबांधवाः॥अहिंसासत्यमस्तेयंक्षमाजपतपोमयं॥३०॥नावमारुह्यय-
त्नेनसंसारार्णवमुत्तर॥कृष्णातीरेस्रुधानीरेसर्वप्राप्तिकरेनृणां॥३१॥संनिमज्यत्रिषव
णंयाहिविष्णुमनामयं॥इत्याकर्ण्यपितुर्वाक्यंससद्योविगतस्पृहः॥३२॥प्रणम्यपितरं
भक्त्याकृष्णातीरंजगामसः॥धूतपापात्क्रोशमात्रेकृष्णायादक्षिणेतटे॥३३॥आरा
धयन्महादेवंपरित्यज्यमदादिषट्॥तस्यप्रसन्नोभगवान्त्रिवर्णोनीललोहितः॥३४॥
प्रशांतमनसंदृष्ट्वासर्वभूतहितेरतं॥समनिंदास्तुतिंशांतंसमलोष्टाश्मकांचनं॥३५॥
जपन्यंचाक्षरींविद्यामगस्त्येनोपदेशितां॥तमाहभगवान्रुद्रःसत्यंकिलेत्हृदिस्थितं॥३६
तद्वदस्वमहाभागसर्वदेवैःसुदुर्लभं॥वरंवरयभद्रंतेनास्त्यदेयंभवादृशे॥३७॥तमाह
देवदेवेशंप्रणम्यतपन्नात्मजः॥योगंमेदेहिदेवेशसर्वेषांसर्वगःशिव,पश्यामिसर्वभूत-
स्थमेकीभावेनसंस्थितं॥३८॥ ॥स्कंदउ॰॥इतितस्यवचःश्रुत्वायोगिध्येयांघ्रिपंक-
जः॥आत्मारामःपूर्णकामःसंविचिंत्याब्रवीदिदं॥३९॥नपद्मासनयोगेननासाग्रनिरीक्ष
णात्॥मनसश्चेंद्रियाणांचसंयोगोयोगउच्यते॥४०॥कर्मणामनसावाचाभूतसाम्यम

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तंद्रितः॥ भजतेसर्वभूतस्थंसमोक्षमधिगच्छति॥ ४१॥ एतदेवपरंज्ञानंएतदेवपरंत
पः॥ एतदेवपरोमोक्षोह्येतदेवहिसाधनं॥ ४२ इतियोगस्यसर्वस्वंमयातेकथितंद्वि
ज॥ गृहाणपरयातुष्ट्यापरानंदात्मकोभव॥ ४३॥ आनंदीभूतमात्मानंपश्यस्यनुभवं
यदा॥ तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच॥ ४४॥ इतितेकथितंसत्ययोगतत्वंस्फु
निश्चितं॥ किमन्यदिच्छसेब्रम्हन्यत्तेभीष्टंददामितत्॥ ४५॥ ॥सत्यउवाच॥ सत्य
तीर्थंभवत्वेतत्त्वंचसत्योभवत्विह॥ अस्मिन्ममहातीर्थेनान्यत्किंचिद्वरंवृणे॥ ४६॥
आवयोस्तत्वसंवादंयःशृणोतिविशुद्धधीः॥ सयातुपरमंस्थानंयोगिनामपिदुर्लभं॥
४७॥ यान्चैवाहंकृतीबुद्धिर्ममभ्रातुर्यवीयसः॥ सान्यपोहतुदेवेशत्वत्प्रसादान्महेश्वर॥
४८॥ तथापितत्वबोधोस्तुमांहृष्ट्वापुरुषोत्तम॥ तस्यधीर्नेश्वरेरक्ताविरक्तांतांकुरुप्रभो
॥४९॥ तथेत्युक्त्वासभगवान्सर्वभूतमहेश्वरः॥ कृत्वाविदेहकैवल्यंविष्णोर्धामपरंययौ
॥५०॥ इतिश्रीस्कंदपुराणेकृष्णातीर्थवर्णनंनामसप्तमोध्यायः॥ ॥श्रीशिवायन
मः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउवाच॥ ॥तंदृष्ट्वायोगसंसिद्धमग्रजंस्कविरक्तधीः
॥वेदोपिपितरंप्राहनचाहंचधनंभजे॥१॥तमाहतपनोवेदंगच्छत्वंद्रष्टुमग्रजं॥दृष्टेत-
स्मिन्महाभागेसंगतौतेभवेन्मतिः॥२॥यदितस्माद्विनिर्मुक्तःपूतःकृष्णांभसाकिल॥
इत्युक्तःसोपिपितरंप्रणम्याग्रजमागमत्॥३॥दृष्ट्वाग्रजंसुनिर्मुक्तंजगर्हस्वकृततंततः॥
तंदृष्ट्वाह्यनुजंसत्सोमुमुक्षुंसाधनक्षमं॥४॥इसन्प्रोवाचस्कव्यक्तंकिंतेकृष्णानिषेव्यतां
॥तथेत्युक्त्वाकृष्णगंगांसनिमज्यपुनःपुनः॥५॥गत्वासत्सेश्वरंवेदःसमाराधयदीश्वरं॥
कालाग्निरुद्रमीशानंअघोरास्त्रेणमंत्रवित्॥६॥निराहारोजितश्वासोयतवाक्कायमान-
सः॥तस्यतुष्टोमहायोगीद्वादशाब्दात्द्विजोत्तमं॥७॥प्रोवाचोच्चैर्महादेवोवरंवरयस्कव्रत
॥वेदोप्याहप्रणम्येदंवरदोयदिमेशिव॥८॥सर्वयोगेश्वरैर्वेद्यांसद्गतिंदेहिशंकर॥सर्वभू-
तस्थमात्मानंसर्वभूतानिचात्मनि॥९॥ययासंविंदतेयोगीविद्ययातांप्रयच्छमे॥मन्नाम्ना
पर्वतश्चायंयावदाभूतसंप्लवं॥१०॥तिष्ठत्वंचमहादेवएषमेस्कवरःपरः॥यत्राहमाश्र
मेतिष्ठेत्यत्रमेतपनःपिता॥११॥आवयोरंतरेकृष्णामहापुण्यास्त्सर्वदा॥अस्मिन्स
त्येश्वरेतीर्थेभुक्तिमुक्तिफलप्रदे॥१२॥स्नात्वायेत्वांप्रपद्यंतेयांतुतेपरमांगतिं॥तपनेश्व
रतोदेवात्तथावेदगिरेस्तटात्॥१३॥अंतरापतितोदेहोयेषांतेयांतिसद्गतिं॥इत्युक्त्वातंप्रण-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रु॰म म्येशंसंस्थितः स्वस्तिकासने ॥ १४ ॥ अपानप्राणयोरैक्याच्चित्तेन्चैतन्यमादधन् ॥ गतवान् अ॰
१९ परमंस्थानंयत्सुरैरपिदुर्लभं ॥ १५ ॥ तपनोहिमहादेवेजजापशतरुद्रियं ॥ तस्यापितुष्टो ८
भगवान्परेशोनीललोहितः ॥ १६ ॥ प्राहगंभीरयावाचायत्तेभीष्टंवृणीष्वतत् ॥ ॥ तप
नउवाच ॥ ॥ देवदेवजगन्नाथसर्वानुग्रहकारक ॥ प्रपन्नंपाहिमामीशसर्वगंत्वांयथाभजे
॥ १७ ॥ निरंतरंमहादेववसंतंसर्वजंतुषु ॥ धर्मानुगंमहाभागंसर्वशांतंगुणत्रयं ॥ १८ ॥ ती-
व्रंप्रसंनंसर्वज्ञंकारुण्यंसर्वजंतुषु ॥ योगंयोगविदांवंद्यंयोगगम्यंनिरंतरं ॥ १९ ॥ चिदात्मा
नंमहात्मानंसर्वोपनिषदांवरं ॥ तत्कुरुष्वमहादेवसर्ववेदहितेरत ॥ २० ॥ इतिस्तुतोम-
हादेवस्तपनेनमहात्मना ॥ स्पस्पर्शपाणिनारुद्रः प्रोवाचेदमृषिंतदा ॥ २१ ॥ ॥ ईश्वरउ-
वाच ॥ ॥ नित्यानंदपरंशांतंवरेण्यममृतंशिवं ॥ महांतस्त्वंमहायोगंविधिमामंतकांतकं ॥
२२ ॥ इत्युक्त्वातंमहात्मानंसमाभाष्यमहागतिः, जगामवृषमारुह्यशाश्वतंपरमंपदं ॥ २३
॥ तस्मात्सापावनीगंगाप्रसृतातपनेश्वरात् ॥ अगस्त्याश्रममासाद्यसंगताकृष्णागं-
गया ॥ २४ ॥ इत्येतत्कथितंविप्राःसत्यतीर्थमनुत्तमं ॥ यस्यसंस्मरणान्मर्त्योमहापापैःप्रमु-
च्यते ॥ २५ ॥ अतः परंक्रोशमात्रंविष्णुतीर्थंमहाफलं ॥ अश्वत्थरूपीभगवान्यत्रास्तेन
रसेवितः ॥ २६ ॥ वनस्पतेतिमंत्रेणप्रमेदष्टोत्तरंशतं ॥ यः प्रातः सेवतेविद्वान्सर्वदोषैः १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमुच्यते॥२७॥ विष्णुतीर्थेमहापुण्येद्वादश्यांसमुपोषितः॥ यःश्राधंकुरुतेविप्राः-
पितॄणांतारयेत्कुलं॥२८॥ ॥इतिश्रीस्कंदपुराणेकृष्णामाहात्म्ये अष्टमोध्यायः॥
॥श्रीकृष्णार्पणमस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउवाच॥ ॥ततोदंडसहस्रेतुअग्नितीर्थंप्रचक्षते॥ भु-
क्तिमुक्तिप्रदंनॄणांशृणुध्वंमुनिपुंगवाः॥१॥ ऋषिरासीद्भृगुर्नामिमानसोब्रह्मणःसुतः
॥दातादांतोदयावांश्चमहायज्वामहातपाः॥२॥ महायोगीमहाकर्मामहासत्वोतिथि
प्रियः॥सत्यवादीविशुद्धात्माजितक्रोधोजितेंद्रियः॥३॥ वर्णाश्रमाचारपरोत्कृष्टपदे-
ष्ठासतांगुरुः॥संतुष्टःकरुणोमैत्रःसदाचारोमहातपाः॥४॥ योगवित्तपशीलश्चशैव
विद्याविशारदः॥सहिष्णुर्मितवाक्दांतोमहादेवप्रियःसदा॥५॥ तस्यभार्यामहाभा-
गापतिशुश्रूषणेरता॥दांतानामस्कदांतासाग्रहकर्मण्यतंद्रिता॥६॥ वेदिसंमार्जनपरा
स्वमित्रविषयेधिका॥कमंडलुकरानित्यमशोकाश्वत्थसेविनी॥७॥ गंधपात्रीपुष्प
पात्रीजलपात्रीप्रपूरिका॥फलपाकेषुकुशलायज्ञकर्मणिसेविता॥८॥ भक्ताशक्ताच
दक्षाचसाध्वीरूपवतीसती॥संपन्नाज्ञानसंपन्नासर्वकालातिथिप्रिया॥९॥ तांकदा-
चिद्गृहेस्थाप्यभृगुर्धर्मपरायणः॥गतोमध्यंदिनेकर्तुंशुचिःसत्सौर[1]वित्सदा॥१०॥ जजा
पपरमंहंसंसःशिष्योमुनिपुंगवः॥स्थितोतिवेलंगंगायांतदाजनभयोमहान्॥११॥ महा
कायोमहादंष्ट्रोमहावक्त्रोमहाभुजः॥भूतोनाममहादैत्यस्तांगृहंसमुपागतः॥१२॥ त
स्याश्रमेमहायोगेकदलीखंडमंडिते॥प्रशांतश्वापदाकीर्णेततामंडलमंडिते॥१३॥ चू

१ सौरकर्म इतिशेषः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 तचंपकजंबीरबीजपूरैरलंकृते॥ खर्जूरैर्नारिकेरैश्च क्रमुकैरुपशोभिते॥१४॥ कपित्था
 श्वत्थबदरीकोविदारैरलंकृते॥ सरोभिर्विमलैर्जुष्टे पद्मिनीखंडमंडिते॥१५॥ कल्हारैः
कुमुदैः कुंदैः शतपत्रैरलंकृते॥ जातिभिर्मालतीभिश्च बकुलैः पाटलैस्तथा॥१६॥ ल-
वंगोशीरकल्हारबर्बरीपत्रिकाछदे॥ बहुविप्रान्वितेरम्ये ब्रह्मघोषसमन्विते॥१७॥ सू
र्यवैश्वानराभैश्च तापसैरुपशोभिते॥ सर्वकामदुघाभिश्च धेनुभिः समलंकृते॥१८॥-
होमधूमैः सुरभिते घंटाशंखनिनादिते॥ रम्यप्रदेशएतस्मिन्द्विजोभूत्वाविवेशसः॥१९॥
भृगोरुपर्णशालांतांदृष्ट्वांपुण्यशकुंतिभिः॥ प्रविवेशवरारोहांहर्तुं कामः प्रियांमुनेः॥
२०॥ तंविशंतंद्विजंदृष्ट्वाचुक्रुशुर्मृगपक्षिणः॥ पर्णशालांगणेतिष्ठन्रंगमालाविभूषिते॥२१
आजुहावभृगोः पत्नींदांतांशांतांपतिव्रतां॥ तेनाहूताहिसहसायावदागम्यसाजिरे॥२२॥
॥ तावद्ददर्शतंघोरंद्विजंकामविमोहितं॥ कस्त्वंप्रप्रछसुदतीप्रांगणेमेकिमिछसि॥२३॥
तामाहराक्षसः क्रूरोभृगोः पत्नीमनिंदितां॥ त्वंमेभार्यापुराह्यासीःमांत्वंवरयसुंदरि॥२४॥
तस्मान्नेतुंसमायातः शीघ्रमागम्यतांशुभे॥ आदौप्रतिज्ञाहिकृतापूर्वाहिबलवत्तरा॥२५॥
इतिशास्त्रंप्रमाणंतेनोचाप्टछसभासदः॥ इत्युक्तातेनसाभीतागृह्याग्निंशरणंययौ॥२६
॥ कुंडंप्रदक्षिणीकृत्यानिलिल्येवेपतीसती॥ पुनःप्रोवाचतांक्रूरः पृछगृह्यंस्वदैवतं॥२७ १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥इत्युक्ता तेन गृह्याग्निं प्रोवाचेदं शुचिस्मिता ॥त्वमग्ने सर्वभूतानामंतश्चरसि पावक ॥२८
॥साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ॥इत्युक्तः पावकः सत्यं तां प्रोवाच शनैः शनैः॥
२९॥त्वं वृतासि पुरानेन पित्रा तस्य प्रतिश्रुता ॥पश्चात्त्वं भृगवे दत्ता धर्मकामार्थसिद्धये ॥३०
॥इत्याकर्ण्य कवेर्वाक्यं तां च धृत्वा करेण सः॥ निर्जगामाश्रमात्तस्माद्भृगौ भर्तरि तत्तपोनि-
धेः॥३१॥गुर्विणीं तां समाकर्षन्निर्जगामाश्रमात्ततः॥ पश्यंती सा मुनेर्मार्गे रुदती करुणं बहु
॥३२॥हा धातः किं कृतं मे ऽद्य भृगोरपि न बिभ्यसि॥ किं मया न कृतं विष्णोरश्रून्यशयनव्रतं
॥३३॥येन शून्यं भवेत्त्वद्य भृगोरप्यालयं महत्॥ किं मे नाचरितं शंभोरुमामाहेश्वरव्रतं
॥३४॥येन धर्मात्मना जाता भृगुणा मे वियद्दृना॥नकोऽपि मेऽस्ति विदितो भवेत्त्वद्य भृगुं वि-
ना ॥३५॥कस्याग्रे कथ्यते दुःखं पुत्र त्वं गर्भगो मम ॥ मातुरित्थं समाकर्ण्य हुंकारेणापतत्सु
तः॥ ३६॥तत्क्षणात्तेजसा तस्य राक्षसो भस्मसादभूत् ॥तस्मिन्भग्ने वितते गर्भे तमुत्था-
प्य जगाम सा॥ ३७चिराच्च तीर्थादागत्य स्वाश्रमांते विवेश तां॥ भृगुर्ददर्श कारुण्यात्प्रोवा-
च परया रुषा॥ ३८॥केन ते पकृतं भद्रे कोऽयं भस्माभवत्क्षणात् ॥केन ते च्यावितो गर्भस्त-
न्नो शंस स्वमाचिरं॥३९॥ प्रतिलभ्य शनैः सा तं वृत्तं प्रोवाच तद्यथा॥ ॥सतीउवाच
॥द्विजरूपधरः कश्चित्त्वय्ययौ राक्षसाधमः॥४०॥आगत्य चाश्रमद्वारि मामाहूयाब्रवी-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 दिदं॥एहिदांतेमयापूर्वंदत्तासित्वंनसंशयः॥४१॥पित्रादत्तासितेभद्रेनोचेत्पृच्छस्वपाव
 कं॥तेनैवमुक्तारुदतीगताहंपावकांतिकं॥४२॥किंवक्तव्ययदुराचारोब्रूहिसत्यंकवेम
म॥इत्युक्तःसमयागृह्यःसत्यमेतदभाषत॥४३॥तदाकर्ण्यकवेर्वाक्यंबलान्मांप्रजहा
रसः॥कुष्टाहंतेनबलिनासर्वतःस्त्वांनिरीक्षती॥४४॥अपश्यंतीजनंकंचित्तद्भुवती
चवनस्पतीः॥भोवनस्पतयःश्रुत्वासुपुष्पफलदाःसदा॥४५॥संशाध्वंभृगवेशीघ्रं
दांतांहरतिराक्षसः॥ममाश्रमनिवासिन्योदेवतागृहदेवताः॥४६॥शंसध्वंभृगवेशी
घ्रंदांतांहरतिराक्षसः॥पुष्करिण्यःसपद्मिन्यःपक्षिणोवनचारिणः॥४७॥शंसध्वंभृगवे
शीघ्रंदांतांहरतिराक्षसः॥इत्युक्तंबहुशःक्रोशन्ससारममसंनिधौ॥नाभवत्कोपिमेत्रा
तातदाघोरसमस्मरम्॥४८॥श्रुत्वामेरुदितंकुक्षेःकुहरात्स्वयमच्यवत्॥तस्यहुंका
रनादेनराक्षसोभस्मसादभूत्॥४९॥इतिश्रुत्वावचःतस्याःसभृगुःक्रोधमूर्छितः॥श
शापवन्हिंकुपितःसर्वभक्षोभवेतिवै॥५०॥यस्त्वंधर्मरहस्येषुविमूढःपावकोपिसन्॥
नहिसत्यंत्वयाज्ञातंसत्यंभूतहितंयतः॥५१॥यन्नाशितंत्वयाशून्यंकुर्वताग्नेममाश्रमं॥
इतिशप्तःसभृगुणावन्हिःक्रोधपरिप्लुतः॥५२॥समाहृत्यात्मनःशक्तिंनिक्षिप्यस्वद्विजो
त्तमाः॥तस्मिन्नंतर्हितेवन्हौलीनेप्स्वसहशक्तिभिः॥५३॥प्रजानांजाठरोवन्हिःसद्योन

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ष्टः सवाह्यतः ॥ तदासर्वाणिभूतानिउच्चैरुच्चुक्रुशुर्द्विजाः ॥ ५४ ॥ अन्योन्यंशरणं
गत्वायाचंतेवन्हिमुत्तमं ॥ नप्रयच्छतिकोप्यग्निंनास्तिकुत्रापिपावकः ॥ ५५ ॥ कर्मसिद्धि
स्थितानृणांसर्वेषांवन्हिनाविना ॥ अंधकारीकृतेलोकेपाकसिद्धिविवर्जिते ॥ ५६ ॥ प्रा
सरोगेगतप्राणेआतिथ्यविमुखेयदा ॥ ब्रम्हाणंशरणंयातास्तदादेवाःसवासवाः ॥ ५७
किमेतदितिहोवाचधातासर्वान्दिवौकसान् ॥ तंप्रणम्यतदादेवाःसशंसुर्नष्टवन्हितां ॥ ५८
॥ अग्नेरनुगताधातःस्वधास्वाहाहिनोव्यथा ॥ वषट्कारेणसहिताःसर्वेयज्ञालयंगताः
॥ ५९ ॥ पंचत्वंमनुजाःप्रापुर्गवाश्वंमहिषादिकं ॥ विनष्टंसर्वमेतत्तेजगत्स्थावरजंगमं ॥
६० ॥ वन्हिंविनाप्रजानाथप्रपन्नान्पाहिनोव्यय ॥ इतितेषांवचःश्रुत्वासमुत्तस्थौकुशास
नात् ॥ ६१ ॥ ब्रम्हादेवगणैःसिद्धैर्ऋषिभिःपितृभिःसमं ॥ आगतस्तत्रयत्रास्तेजलशायीहु
ताशनः ॥ ६२ ॥ तानागतान्समालोक्यप्रजज्वालहुताशनः प्रोवाचेत्थंमयाधातःकिंकृतंहि
वदस्वतत् ॥ ६३ ॥ किंमयापकृतंदेवशप्तोहंभृगुणायतः ॥ पावकेनमयासत्यमुच्यतेकथमन्य
था ॥ ६४ ॥ सत्यवाच्यादहंधातःशप्तवान्सर्वभक्षतां ॥ इत्युक्तवंतंसंबोध्यवन्हिमाहप्रजा
पतिः ॥ ६५ ॥ ॥ प्रजापतिरुवाच ॥ ॥ त्वयातुसूक्तंहेवन्हेत्वन्नोभर्ताहविर्भुजां ॥ त्वया
विनानजीवामःकुतःश्राद्धंकुतोमृतं ॥ ६६ ॥ एहिवन्हेमहाभागलोकान्संजीवयाधुना ॥ त्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यासोमेनसंधार्यमग्नीषोमात्मकंजगत् ॥ ६७ ॥ त्वंक्रतुस्त्वंस्वधास्वाहात्वंक्रतुस्त्वंहुताशनः

॥ त्वंमुखंसर्वदेवानांपवित्रममृतं कवे ६८ ॥ इत्युक्तोलोकगुरुणावन्हिराहप्रजापतिं ॥ स्था
नंसंदिशमेधातऋषेःशापप्रमोचनं ॥ ६९ ॥ यत्रतच्छुद्धिदंपुण्यंपावकस्यापिपावनं ॥ इत्यु
क्तोभगवान्ब्रह्मावन्हिनाश्वत्थयोनिना ॥ ७० ॥ प्राहगंभीरयावाचायाहिकृष्णांहविर्भु-
ज ॥ भवितातत्रशुद्धिस्तेसाक्षाद्विष्णुमयीयतः ॥ ७१ ॥ तत्रमेयज्ञसदनंमहत्वेदिस्रुवा
दिकं ॥ तथेत्युक्तोजगामाग्निर्भृगुणातिप्रसादितः ॥ ७२ ॥ कृष्णागंगांसमासाद्यन्यवसद्दक्षि
णेतटे ॥ यत्रसिद्धेश्वरोदेवःपावकस्यापिपावकः ॥ ७३ ॥ सहस्रधनुषांप्रोक्तंविष्णुतीर्थं
द्विजोत्तमाः ॥ वत्सरार्धेनतत्रास्यासिद्धिर्जातामहात्मनः ॥ ७४ ॥ तस्मिंस्तीर्थेमहापुण्येति
लाज्यंयःप्रयच्छति ॥ ब्राह्मणेभ्योद्विज श्रेष्ठाःपुनात्यासप्तमंकुलं ॥ ७५ ॥ श्राद्धंकरोतियस्त
त्रव्यतीपातेंदुसंक्षये ॥ सक्तुभिर्निर्वपेत्पिंडान्पुरुषांस्त्रीन्पुनातिसः ॥ ७६ ॥ यःसोमश्रव-
णेस्नात्वासिद्धेशंचावलोकयेत् ॥ प्रदोषेद्विजशार्दुलअग्निलोकंसमश्नुते ॥ ७७ ॥ मकरस्थे
रवौविप्रास्तिलाज्यंयःप्रयच्छति ॥ गायत्र्यष्टसहस्रंतुचांद्रायणफलंलभेत् ॥ ७८ ॥ अग्नि
तीर्थेमहापुण्येस्नात्वासिद्धेश्वराग्रतः ॥ पयस्विनींचगांदद्यात्सयज्ञफलमश्नुते ॥ ७९ ॥
पावकस्यमहातीर्थेयःशुक्लप्रतिपद्दिने ॥ विप्रेभ्यःस्तंडुलान्दद्याद्दारिद्र्यंनभवेत्क्वचित्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥८०॥ सिद्धेश्वरे पुण्यतीर्थे सह्यजा दक्षिणे तटे ॥ मिष्टान्नं द्विजमुख्येभ्यो दत्वा ह्यंते स्फुरवी भवेत् ॥८१॥ इत्यग्नितीर्थस्य फलं द्विजाग्र्याः श्रीकृष्णनद्याः किल दक्षिणे तटे ॥ आयुष्यमारोग्यमहाविभूतिं शृण्वन्नरो याति शिवस्य लोकं ॥८२॥ इति श्रीकृष्णामाहात्म्ये अग्नितीर्थवर्णनन्नाम नवमोध्यायः॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥शुभंभवतु॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इतिनवमोध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीगणेशायनमः ॥ ॥नारदउवाच॥ ॥अतः परं महापुण्यंवैराजक्षेत्रमुत्तमं॥
यस्यसं स्मरणादेवसर्वपापैः प्रमुच्यते॥ १॥पुरावैराजकेकल्पेब्रह्माब्रह्मविदांवरः॥
द्वादशाब्दंमहासत्रमकार्षीत्तत्रसिध्धये॥ २॥ तस्मिन्सत्रेमनोभिज्ञेक्रयज्ञःस्रमहा-
ध्वनिः॥दीयतांभुज्यतांचेतिप्रीयतांभगवान्हरिः॥ ३॥ तस्मिन्सत्रेहेमपात्रेब्रह्मनेत्रे
स्रवप्रदे॥वसवोमनवःसिध्धाऋषयोदेवतागणाः॥ ४॥सभार्यास्तेसदस्यासन्प्रवृ-
त्तेयज्ञकर्मणि॥वेद्यस्तत्रहिरण्मय्योयूपाश्चापिहिरण्मयाः॥ ५॥कलधौतान्य मत्रा
णिशूर्पान्यूलूखलानिच॥स्रुवश्चापिपारिजातोथाकल्पवृक्षोद्भवास्तथा॥ ६॥आ-
सनानिविचित्राणिकंबलान्यजिनानिच॥विशालमंडपेतस्मिन्विश्वकर्मकृतेद्विजाः
॥ ७॥शंखदुंदुभयोनेदुर्गंधर्वाश्चकलंजगुः॥ऋचोयजूंषिसामानिस्वयंवेदाःपठंस्तदा
॥ ८॥ प्रवृत्तेयज्ञसंभारेकुंडेवेदिषुसंभृते॥पत्नीशालातुनैर्ऋत्यामाग्नेय्यांतुमहानसं॥ ९
प्रतीच्यांगंधपुष्पादिवायव्यांद्विजतर्पणं॥हस्त्यश्वादितदोदीच्यांधनधान्यसमन्वितं
॥ १०॥ ईशान्यांदेवसदनंप्राच्यांब्रम्हसभास्मृता॥तत्रतस्मिन्समारंभेदेवाःसर्वेस-
मागताः॥ ११॥ननिषीदंतितेसर्वेविनादाक्षायणीपतिं॥तानुवाचततोब्रह्मारुद्रभागं
विनाकथं॥ १२॥ यज्ञावाशासिर्भवेन्मह्यंतमानपतमाच्चिरं॥ वैराजेनैवमुक्तास्तेदेवा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰म वायुमथाब्रुवन् ॥ १३ ॥ गच्छवायोविश्वनाथंविज्ञापयसहोमया ॥ समाधवंमहेशंचदं अ॰
२५ डपाणिसमन्वितं ॥ १४ ॥ वाराणस्यांवसंतंतंशीघ्रमानयशीघ्रग ॥ इत्युक्तोऋषिभिर्वा १०
युर्गत्वावाराणसींपुरीं ॥ १५ ॥ इतिविज्ञापयामासतारकेशंसदाशिवं ॥ देवदेवजगन्नाथ
यज्ञकर्मफलप्रद ॥ १६ ॥ वेदोपनिषदांपूज्यकर्मयोगनमोस्तुते ॥ त्वयिनाथेसतिविभो
ब्रह्माब्रह्मविदांवरः ॥ १७ ॥ सत्रमारब्धवान्रुद्रतत्रपूज्योभवानिति ॥ त्वयातत्सत्यम
खिलंकर्मतंत्रंऋचांपते ॥ १८ ॥ तदेहिसोमपानायसोमसोमार्धभूषण ॥ त्वयास्वाहास्वधा
रुद्रत्वयाश्राद्धंसनातनं ॥ १९ ॥ वषट्कारःस्त्वमोंकारःप्रणवःसर्वकर्मसु ॥ त्वयासावभृ-
थायज्ञास्त्वयासोद्यापनंत्विदं ॥ २० ॥ परिपूर्णंत्वयासर्वंह्यफलंतुत्वयाविना ॥ विज्ञप्तिंब्रा
ह्मणादीनांश्रुत्वाविश्वहरोहरः ॥ २१ ॥ त्वयैतांत्वयैताभद्रोविशालाक्षिमखंविधेः ॥ त्व
यायज्ञोत्सवोधन्योब्राह्मणाःसर्वमंगले ॥ २२ ॥ ॐमित्युक्ताभगवतीप्रहृष्टेनांतरात्मना ॥ अ
जगामवृषारूढाविश्वनाथेनपार्वती ॥ २३ ॥ लक्ष्म्यासहमहाविष्णुर्दंडपाणिपुरःसरः ॥
श्वेतकृष्णश्चधूम्राक्षःपद्माक्षश्चानुयायिनः ॥ २४ ॥ धनुःपाणिर्गदापाणिःखड्गपाणिः
परस्वधी ॥ पट्टिशीकुंतपाणिश्चदंडपाणिपुरःसराः ॥ २५ ॥ कलावतीचंद्रवतीमालतीप
द्ममालिनी ॥ विश्वाचकलधौतांगीविद्याधर्यःप्रतस्थिरे ॥ २६ ॥ असितोदेवलोव्यासो १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भरद्वाजान्वयःशिवः॥ ऋषिपत्न्यःसुवासिन्यःसुगंधिन्यःप्रतस्थिरे॥२७॥समाग-
तंसमालोक्यविश्वनाथंप्रजापतिः॥ प्रहर्षमतुलंप्राप्यपुरोगच्छत्सदाशिवं॥२८॥शंख
दुंदुभिनिर्घोषैःमंत्रघोषैःसुमंगलैः॥आनयामासविश्वेशंसिद्धिदंयज्ञकर्मणां॥२९॥
तंसमाराध्यविश्वेशंविष्टराद्यैःसमाधवं॥अब्रवीच्चविशालाक्षीत्वयामातस्सुमंगले॥-
३०॥जातंमेयज्ञसदनंतपसात्कृपयांबिके॥इत्युक्त्वापितरौब्रह्मामाधवंचाब्रवीदिदं॥
३१॥त्वयाकर्माखिलंविष्णोपूर्णमस्तुसनातन॥तत्वयाविश्वनाथेनकालनाथेनचो
मया॥३२॥त्रातव्यंयज्ञसदनंयावदाभूतसंप्लवं॥तथेत्युक्त्वाजगन्नाथोविश्वनाथेनचो
मया॥३३॥न्यवसत्सह्यजातीरेउत्तरेदंडपाणिनः॥ततःसऋत्विग्वरणायवेधाःसमा
हूयामाससधर्मचारिणीं॥नायातिशीघ्रंरजनीमरुक्षांसुवासिनीभ्योददतीह्यपूजयत्॥३४
तथास्रजोगंधवतीसुवाससीतांबूलदान्नानितथास्कमोदकान्॥अरुंधतीभानुमतीसतीभ्यः
स्वलंकृताभ्योददतीश्रमान्विता॥३५॥तावत्सरस्वतीक्रुध्धाशांडिल्यंसमभाषत॥शांडि-
ल्यानयगायत्रींद्वितीयांसहचारिणीं॥३६॥यथासंपूर्यतेसत्रंपवित्रंब्रह्मकर्मणा॥इत्युक्त
स्तांसमानीयशांडिल्यःशंसितव्रतः॥३७॥समन्वारब्धवान्सत्रंतयाधातासमंत्रकं॥तां
दृष्ट्वापतिसंलग्नांस्नुषंधारयतीस्थिरं॥३८॥क्रुध्धाप्रोवाचसावित्रीस्त्रीस्वभावात्सुवासि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नी ॥ नस्थितिंप्राप्स्यसेभर्तुः क्वापिलोकेमयाविना ॥ ३८ ॥ इत्युक्त्वाकालेकधातारंसावि-

त्रीवटमूलितः ॥ पश्चिमाब्धिंगताविप्राहाहाकारोह्यभूत्तदा ॥ ३९ ॥ तांदृष्ट्वात्वरिताविप्रा
समानेतुंरुषाकुपिः ॥ गताह्यब्धेस्तटंयावत्प्रविष्टासागरंशुभा ॥ ४० ॥ तत्सुपुण्यंमहाती
र्थंभुक्तिमुक्तिफलप्रदं ॥ सर्वतीर्थोत्तमंविप्रामहापापहरंपरं ॥ ४१ ॥ ततोब्रह्मातिमूर्छो
भूत्तरेरयापरयायुतः ॥ देव्यांगतायांकिंकार्यंकिंकृतंनास्मरत्तदा ॥ ४२ ॥ तदासुरोमहापापो
क्रियांलोप्तुंसमागमत् ॥ तंबुवोधनवेधापिज्ञातोसौदंडपाणिना ॥ ४३ ॥ कथितोदेवदेवा
यमहादेवायशूलिने ॥ त्रिशूलेनाहनद्रुद्रंनिमग्नःसह्यजांभसि ॥ ४४ ॥ सुदर्शनंसूर्यसहं-
स्रभासंरुद्रोगृहीत्वातुकरांबुजात्धरेः ॥ जघानतेनाध्वरविघ्नकारकंदैत्यप्रणाशंप्रवर
हितीर्थं ॥ ४५ ॥ कीलाललिप्तंसदशोकवर्णंचक्रंनिघृष्टंहरिणाहियत्र ॥ तच्चक्रतीर्थंप्र-
थितंहिराजतेक्रक्षेहरेर्यज्ञफलंहिमज्जनात् ॥ ४६ ॥ सिध्धेश्वराद्दंडशतात्तदग्रेतत्पाप
हारंभुविभूरिपुण्यदं ॥ स्नात्वाद्विजेभ्यःप्रददातियोन्नंप्रपूर्यपात्राणिविशोकवान्जनः ॥
४७ ॥ ततोधनुर्विंशतिमेविभागेत्तच्चक्रतीर्थंश्रवणात्तुपुण्यदं ॥ ततोमहाभैरवतीर्थमुत्त-
मंक्षेत्राधिपोयत्रचकालभैरवः ॥ ४८ ॥ पंचविंशतिसंख्याकेधनुषांचक्रतीर्थतः ॥ महाफ-
लंमहातीर्थंवाराणस्यायवाधिकं ॥ ४९ ॥ मासेचाश्वयुजेविप्रारविवारेरिनोदये ॥ स्ना- २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वामौनीमहाकालंपश्यन्मृत्युंजयेसुधीः ॥५०॥ महाकालान्महातीर्थादंतरेचक्रतीर्थतः
॥शिवविष्णोर्महातीर्थंविशालाक्ष्यावलोकितं ॥५१॥ अष्टम्यांचचतुर्दश्यांएकादश्यां-
विशेषतः ॥ तिलैःस्नात्वाविशालाक्षींविश्वेशंचैवमाधवं ॥५२॥ योर्चयेद्बिल्वपत्रैश्च-
तिलमिश्रैर्द्विजोत्तमाः ॥सस्वर्गेमोदतेतावद्यावदिंद्राश्चतुर्दश ॥५३॥ अमावास्यांरवेर्वा-
रेमहाकालस्यचाग्रतः ॥ पितॄनुद्दिश्ययोभक्त्यागांचदद्यासयस्विनीं ॥५४॥ तदंतेपितरस्त-
स्यनंदंतिचपितामहाः ॥ मधुकुल्याःक्षीरकुल्याःपितरोश्नंतितस्यवै ॥५५॥ यःसोमःश्रव-
णेस्नात्वाभक्त्याविश्वेश्वराग्रतः ॥ दंपसोर्वासस्रीदद्यात्सोमलोकंसमश्नुते ॥५६॥ माघेस्ना-
त्वासितेपक्षेद्वादश्यांयःसमर्चयेत् ॥ माधवंमालतीपुष्पैश्चंदनेनसुगंधिना ॥५७॥ उपहारैश्च-
तांनुलैर्लक्ष्मीवान्जायतेध्रुवं ॥ माघेसितेचतुर्दश्यांरात्रौविश्वेश्वरंहरं ॥५८॥ स्नापयेत्तं-
चगव्येनकुंकुमेनसुगंधिना ॥ अर्चित्वाबिल्वपत्रैश्चतिलैरीशंसमर्चयेत् ॥५९॥ यःस
यातिपदंशंभोरमृतंशाश्वतंद्विजाः ॥ तेनदत्तंमहादानंतेनज्ञातंपरात्परं ॥६०॥ विश्वे
शःपूजितोयेनकलौकन्यागतेगुरौ ॥इतिविश्वेश्वरोदेवोदंडपाणिःसमाधवः ॥ ६१॥ जुगुपु-
र्ब्रह्मयज्ञंतंकृष्णातीरस्थिताःसदा ॥इत्येतत्कथितंविप्राःपापहारंस्कंदर्शनं ॥ ६२॥ भैर-
वंचमहातीर्थेविश्वेशंतदनंतरं ॥ यःश्रृणोतिनरोभक्त्यासयातिपरमंपदं ॥६३॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इतिश्रीस्कंदपुराणे कृष्णामा० भैरवतीर्थवर्णनं नाम दशमोध्यायः॥ ॥ छ॥

छ छ छ छ छ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥अतःपरंमहातीर्थंधनुषांपंचविंशतौ॥
रामतीर्थंमहापुण्यंशृणुध्वंमुनिपुंगवाः॥१॥कौशलेंद्रस्सुतःश्रीमान्रामोनाममहा-
भुजः॥पृथिव्यांचतुरंतायामासीद्राजासुधार्मिकः॥२॥द्विशरंनाभिसंधत्तेद्विस्थापय-
तिनाश्रितान्॥द्विर्ददातिनचार्थिभ्योरामोद्विर्नाभिभाषते॥३॥तस्यसत्याभिसंधस्यध
र्मराज्यंप्रकुर्वतः॥यदभून्महदाश्चर्यंतच्छृणुध्वंद्विजोत्तमाः॥४॥कस्यचिद्विजमुख्य
स्यपंचवर्षशतःसुतः॥ब्रह्मचारीमृतःकस्मादसूच्छुर्गोत्रिणोमिथः॥५॥तंगृहीत्वासु
तंविप्रोजयशर्मारुदद्भृशं॥अयोध्यायामहाद्वारिस्थापयित्वेदमब्रवीत्॥६॥रामराममहाबाहोशृणुमेपरमंवचः॥यस्यराष्ट्रेमहत्पापंवर्णसंकरकारकं॥७॥वर्ततेतेनराजेंद्रभ
वंत्यल्पायुषोजनाः॥नकुर्यादितरःपापंपुरेराष्ट्रेनृपालये॥८॥तत्कथंनृपशार्दूलबालो
ममसुतोमृतः॥इत्याकर्ण्यवचोरामःसत्यधर्मपराक्रमः॥९॥विचिन्वन्सर्वदेशेषुवनेषू
पवनेषुच॥ददृशेसह्यशैलस्यनिकुंजेशूद्रतापसं॥१०॥तपतायेनसंघोरंधूम्रपानेकृत-
श्रमं॥तंदृष्ट्वाराघवोवीरःस्मयमानस्त्वदैवहि॥११॥वर्णाश्रमाणांधर्मश्चधर्माधर्मःप्रव
र्तते॥तेनरामेणसंज्ञातंविप्रमृत्योर्हिलक्षणं॥१२॥एवंसंचित्यरामेणध्येतधर्म्यंनिशम्यच
॥तंघोरंतापसंहत्वाततोरामोजगामह॥१३॥जगामस्वपुरंरामःकिंचिच्छंकासमन्वितः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ·म आगतः स्वपुरंतावच्चेतनांप्राप्तवान्द्विजाः॥१४॥द्विजमुख्यामहृष्टास्तेभेजुः स्वाश्र- अ
२८ ममंडलं॥धर्मवैराघवः काममुद्वहन्पृष्टवान्गुरुं॥१५॥किमेतदितिसंचिंत्यवसिष्ठोयोग ११
सत्तमः॥कथयामासरामायवसिष्ठोद्विजसत्तमः॥१६॥यस्त्वयानिहतः पापः सलिंगी शू-
द्रतापसः॥तत्पापशांतयेरामकृष्णांपुण्यजलांव्रज ॥१७॥इतिश्रुत्वामुनेर्वाक्यंरामोधर्म
भृतांवरः॥जगामसह्यजांपुण्यांब्रह्मसत्रंयतोभवत्॥१८॥कृष्णनद्यांधनुःकोट्यांरामती
र्थंतदुच्यते॥महाकालान्महास्थानात्धनुषांपंचविंशति॥१९॥स्नानार्थंपंचकुंडानिरा
मश्चक्रेकुतूहलात्॥ ॥तस्मिंस्तीर्थेमहापुण्येस्नात्वारामोमहायशाः॥२०॥गोलक्षमद
दात्स्वर्णविषाणंघटदोहनं॥रामतीर्थेमहापुण्येकार्तिक्यांस्नानकृन्नरः॥२१॥द्वादशा-
ब्दव्रतफलंलभतेनात्रसंशयः॥कार्तिक्यांकृत्तिकायोगेस्नात्वारामेशसंन्निधौ॥२२॥
यःकरोतिनरःश्राद्धंभक्त्यापिंडांश्चनिर्वपेत्॥प्रीणंतिपितरस्तस्यसप्तसप्तचसप्तच॥२३
॥इतिपुण्यतमंपुंसांरामतीर्थंमयोदितं॥यःशृणोतिनरोभक्त्यासपुण्यांलभतेगतिं॥२४
॥इतिश्रीस्कंदपुराणेकृष्णामहात्म्येरामतीर्थवर्णनन्नामएकादशोध्यायः॥ ॥

१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥ततोदंडशतंपुण्यंजान्हवीतीर्थमुत्तमं॥म
हापापक्षयकरंशृणुध्वंमुनिपुंगवाः॥१॥आसीत्प्रजापतिःपूर्वंपौलस्त्योनामधार्मिकः॥
शुचिःसंसेवितातेनजान्हवीपुण्यसंगमे॥२॥मातेववत्सलागंगाकदाचित्तांनमुंचति·
॥तस्यपुत्रोमहाविद्वान्भीमशर्मेतिविश्रुतः॥३॥तर्ककर्कशधीर्निःसंधिप्रान्जयतिजल्प
ने॥अहमेवक्षितौविद्वान्नद्वितीयोस्तिकश्चन॥४॥इतिविप्रसभांगत्वाहसतेवदतेचिरं
॥कदाचित्द्विपदांवंद्यमुपमन्युंजहाससः॥५॥शप्तस्तेनातिक्रुद्धेनजंबुकोभवजल्प·
नात्॥इतिश्रुत्वामुनेःशापंभीमशर्मासवेपथुः॥६॥प्रसाद्यतंमुनिश्रेष्ठंप्रोवाचेदंपुनःपु
नः॥धिःकृताब्राम्हणानित्यंविद्यामदिरमत्तया॥७॥साधवोबहुशःस्वामिन्क्षमांकुरु
दयानिधे॥अजानतामुसामर्थ्यंत्वदीयंतपउल्बणं॥८॥साधूनांचित्तवैकृव्यात्सर्वंदह·
तिसान्वयं॥दुर्जनानांस्वभावोयंपरपीडाकरःसदा॥९॥दृश्यंतेदुर्गुणास्तावत्तावद्दुर्ज
तिपातकं॥यावन्नोपासितंस्वामिन्साधोश्चरणपंकजं॥१०॥दृष्टेस्पृष्टेयदासाधोःपाद·
पंकजमंजसा॥क्षीयंतेतानिपापानियानिकर्माणिपुण्यतः॥११॥प्रणम्यदंडवद्भूमौवि·
शापंकुरुमांमुने॥इत्युक्तःकृपयासद्योत्यक्तमन्युरुवाचतं॥१२॥नमयोक्तंवृथाकापि
संजातंमुनिपुत्रक॥सद्यस्त्वयानुतप्तेनप्रणम्याहंप्रसादितः॥१३॥जंबुकत्वेपितेतस्मा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्मतिर्नैवोपगच्छति ॥ भ्रमतस्तेयदागस्त्यः क्वापिदृष्टोनुदैवतः ॥ १४ ॥ तत्प्रसादयविप्रत्वं
स्ततेमोक्षंविधास्यति ॥ इत्युक्तोमुनिनासद्योगोमायुरभवत्क्षणात् ॥ १५ ॥ संस्मरन्स्व-
कृतंपापंब्रह्मत्वंविलयंगतं ॥ वनाद्वनंसबभ्रामपर्वतात्पर्वतान्तरं ॥ १६ ॥ इत्थंहिभ्रमतातेन
दृष्टोगस्त्यः कृपानिधिः ॥ प्रणम्यशिरसाभक्त्याअगस्त्यंमुनिसत्तमं ॥ १७ ॥ उपमन्युप्रसादे-
नजातिस्मरणहेतुना ॥ हसन्प्रोवाचगोमायुंकस्त्वंकिंतेचिकीर्षितं ॥ १८ ॥ इत्याकर्ण्यमुनेर्वा-
क्यमश्रुपूर्णाकुलेक्षणः ॥ जंबुकोनिजगादेदंस्ववृत्तांतंनिवेद्यच ॥ १९ ॥ उपमन्युकृतःशापः
कोपेनतपसांनिधेः ॥ उच्छापस्तुमयादृष्टः स्तद्वाक्यामृतपूरितः ॥ २० ॥ दुःखंप्राप्तंमयास्वामि-
न्निदानींक्षयमेष्यते ॥ त्वद्दर्शनसंजातात्साधोश्चरणदर्शनात् ॥ २१ ॥ तद्विमृश्यधियाग-
स्त्योजंबूकंप्राहसत्वरः ॥ अस्तिप्राच्यांदिशिमहान्सह्याद्रिःपर्वतोत्तमः ॥ २२ ॥ वैकुंठस्यतनुः
साक्षात्तस्माच्छैलाद्विनिर्गता ॥ कृष्णावेणीतिविख्याताशापतापापहास्मृता ॥ २३ ॥ तस्यांस्ना-
त्वाचपीत्वाचशापान्मुक्तोभविष्यसि ॥ तस्मात्त्वंगच्छतत्रापः पीत्वामुक्तोभवाचिरं ॥ २४ ॥
इतिवाक्यंमुनेःश्रुत्वाप्रणम्यचपुनःपुनः ॥ आगतस्तृषितःकृष्णांपीत्वापःशुचितामियात् ॥ २५
समुक्तोभूद्दृषेःशापात्तत्रैवन्यवसच्चिरं ॥ पुत्रंचिरगतंदृष्ट्वापुनरागमवर्जितं ॥ २६ ॥ दाल्भ्यः
स्नेहाकुलःकृष्णांसमायातःसधार्मिकः ॥ ततःसविस्मयाविष्टोदृष्ट्वाकृष्णांमहानदीं ॥ २७ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहोकृष्णामहाधन्याधन्यैरेवावलोक्यते ॥ पुनः पुनरुवाचेदंदृष्ट्वापुत्रंस्ववर्चसं ॥ २८ ॥
गतेदिनशतेविप्रागंगामातेववत्सला ॥ दाल्भ्यंद्रष्टुंसमायाताभक्त्याते नस्वसेविता २९ ॥
रामकुंडाद्दंडशतंचाग्रेरामाश्रमाग्रतः ॥ प्रसूतंतत्रतद्भक्त्याजान्हवीस्रोतसांशतं ॥ ३० ॥-
तत्रजातंमहातीर्थंकृष्णायांजन्हुनिर्मितं ॥ भीमकुंडमितिख्यातंस्नानाच्चांद्रायणप्रदं ॥
३१ ॥ तत्सोमश्रवणेविप्राःषडब्दफलमश्नुते ॥ प्रयागेयत्फलंमाघेसेतुबंधेचकार्तिके ॥ ३२
॥ तत्सोमश्रवणेस्नानाज्जान्हवीसंगमेभवेत् ॥ इतिभीमेश्वरंतीर्थंजान्हवीसंगमोत्तमं ॥ ३३
॥ यःशृणोतिनरोभक्त्यासयातिपरमांगतिं ॥ ब्रम्हसत्रांतरेविप्रास्तीर्थंब्रम्हह्रदंततः ॥ ३४ ॥
यत्रब्रह्मासर्वदेवैःपूजितोब्रम्हणास्वयं ॥ तस्मिन्सत्रेब्रम्हपात्रेहोमेवृत्तेःमृतप्रदे ॥ ३५ ॥
विष्णुसत्रेवेदमंत्रेगायत्र्याःप्राप्यतेपदं ॥ पूर्णाहुतौप्रवृत्तायांविश्वेशःस्वयमुत्थितः ॥ ३६
॥ गृहीत्वामृतसंपूर्णपात्रंतत्रमनोरमं ॥ बालसूर्यप्रतीकाशंजांबूनदनिभंहरिः ॥ ३७ ॥ अ-
र्पयामासगायत्रीसाहितायाब्जयोनये ॥ ब्रम्हापिचिंतयाविष्टः प्रेम्णाशुद्धेनचेतसा ॥ ३८ ॥
तामानंदमयींकृष्णांब्रह्मावह्मविदांवरः ॥ किंकरोमीतिगायत्रीमुखमेवाविलोकयन् ॥ ३९
साचाहमहतीब्रह्मन्ब्रह्मामृतमयःशिवः ॥ सर्वोपनिषदांवेद्यःसर्वकर्मफलप्रदः ॥ ४० ॥
पीयूषरूपीभगवान्कृष्णातीरेप्रतिष्ठितः ॥ इत्युक्तंछंदसांमातुःसमाकर्ण्यविधिर्मुदा ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४१॥समानीयऋषींद्देवान्वेदान्सांगान्सहागमैः॥अघोरंसंपुटीकृत्यहुंकारेणसहाय

वान्॥४२॥तंप्रतिष्ठापयामासब्रह्मामृतमयंशिवं॥तत्रदेवाःसगंधर्वाऋषयःपितृभिःस

ह॥अमृतेशंशिवंदृष्ट्वापदमापुःपुराद्विजाः॥निवृत्तेकर्मतंत्रेतुसांगेतुयज्ञकर्मणि॥४४

॥समयेवभृथःस्याद्यजातेसर्वस्वदक्षिणे॥शंखदुंदुभिनिर्घोषैःप्रवृत्तेमंगलध्वनौ॥४५

तत्रोचुर्मुनयःसर्वेभिषेकार्थंसरस्वतीं॥वंशाग्रेणानयामासपुण्यगर्भांसरस्वतीं॥४६॥

शालांप्रदक्षिणीकृत्यसंगताकृष्णयातदा॥तत्रदेवाःसगंधर्वासिद्धाश्चपरमर्षयः॥४७

॥ब्रह्माणंस्नापयांचक्रुर्गायत्र्यासहितंद्विजाः॥तस्मिंनवभृथेवृत्तेकृस्नातेसुचिधौतदा॥

४८॥देवाश्चऋषयःसर्वेसस्तुर्भक्त्यातुसंगमे॥ब्रम्हादेवैःसऋषिभिरमृतेशमपूजयत्

॥४९॥प्रतीच्यांतत्रनैर्ऋत्यांवायव्याममृतेश्वरात्॥वसंतिसर्वतीर्थानिसरिद्भिःसागरैःसह॥

५०॥पश्चिमेविष्णुकुंडंचब्रह्मकुंडंचनैर्ऋतौ॥दक्षिणेशिवकुंडंचचक्रेब्रह्माघशांतये॥

५१॥तेषुस्नात्वाततोब्रम्हापूजयित्वामृतेश्वरं॥चक्रेनामानिदेवस्यसर्वाघौघप्रशांतये॥५२

॥कृतेब्रह्मामृतानंदस्त्रेतायाममृतेश्वरः॥द्वापरेसत्यधर्मेशःकलौभद्रेश्वरःस्मृतः॥५३॥

॥ ॥इतिश्रीस्कंदपुराणेकृष्णामहात्म्येभीमकुंडवर्णनन्नामद्वादशोध्यायः॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥कथंचत्वारिनामानिदेवस्यैवास्यनारद॥
एतद्विस्तार्यनोब्रूहिसर्वज्ञोसिमतोभवान्॥१॥ ॥नारदउवाच॥ ॥यत्रांतेपावकाद्द्धु
ध्धममृतंयत्द्विजोत्तमाः॥स्थापितंतत्रतल्लिंगं दृष्ट्वानंदोह्यभूद्विधेः॥२॥तस्माद्ब्रह्मा-
मृतानंदःसोच्यतेसशिवःकृते॥कंटकाख्यरतस्त्वस्याह्यमरास्सह्वासवाः॥३॥रक्षितास्तं
निहत्याजौअमृतेशस्ततोभवत्॥लुप्तःकालवशाध्धर्मोद्वापरेतुद्विजोत्तमाः॥४॥उध्धृतो
यन्मुखाध्धर्मस्ततोधर्मेश्वरःशिवः॥तत्रपांडोःसुताविप्राद्वादशाब्दंमहाव्रतं॥५॥सर्वभद्रं
समापुश्चभद्रेशस्तेनसःशिवः॥तस्मिन्ब्रह्मामृतानंदेसर्वयज्ञफलप्रदे॥६॥येकुर्वंतिकृ
तंतेषांकल्पांतेपिनहीयते॥ ॥ऋषयऊ०॥ ॥कथंपांडोःसुतास्सर्वेधर्मशीलामहाबलाः
॥द्वादशाब्दंव्रतंचेरुस्तन्नःकथयनारद॥ ॥नारदउवाच॥ ॥निवृत्तेराजसूयेतुध-
र्मसूनोर्महात्मनः॥ उत्पातानिसमुत्तस्थुःत्रैलोक्यांतकराणिच॥तान्दृष्ट्वाकुमहोत्पा
तान्धर्मराजोयुधिष्ठिरः॥९॥भ्रातृंश्चैवसमानीयवेदव्यासमचिंतयत्॥तेनधर्मात्मना
ध्यातस्त्रिकालज्ञोमहामुनिः॥१०॥कृपयापरयोपेतःसमायातस्तदंतिकं॥तमर्चयि-
त्वाविधिवत्वेदव्यासंमहामुनिं॥११॥प्रणम्यपरयाभक्त्यापप्रच्छेदंयुधिष्ठिरः॥ ॥यु
धिष्ठिरउवाच॥ ॥दिव्यभौम्यंतरिक्षाणिह्यरिष्टान्यद्भुतानिच॥प्रादुर्भवंतिसततंक-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 स्माद्दृष्टेमहामुने॥ ॥व्यासउवाच॥ ॥पश्येमान्यद्भुतान्यासन्वत्सराष्ट्रेयुधि-
 ष्ठिर ॥१३॥तन्निमित्तंजगत्सर्वंनाशमेष्यत्यसंशयं॥एवमुक्तस्तुमुनिनाधर्मराजोयु-
धिष्ठिरः॥१४॥प्रत्युवाचपुनर्व्यासंकथंशांतिर्भविष्यति॥तमुवाचमुनिःसम्यक्सु-
र्वभूतभविष्यदृक्॥१५॥द्वादशाब्दव्रतंराजन्क्रोधलोभविवर्जितः॥चरिष्यसेत्वं
राजेंद्रततःशांतिर्भविष्यति॥१६॥एवमुक्तस्तुमुनिनाधर्मात्माज्ञानयोगिना॥दुरोदर
मिषंकृत्वाजगामतपसेवनं॥१७॥पृथिव्यांसागरांतानिसर्वतीर्थानियानितु॥स्नात्वा
न्भ्रातृभिःसार्धंकुंत्यामात्रासमन्वितः॥१८॥एवमेकादशनीताःसमाःसद्धर्मचारि
णा॥द्वादशायाब्देसमायातेकृष्णांविष्णुमर्यायियौ॥१९॥वत्सरंचवसद्राजासह्याद्रिशि
खरेशुभे॥कुंत्याकृष्णांसमासाद्यस्नात्वाविश्वेशसन्निधौ॥२०॥स्वनाम्नापरमंलिंगंस्था
पयामासमुक्तिदं॥व्रतदानादिकंकिंचिद्यदपूर्णंकृतंनृभिः॥२१॥तत्सर्वंपूर्णतामेतिकन्या
राशिस्थितेगुरौ॥वर्षंतत्रस्थितोराजायावत्कन्यागतेगुरौ॥२२॥द्वादशाब्दंव्रतंपूर्णंतत्लोभ-
द्रमवापसः॥युधिष्ठिरोमहाराजःसर्वपुण्यभृतांवरः॥२३॥तस्माद्धर्मेश्वरंतीर्थंसर्वसिद्धि
प्रदंनृणां॥यःपश्येत्तनरोभक्त्यातस्यपुण्यंनहीयते॥२४॥यःसोमश्रवणेस्नात्वाविष्णुकुंडे
मृतेश्वरे॥तत्क्षणात्सर्वपापेभ्योमुच्यतेनात्रसंशयः॥२५॥अमावास्यांगुरोर्वारेब्रह्मकुंडे- १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निमज्जयः॥ विलोकयति भद्रेशं सोमृतत्वाय कल्पते॥२६॥ अमासोमसमायोगे व्यतिपाते तथा
यने॥ रुद्रकुंडे नरः स्नात्वा तर्पयेत्पितृदेवताः॥२७॥ यः स्याति पदं विष्णोर्नात्र कार्या विचार-
णा॥ कन्याराशिस्थिते जीवे स्नात्वा भद्रेशसंनिधौ॥२८॥ मुंडनं चोपवासं च कृत्वा श्राद्धं क-
रोति यः॥ पितरस्तस्य तृप्यंति यावद्वर्षाणि विंशतिः॥२९॥ तस्मात्सर्वप्रयत्नेन कन्याराशिगते
गुरौ॥ कृष्णवेणीं समासाद्य प्रायश्चित्तं चरेत्सुधीः॥३०॥ सर्वपापविनिर्मुक्तो गतिं प्राप्नोति दुर्ल-
भां॥ पितरस्तस्य नंदंति यावदाभूतसंप्लवं॥३१॥ ॥ऋषय ऊ०॥ ॥किंचित्त्वां प्रष्टुमि-
च्छामः स्कंद सर्वज्ञ शांकर॥ वक्तव्यं हि कृपासिंधो कृष्णामाहात्म्यमुत्तमं॥३२॥ इदृशो म-
हिमा कस्मात्कन्याराशिगते गुरौ॥ सर्वं विस्तार्य नो ब्रूहि सेतिहासं पुरातनं॥३३॥ स्कंद उ०
॥शृणुध्वं मुनयः सर्वे इतिहासं पुरातनं॥ ब्रह्मनारदसंवादं पापघ्नं विस्मयावहं॥३४॥
दिवोदासे नृपे राज्यं प्रशासति यदा द्विजाः॥ ऋषयो देवताः सर्वे काशीं त्यक्त्वा यदागताः
॥३५॥ विश्वेशे मंदरं याते ऋषयश्च तपोधनाः॥ तीर्थयात्राप्रसंगेन दक्षिणां दिशमादरात्
॥३६॥ गोदावरीं समायाताः केचित्तत्रैव तस्थिरे॥ पर्यटंतः कृतीर्थानि गौतमाद्याश्च सु-
व्रताः॥३७॥ जनस्थाने स्थिता नित्यं तपः कर्तुं समुद्यताः॥ व्यासश्च याज्ञवल्क्यश्च मांड-
व्यः सुतपास्तथा॥३८॥ शौनको जैमिनिश्चैव मार्कंडेयोथ देवलः॥ पराशरो भरद्वाजो-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृ॰म वसिष्ठःकौशिकस्तथा॥३९॥कश्यपोजमदग्निश्चसहपुत्रश्चवीर्यवान्॥दत्तात्रेयोमहायो- अ॰
३२ गीकपिलोत्र्येचयोगिनः॥४०॥तीर्थानिचैवसोम्यानिपर्यटंतोथसह्यजां॥कृष्णावेणींसमा १३
लोक्यविश्रंभंप्रापुर्मुदा॥४१॥परस्परंभाषयंतोधन्येयंभोमुनीश्वराः॥कृष्णातीरंसमा
साद्यआश्रमांश्चक्रुरुद्यताः॥४२॥सह्याद्र्यंतिकमायाताःकृष्णांद्रष्टुंसमुत्सुकाः॥सर्वे
मिलित्वाऋषयोजाह्नवींस्तोतुमुद्यताः॥४३॥आगमिष्यतिचेद्गंगात्रैलोक्येमुक्तिदायि
नी॥तपसासाध्यतेसर्वंतपएवहिकारणं॥४४॥एकाग्रचित्ताअभवन्योगमार्गेणयोगि-
नः॥नारायणोदयावांश्चआगसमु नयोंतिकं॥४५॥वृणीध्वंमुनयोयूयंवरान्वैमनसेप्सिता
न्॥देवानामपियल्लोकेदुर्लभान्प्रददामिवः॥४६॥ ॥योगिनऊचुः॥ ॥भवच्चरणयुग्म
स्यदर्शनात्कृतकृत्यतां॥वयंप्राप्तास्तथापीशपरोपकृतयेगुरो॥४७॥प्रार्थयामोवरंकंचि
च्छेवधिःसर्वकर्मणां॥त्वत्पादांबुजसंभूताभित्वाब्रह्मांडमुद्गता॥४८॥ब्रह्मणोंतिकमासा
द्यततोराज्ञावतारिता॥सदाशिवजटोद्भूतागंगात्रिपथगामिनी॥४९॥स्वामिन्दयानिधेत्वंच
कृष्णवेणींतुपावनीं॥आनीतव्यात्वयादेवकारुण्यान्मदनुग्रहात्॥५०॥कन्यागतेदेवगुरौ
मूढान्संतारयिष्यति॥ ॥नारायणउवाच॥ ॥शृणुध्वंमुनयःसर्वेभवतांकांक्षितंमया॥
कर्तव्यंसर्वथानित्यंएकाग्रेणयुगेयुगे॥तदास्मृताजाह्नवीचत्रैलोक्यगुरुणांजसा॥५२॥स २

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मायातताविष्णुपदीहरेराज्ञाकरीतदा ॥ गुरौकन्यागतेयाभिर्ध्रुवश्यंवचसातव ॥ नियमश्च-
कृतोमान्नाद्यावद्दूरविधायवः ॥ तावद्यास्यामिभोस्वामिन्द्वादशाब्देषुसद्गुरो ॥ ५४ ॥ इतिश्रुत्वा
थमुनयोसंतोषंलेभिरेततः ॥ अंतर्धानंगतोदेवोजान्हवीयत्रसंस्थिता ॥ ५५ ॥ उत्तरस्यांदिशि
पश्चोवदनान्निर्गताभवत् ॥ प्रतितीर्थेषुगम्यत्वात्प्रकाशंतीषुपावनी ॥ ५६ ॥ यावत्सागरउच्च-
तंवीचीसंदोलिताभवत् ॥ व्यासादयस्तदा चक्रुराश्रमांस्तपसेतदा ॥ ५७ ॥ उभयोस्तटयोः
कृष्णवेण्यायाः पापशांतये ॥ तस्यांस्नानंजपोहोमः श्राद्धंपिंडप्रपालनं ॥ ५८ ॥ प्रसंगेनकृतं-
यश्चितदानंत्सा यकल्पते ॥ मुंडनंचोपवासंचहिरण्यश्राद्धमन्नये ॥ ५९ ॥ करिष्यंतिनराभक्त्या
पितृन्धारयंतिते ॥ कन्यागतेगुरौयस्तुतीर्थश्राद्धंकरोतिवै ॥ ६० ॥ पितरोद्वादशाब्देषुतृप्तिं
यांतिनचान्यथा ॥ आयुरारोग्यमैश्वर्यंपुत्रपौत्रादिसंततिः ॥ ६१ ॥ वर्धतेभगवत्साम्बदययास-
र्वदैवतु ॥ नकरोतिचयः श्राद्धंगुरौकन्यागतेयदि ॥ ६२ ॥ सजीवन्श्वपचोह्यंतेरौरवंप्राप्य
दुर्गमं ॥ यातनाश्चस्वयंभुक्त्वा भवतिब्रह्मराक्षसः ॥ ६३ ॥ वंशश्चक्षीयतेतस्यतीर्थश्राद्धं
विमुक्तिदं ॥ नकरोतियदामूढःपितरस्तस्यदुःखिताः ॥ ६४ ॥ तस्मात्कन्यागतेकार्यंतीर्थश्राद्धं-
प्रयत्नतः ॥ श्रुत्वायुधिष्ठिरोराजाधर्मपुत्रोमहायशाः ॥ ६५ ॥ संवत्सरंस्थितः श्राद्धमागमे-
निर्गमेतथा ॥ कुर्वन्तदा समापेदेराज्यंचापिसुदुर्लभं ॥ ६६ ॥ कन्यागतेगुरौविप्रैः स्नात्वा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भद्रेशसन्निधौ॥ योददातिद्विजोग्र्येभ्योवृत्तिमात्रांवसुंधरां॥ ६७॥ मध्यक्षेत्रांसकृष्णां
न्वयवगोधूमशालिनीं॥ सर्वपापविशुद्धात्मासर्वभोगसमन्वितः॥ ६८॥ तदंतेसागरांता-
यांराजाभवतिधार्मिकः॥ ज्ञानध्यानसमायुक्तः स्वदंतेशिवमाप्नुयात्॥ ६९॥ प्रीणंतिपित
रस्तस्यऋषयोपिसनातनाः॥ देवताश्चापितुष्टास्युः कृष्णायांश्राद्धपिंडतः॥ ७०॥ यः कृ-
ष्णावेणांमनुजाः प्रयांतिकन्यागतेदेवगुरौप्रयत्नात्॥ सचायुरारोग्यमहाविभूतिंसधर्मसि-
द्धिंलभतेमनुष्यः॥ ७१॥ भद्रेश्वरेपापहरेयस्तुप्राणान्परित्यजेत्॥ सर्वपापविशुद्धात्मामोद
तेदिविदैवतैः॥ ७२॥ प्राणप्रयाणपाथेयंसंसारव्याधिभेषजं॥ शरणंसर्वजंतूनांकृष्णाती
रंकलौद्विजाः॥ ७३॥ इतिभद्रेश्वरंतीर्थंसर्वतीर्थफलप्रदं॥ मयावः कथितंपुण्यंशृण्वतांया
तिपरंपदं॥ ७४॥ ॥ इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येभद्रेश्वरवर्णनन्नामत्रयोदशोऽ
ध्यायः॥ ॥ श्रीभद्रेश्वरार्पणमस्तु॥ ॥छ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउवाच॥ ततोदंडद्विसाहस्रेसह्यजादक्षिणेतटे॥ संग-
तापावनीगंगातत्रतीर्थंमहाफलं॥१॥तत्रस्नानंचदानंचतर्पणंश्राद्धमेवच॥ यःकरोति
नरोभक्त्यासर्वान्कामान्समश्नुते॥२॥ ततोदंडद्विसाहस्रेतीर्थानांतीर्थमुत्तमं॥तत्रोभ-
यतटंतीर्थंगोष्पदंनामधर्मदं॥३॥ ॥ऋषयऊचुः॥ ॥गोष्पदंनामतत्तीर्थंकथंजातं
मुनीश्वर॥ एतद्वेदितुमिच्छामस्तत्त्वंप्रब्रूहिनारद॥४॥ ॥नारदउवाच॥ ॥आसीत्स्वा-
यंभुवेकल्पेवासुकिर्नामसर्पराट्॥तस्यभार्यामहाभागानाम्नासत्यवतीसती॥५॥तस्याः
पुत्रशतंचासीत्सुरूपंचमहाबलं सुतपस्व्यादिनामाढ्यंदिव्यकुंडलभूषितं॥ ६॥दिव्य-
माल्यांबरधरंदिव्यकेयूरभूषितं॥तत्कुमारशतंनित्यंसेवतेहाटकेश्वरं॥७॥देवींदृष्ट्वा
कुमारास्तेकदाचित्स्नातुमागतां॥निमज्जंतींसरवीभीरुत्थांबभूवुर्हृच्छयाकुलाः॥८॥नंदीप्रो
वाचतान्दृष्ट्वावाचाधिःकारयद्रुषा॥ दृष्ट्वादेवींजगद्धात्रींरुद्रस्यसहधर्मिणीं॥९॥नागराज
सुताभूत्वाविरुद्धाचरणाःकथं॥हाधिक्वृत्तेनवःसर्वंनाशितंविशदंकुलं॥१०॥तद्वाक्याद
नुतप्तास्तेनंदिनंशरणंययुः॥तेषांदीनंवचःश्रुत्वानंदीप्रोवाचतान्प्रति॥११॥विद्यांब्रह्मप्र-
सादाद्वःपितादिव्याद्दयांकुलात्॥आनयिष्यतिशुध्यर्थंस्वर्णधारांसरस्वतीं॥१२॥दिवोलोका
द्ब्रह्मलोकंसह्यजागर्भतस्तलं॥एसब्रह्मरसापूर्णाजीविलंबःभदास्यति॥१३॥इत्युक्त्वानागपुत्रा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तेनंदिनाधर्मनंदिना॥मृतप्रायाबभूवुस्तेसर्वोनिःप्रभतांगताः॥१४॥तान्दृष्ट्वावासुकिः
पुत्रानश्रुपूर्णाकुलेक्षणः॥उवाचकिंकृतंपुत्रायेनाहंदुःखितोभृशं॥१५॥इत्युक्त्वाभृशसं
तप्तोहाटकेशंगतःसुधीः॥तुष्टावशंकरंभक्त्यामृत्युंजयमनामयं॥१६॥वासुकिरुवाच॰
॥ ॥नमस्तेस्तुमहादेवनमःपन्नगभूषण॥नमस्तेस्तुमहारुद्रमृत्युंजयनमोस्तुते॥१७॥न॰
मस्तेनीलकंठायनमस्तेभक्तवत्सल॥नमःपीयूषगौरायमृत्युंजयनमोस्तुते॥१८॥नमस्ते॰
शिवरूपायनमस्तेकृत्तिवाससे॥नमस्तेचंद्रशिरसेमृत्युंजयनमोस्तुते॥१९॥नमस्तेब्रह्म॰
रूपायनमस्तेशिवरूपिणे॥नमस्तेरुद्ररूपायमृत्युंजयनमोस्तुते॥२०॥इतिस्तोत्रंसमुच्चा
र्यप्रणम्यचपुनःपुनः॥त्रायस्वपार्वतीनाथदीनोद्धारनमोस्तुते॥२१॥इतिवासुकिनासो॰
मःसंस्तुतोहाटकेश्वरः॥प्रोवाचपरयाप्रीत्यावरंवरयसुव्रत॥२२॥इत्युक्तोवासुकिस्तेन
कृपापूर्णेनशंभुना॥प्रणम्यपरयाभक्त्याप्रोवाचेदंसदाशिवं॥२३॥शिक्षितानंदिवाक्येनमृ
तायेचस्वकर्मणा॥तेजीवंतुप्रसादात्तेमत्पुत्राःसकलाःप्रभो॥२४॥ज्ञानिनोबलिनःशांतादां
ता धर्मावलोकिनः॥त्वद्भक्ताःसूनृताःस्वर्ग्यास्त्वयःसंतुवराममः॥२५॥इतिप्रसादितस्ते॰
नभगवान्नीललोहितः॥विमृश्यपूर्वकर्माणिततोवासुकिमब्रवीत्॥२६॥गच्छत्वंब्रह्मस॰
दनंसमाराधयवेधसं॥गंधर्वपितृदेवाद्यैर्ऋषिभिःसंशितव्रतैः॥२७॥सेव्यमानंपयस्वि॰ १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्याघटोध्नीभिश्चधेनुभिः॥गावः कामदुघाः संतितत्रामृतपयस्विनीः॥२८॥गावश्चरंत्यकृष्
प्रस्थेसुवर्णस्यगिरेस्तुभे॥स्ववर्णवर्णिनीगावस्ताः सर्वाः कृष्णांसमानय॥२९॥पावनीसंगमा
त्पुण्यात्पूर्वेदंडसहस्रके॥ताःक्षरंत्यमृतांदिव्यांस्वर्णधारासरस्वती॥३०॥तामानयतलं·
शीघ्रंपुत्रान्संजीवयाधुना॥इत्युक्तेदेवराजेननागराजोविधेःसभां॥३१॥गत्वानिवेद्यतत्स
र्वंब्रह्मणेपूण्यकर्मणे॥प्रेषिताब्रह्मणासर्वागावोमृतमयाःशुभाः॥३२॥समानीयचकृष्णां
ताःसमाराधयदीश्वरं॥यत्रतद्गोष्पदंतीर्थंनाम्नासर्वोत्तमंस्मृतं॥३३॥तत्रोभयजटंतीर्थं
मृतसंजीवनंपरं॥यत्रासौनागराजेनस्ववर्णे शःप्रपूजितः॥३४॥तत्तुतीर्थंमहापुण्यंजरा
मृत्युनिकृंतनं॥नागराजेनया नीता गावःकृष्णांत्रिविष्टपात्॥३५॥ताःक्षरंत्यमृतंदिव्यंकृ
ष्णातीरेह्यहर्निशं॥रसातलगतेनास्यकुमारास्तेनजीविताः॥३६॥महाकायामहासत्वाप्र
ज्ञावंतोमहाबलाः॥दांताश्चशुचयोऽलुब्धाधर्मनिष्ठाजितेंद्रियाः॥३७॥समुत्तस्थुस्ततोना
गामहाभागामहौजसः॥प्रहर्षमतुलंप्रापतेषांमातातथापिता॥३८॥इत्थंमहोत्सवेवृत्तेनाग
राजालयेशुभे॥तुष्टुवुर्नागगंधर्वाःकृष्णांनागपतेस्तनुं॥३९॥च्यवनाश्रमतःपश्चात्च्यवनाश्र-
मपूर्वतः॥गोष्पदंपरमंतीर्थंत्रिषुलोकेषुविश्रुतं॥४०॥कार्त्तिक्यांकृत्तिकायोगेवैशाख्यां-
चविशाखके॥ज्योतिरूपस्सतेलिंगान्महाराज्ञोद्विजोत्तमाः॥४१॥इष्टापूर्त्तंकृतंयैःकृपयेःकृ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तंद्विजतर्पणं॥विंशतिस्वर्णधारायांधन्यैरेवावलोक्यते॥४२॥हिरण्येनतुयःश्राद्धंकुरु
तेगोष्पदेनरः॥पितॄंस्तस्योपतिष्ठेत्तत्क्षीरंसर्पिर्मधूदकं॥४३॥कार्त्तिक्यांगोष्पदेतीर्थेगोदा
नंयःप्रयच्छति॥तस्यवंशोद्विजश्रेष्ठगोकुलंपुष्कलंभवेत्॥४४॥गवादिकंचयोदद्यात्तीर्थश्रेष्ठे
तुगोष्पदे॥गोहत्यादिकृतंपापंतत्क्षणादेवनश्यति॥४५॥दीपोत्सवंतुकार्त्तिक्यांस्ववर्णेशं
करोतियः॥आसप्तमकुलेतस्यदारिद्र्यंनैवजायते॥४६॥भगवद्भ्यस्तपस्विभ्यःशर्करा
घृतपायसं॥गोष्पदेयःप्रयच्छेत्सब्रह्मलोकंसगच्छति॥४७॥यत्किंचिद्गोखुरेदत्तंयद्धुतंच
कृतोजपः॥कार्त्तिक्यांकृत्तिकायोगेतत्सर्वंचाक्षयंभवेत्॥४८॥इत्येतत्कथितंविप्रागोष्प-
दंतीर्थमुत्तमं॥यःशृणोतिनरोभक्त्यासपुण्यांलभतेगतिं॥४९॥इतिश्रीस्कंदपुराणेकृष्णा
माहात्म्येगोष्पदतीर्थवर्णनन्नामचतुर्दशोऽध्यायः॥ ॥श्रीपार्वतीपरमेश्वरार्पणं॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥श्रीनारदउवाच॥ ॥अतःपरंप्रवक्ष्यामितीर्थंपापप्रणा-
शनं॥सहस्रधनुषांविप्राश्चंद्रिकासंगमोमहान्॥१॥अत्रैवोदाहरंतीममितिहासंपुरा-
तनं॥शापविघ्नक्षयकरंशृणुध्वंमुनिपुंगवाः॥२॥कैलासमारुरुक्षंतमेकदंतंसमूष-
कं॥जहासप्रसभंचंद्रःपश्यतांवैदिवौकसां॥३॥ततोगणपतिःक्रुद्धश्चंद्रमाहरुषा-
न्वितः॥स्खलितेहसितंमूढसतांनैवोपयुज्यते॥४॥शुक्लपक्षचतुर्थ्यांतुयस्त्वांपश्यति
चंद्रमः॥मिथ्याभिशापसंयुक्तःसोस्तुमद्वचनाद्विधो॥५॥इतिशप्तंचंद्रमसंश्रुत्वासच-
तुराननः॥चंद्रांतिकमुपागत्याब्रवीत्किंतेकृतंविधो॥६॥वृथैवहसितंदेवंतंप्रसादयविघ्न-
पं॥मयासहसमागत्यनोचेच्छांतिःकथंभवेत्॥७॥ततश्चंद्रेणसहितोब्रह्माकैलासमागम-
त्॥गणाध्यक्षंप्रणम्याशुतमीडेविश्वशांतये॥८॥ ॥ब्रम्हाउवाच॥ ॥यंब्रह्मवेदांतवि-
दोवदंतिपरंप्रधानंपुरुषंतथान्ये॥विश्वोद्गतेःकारणमीश्वरंवातस्मैनमोविघ्नविनाशनाय
॥९॥नमोनमःकारणकारणायनमोनमोमंगलमंगलात्मने॥नमोनमोब्रह्मविदांमनीषिणा
मुपासनीयायनमोनमस्ते॥१०॥इतिस्तुतोविघ्ननाशोब्रम्हणाविश्वयोनिना॥प्रोवाचपरया
प्रीत्यास्तुत्यासंतुष्टमानसः॥११॥ ॥गजाननउवाच॥ ॥नमयोक्तंवचोमिथ्याचंद्रंप्रति
कदाचन॥वृथोपहसितंतेनस्वामिन्किंकरवाणिभो॥१२॥ ॥ब्रह्मउवाच॥ ॥दृष्टमात्रो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ॰म॰ भिशापोयंभवितेतिसचंद्रमाः ॥ शप्तस्त्वयेतितद्वाक्यंक्षमस्वकरुणानिधे ॥ १३ ॥ इत्युक्ते अ॰
३६ ब्रह्मणाक्षांत्वागणेशः पुनरब्रवीत् ॥ चतुर्थ्यांभाद्रशुक्लायांयस्तुवन्मांसमर्चयेत् ॥ १४ ॥ ना १५
भिशापोभवेत्तस्यचंद्रंनेक्षेततद्दिने ॥ तथेत्युक्त्वागतश्चंद्रंप्रोवाचेदंसुनिश्चितं ॥ १५ ॥ शुध्य
र्थंयाहिचंद्रत्वंकृष्णागंगोत्तरतटे ॥ तत्रतप्त्वातपस्तीव्रंशापान्मुक्तोभविष्यसि ॥ १६ ॥ ओंमि
त्युक्त्वाततश्चंद्रः प्रणम्यचतुराननं ॥ नत्वागणाधिपंशीघ्रंजगामतपसेवनं ॥ १७ ॥ सह्याद्रिशि
खरेरम्येयावद्वर्षाणिषोडश ॥ जपन्पंचाक्षरींविद्यांनित्यंसिद्धेशसन्निधौ ॥ १८ ॥ तस्यप्रसन्नो
भगवान्सिद्धेशोनीललोहितः ॥ मृगांकंस्थापयांचक्रेपद्महस्तेनशंकरः ॥ १९ ॥ मिथ्याभिशापा-
न्मुक्तोसौचंद्रः सर्वकलानिधिः ॥ तस्मात्स्थानात्संप्रवृत्ताचंद्रिकाख्यामहानदी ॥ २० ॥ सर्वपा
पहरापुण्यासंगताकृष्णागंगया ॥ सिद्धेशायांतिमध्यान्हेस्नानार्थंमोक्षकामुकाः ॥ २१ ॥ चंद्रिका
संगमेपुण्येस्नानंदानंकरोतियः ॥ सहिरण्यंद्विजश्रेष्ठाअमृतत्वंसगच्छति ॥ २२ ॥ चंद्रिकासंग-
मेसोमश्रवणेयोऽर्चयेत्पितॄन् ॥ सक्तुभिर्निर्वपेत्पिंडांस्तारयेत्सप्तसप्तकं ॥ २३ ॥ इत्येतत्कथि-
तंविप्राश्चंद्रिकातीर्थमुत्तमं ॥ यःशृणोतिनरोभक्त्यासपुण्यांलभतेगतिं ॥ २४ ॥ इतिस्कांदेकृ
ष्णामाहात्म्येचंद्रिकातीर्थवर्णनंनामपंचदशोऽध्यायः ॥ ॥ छ ॥ ॥ छ ॥

१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउवाच॥ ॥ततोऽन्यत्संप्रवक्ष्यामिसह्यजासंगमोम-
हान्॥ त्रिसहस्रंतुधनुषांनिर्जनामामसानदी॥१॥निर्जनानामशबरीसह्यजादक्षिणेत
टे॥ तपश्चचारतन्वंगीदुश्चरंबहुलाःसमाः॥२॥ तस्याःप्रसन्नोभगवान्देवदेवस्त्रिलोच
नः॥स्वयमेवमहादेवस्तापसीमिदमब्रवीत्॥३॥वरंवरयकल्याणिदेवानामपिदुर्लभं॥
इत्युक्तादेवदेवेनसातंप्रोवाचतापसी॥४॥देवदेवमहादेवप्रणतार्तिविनाशन॥आश्र-
मेमेमहाभागखदिरीयज्ञसाधना॥५॥अस्यामूलादहंशंभोद्रवीभूतात्वदग्रतः॥तत्कुरु
ष्वमहाभागविशेयंवैष्णवींतनुं॥६॥इतिविज्ञापितंतस्याःश्रुत्वादेवोमहेश्वरः॥तथेति
सरितंचक्रेदृष्टिपातान्महेश्वरः॥७॥शबरीखदिरीमूलप्रसृताऽमृतरूपिणी॥निर्जने
तिसमाख्यातासंगताकृष्णगंगया॥८॥दक्षिणेसह्यजातीरेनिर्जनासंगमेद्विजाः॥यः
करोतिनरःश्राद्धंपितरस्तस्यसोमपाः॥९॥कन्यागतेसुरगुरौयःश्राद्धजलदोभवेत्॥प्रीणं-
तिपितरस्तस्ययावत्कन्यागतोगुरुः॥१०॥यःसोमश्रवणेस्नायात्खदिरीसंगमेनरः॥आस
प्तमेकुलेतस्यनकश्चिद्याचकोभवेत्॥११॥ततोदंडसहस्रेतुसह्यजादक्षिणेतटे॥गणेशप्र-
वरंतीर्थंसर्वविघ्नविनाशनं॥१२॥यत्रतप्तंतपस्तीव्रंगणेशेनस्वयंचिरं॥अथानंतसर्वसिद्धी-
नामीश्वरत्वंवरप्रदं॥१३॥तस्मिंस्तीर्थेमहापुण्येसर्वसिद्धिप्रदेनृणां॥प्रातःशुक्लतिलैःस्ना-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

त्वागणेशंयः समर्चयेत् ॥१४॥ अविघ्नंजायतेतस्यसर्वकार्येषुसर्वदा ॥ माघशुक्लचतुर्थ्यां
यः प्रातः स्नात्वागणेश्वरं॥ १५॥ अर्चयेत्कुलपत्रैश्चदूर्वामिश्रैश्चतंडुलैः ॥ षडक्षरेणमंत्रे
णसिद्धिःसंवत्सराद्भवेत् ॥१६॥ मोदकैः पूरयेत्पात्रंसहस्रेणशतेनच॥ चतुर्थ्यामुपवासीय
स्तस्याभीष्टंभवेत्ध्रुवं ॥१७॥ माघशुक्लचतुर्थ्यांयउपवासीतुमोदकान् ॥ अष्टोत्तरशतं
हुत्वासर्वान्कामान्समश्नुते ॥१८॥ तस्मात्तीर्थोत्तमेस्नानंसदाकार्यंशुभेच्छुभिः॥ कार्यारंभेषु
सर्वेषुसर्वसिद्धिप्रदंनृणां ॥१९॥ यः प्रयातिनरोभक्त्यागणेशंतीर्थमुत्तमं॥ निर्विघ्नेनभवेत्त
स्यसिद्धिःसर्वक्रियादिषु ॥२०॥ क्रोशमात्रंततोविप्राः कोटितीर्थमनुत्तमं॥ यस्यसंस्म
रणादेवसर्वपापैःप्रमुच्यते ॥ २१॥ ॥ऋषयऊचुः॥ ॥कथंकोटीश्वरंतीर्थंकिंपुण्यंके
नहेतुना ॥ पुराणेप्रोच्यतेसद्भिस्तन्नस्त्वंब्रूहिनारद ॥२२॥ ॥नारदउवाच॥ ॥भार्ग
वान्वयसंभूतोरामोनाममहायशाः॥ भर्गशिष्योमहातेजाब्रह्मचारिव्रतेस्थितः॥ २३॥ यस्य
शौर्येणसंजाताएकवीरावसुंधरा॥ कार्तवीर्यमिषंकृत्वापित्रोर्दुःखेनरोषतः॥ २४॥ त्रिःस
प्तकृत्वस्त्ववधीत्क्षत्रजातंदुरासदं॥ निर्जितासकलापृथ्वीसशैलवनकानना॥ २५॥ कश्य
पायार्पयामासयज्ञांतेसुमहायशाः॥ दत्तेसर्वस्वदानेपिकृतेधर्मेह्यदांभिके॥ २६॥ तथापिननि
र्वृत्तिःस्यान्मनसः क्षत्रघातकात् ॥ क्षत्रहत्याभिभूतः सन्रेणुकेयोमहातपाः॥ २७॥ पप्रच्छ

CC-0. Digitized by eGangotri and MIDF- Delhi

मुनिशार्दूलमगस्त्यंजपतांवरं ॥ किंमुनेममनाद्यापिनिवृत्तिः परमाहृदि ॥ २८ ॥ कृतेमहति
धर्मेपिव्रतेषुचरितेष्वपि ॥ तद्ब्रूहिमुनिशार्दूलपुण्यक्षेत्रंतपोवनं ॥ २९ ॥ यत्रतप्त्वातपस्ती
व्रंशुद्धसत्वोभवाम्यहं ॥ इत्युक्तः समुनिस्तेनजामदग्न्येनधीमता ॥ ३० ॥ विमृश्यपरयाबुध्या
रामंप्रोवाचचोत्तरं ॥ सह्याद्रिशिखरोत्पन्नाश्रीशैलोत्संगगामिनी ॥ ३१ ॥ वैकुंठस्यतनुः सा
क्षाद्याहिकृष्णांनिवृत्तये ॥ स्विष्टेषुपूर्तेषुकृतेषुसम्यग्ज्ञानेनयत्पुण्यफलंप्रदिष्टं ॥ नालंविमु-
क्तौसजलंहिपुंसांयत्कृष्णगंगांबुनिषेवणात्स्यात् ॥ ३२ ॥ गच्छकृष्णांततोरामक्षत्रहत्यापनु-
त्तये ॥ कुरुतत्रमहापुण्यंकर्त्तव्यंस्तमहत्तपः ॥ ३३ ॥ ददस्वसर्वदानानिचान्नदानंद्विजातिषु ॥ इ-
त्याकर्ण्यमुनेर्वाक्यंजामदग्न्यः प्रतापवान् ॥ ३४ ॥ जगामपरयाभक्त्याब्राह्मणैः सहसह्यजां ॥
अगस्त्येनसमेतस्तुनागतीर्थंयतोमहत् ॥ ३५ ॥ यत्रतप्त्वातपस्तीव्रंकालिकोनामसर्प्पराट् ॥
विमुक्तोहिविधेः शापान्नागतीर्थंतदुच्यते ॥ ३६ ॥ गौतमस्याश्रमेपुण्येगौतमेश्वरसन्निधौ ॥
अगस्त्योमुनिशार्दूलस्तत्रतेपेमहत्तपः ॥ ३७ ॥ तत्रागस्त्येश्वरोदेवोह्यगस्त्येनसुपूजितः ॥
तत्रस्नात्वारेणुकेयः संतर्प्यपितृदेवताः ॥ ३८ ॥ तपश्चचारविपुलंसह्यजादक्षिणेतटे ॥ निरा
हारोजितश्वासोनित्यंत्रिषवणाप्लुतः ॥ ३९ ॥ शतरुद्रेणमंत्रेणप्रणवाद्यंतकेनच ॥ अगस्त्ये-
नोपदिष्टेनसमाराधयदीश्वरं ॥ ४० ॥ कोटिक्षत्रवधात्पापान्मुक्तोसौसह्यजातटे ॥ तावच्चचा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रस्कमहत्तपस्तीव्रंशरक्तं॥४१॥तस्यप्रसन्नोभगवानंतरिक्षादुमापतिः॥उवाचपरमप्री-
त्यामुक्तस्त्वंक्षत्रपालनात्॥४२॥ ॥शंकरउवाच॥ ॥कोटिक्षत्रवधाज्जातंयत्सा
पंतुदुरत्ययं॥तत्सर्वंभस्मसाल्लीनंचिरंकृष्णांबुसेवनात्॥४३॥किमन्यदिष्टंसेवत्सयद
भीष्टंवृणुष्वमे॥इत्युक्तोदेवदेवेनजामदग्न्योमहायशाः॥४४॥प्रणम्यदेवमीशानंप्रोवाचेदं
स्मविस्मितः॥ ॥रामउवाच॥ ॥अहोकृपानिधेरुद्रकिमभीष्टमतःपरं॥४५॥यदहं
कोटिहत्यायामोचितस्त्वत्प्रसादतः॥यदिप्रसन्नोभगवान्भवानीवल्लभोमम॥४६॥कोटि-
तीर्थमिदंभूयात्त्वंचकोटिश्वरोभव॥अस्मिन्तीर्थेमहापुण्येसह्यजादक्षिणेतटे॥४७॥तिष्ठ
नित्यंमहादेवयावदाभूतसंप्लवं॥इतिप्रसादितोदेवोजामदग्न्येनधीमता॥४८॥अगस्त्येश
समीपेवैकृष्णायांन्यवसच्चिरं॥ततस्तस्मिन्महापुण्येकोटितीर्थेमहायशाः॥४९॥रामश्च
कारधर्मात्माभूमिदानंमहाफलं॥कोटितीर्थेमहापुण्येसह्यजादक्षिणेतटे॥५०॥उपोष्यरज
नीमेकांगांचदद्यात्पयस्विनीं॥विप्रायवेदविदुषेगोसहस्रफलंलभेत्॥५१॥माघकृष्णाच
तुर्दश्यांस्नात्वाकोटीश्वरंशिवं॥घृतेनस्नापयेद्धरकसुगंधेनानुलेपयेत्॥५२॥अर्चये-
द्बिल्वपत्रैस्तुसरुद्रस्यालयंव्रजेत्॥माघेतुशुक्लपंचम्यांस्नात्वानागह्रदेऽर्चयेत्॥५३॥नागे
शंशतपत्रैश्चकुंकुमेनानुलेपयेत्॥क्षीरापूपैस्तुनैवेद्यंसस्तुस्त्रीजायतेनरः॥५४॥व्यतीपाता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केसंयोगेगौतमेशंसमर्चयेत् ॥ यस्तिलैर्बिल्वपत्रैर्वारुद्रलोकंसगच्छति ॥५५॥ यःसोम-
श्रवणेस्नात्वातर्प्पयेत्पितृदेवताः ॥ कोटीशमर्चयेद्भक्त्यासर्वपापैः प्रमुच्यते ॥५६॥ ब्र-
ह्मचर्येणयस्तिष्ठेद्यावत्कन्यागतोगुरुः ॥ सर्वपापविशुद्धात्मारुद्रलोकंसगच्छति ॥५७
कृच्छ्रैस्तुवत्सरंविप्रा यःक्षिपेद्ग्रामसन्निधौ ॥ निर्द्धूतकल्मषोभूत्वासगच्छेद्वैष्णवंपदं ॥-
५८॥ इतिकोटीश्वरंतीर्थंसर्वपापप्रणाशनं ॥ मयावःकथितंविप्राः श्रवणात्सर्वकामदं ॥
५९॥ ॥ इतिश्रीस्कांदेकृष्णामाहात्म्येकोटितीर्थवर्णनंनामषोडशोऽध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥ततःपरंमहातीर्थंकृष्णाद्वैपेद्विजोत्तमाः
॥द्विगुणेद्वेसहस्रेतुधनुषांशकुनंमहत्॥१॥पुरारथंतरेकल्पेनिचूलस्वामिनंप्रति॥
आजगाममहावर्ष्मापक्षीभूत्वासुरेश्वरः॥२॥जिज्ञासुस्तमृषिंश्रेष्ठवदान्यंसत्यवादिनं
॥तपस्विनंमहाभागंनरमांसमयाचत॥३॥तंदृष्ट्वाप्रहसन्विप्रःप्रोवाचेदंसुविस्मितः
॥गृध्रत्वेनरमांसेनस्वयंत्वंकिंनपश्यसि॥४॥अनेनाकिंवितर्केणदेयंयद्याचितंत्वया॥
इतिश्रुत्वानिजान्पुत्रानाहूयेदंवचोब्रवीत्॥५॥ ॥निचूलउवाच॥ ॥पुण्यभाजो
नृणांयूयंतन्ममाश्रमभागतः॥विप्रसुरवोनातिथिर्यातुतत्स्वमांसानियच्छत॥६॥इत्युक्त
वंतंपितरंप्रोचुःपुत्राःपरंवचः॥यदिदंभगवन्सारंयदिदंधर्मसाधनं॥७॥स्वर्गमोक्षायय
त्पात्रंतथातद्दीयतेकथं॥इतितेषांसमेतानामाकर्ण्यपरमंवचः॥८॥शशापसमुनिःक्रोध
त्तान्कलेवरलोलुपान्॥पक्षित्वंयातमेवाक्यमकुर्वाणाःसुखप्रदं॥९॥ममाशुश्रूषणात्स
द्यःस्मृतिंनैवोपलप्स्यथ॥इत्युक्त्वातानतिथयेस्वमांसंदातुमुद्यतः॥१०॥ससत्वोमुनिशा
र्दूलस्तमिंद्रोप्यब्रवीदिदं॥जिज्ञासुरहमिंद्रस्तेसत्यंसत्ववतांवर॥११॥आगतःपक्षिरूपेण
मात्सुयाःसाहसंमुने॥इत्याकर्ण्यप्रियंवाक्यंदृष्ट्वापुत्रांस्तथाविधान्॥१२॥शशापतमपिक्रो
धाच्छकुनित्वंशरच्छतं॥भूत्वाऽगस्त्यंसमासाद्यविमुक्तःस्वर्गमेष्यसि॥१३॥इत्युक्तःश-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ॰म कुनीभूत्वाविचचारसदेवराट्॥चरताकर्हिचित्तेनदृष्टोऽगस्त्योमहामुनिः॥१४॥शकुनि अ॰
४० रूपंप्रणम्याहपश्यमेचेष्टितंमुने॥कदेवराजत्वमकुंठसत्वंककीदभक्ष्यंद्विशकुंतवर्ष्मं॥१५ १७॰
॥इत्थंहिरूपाणिविकुर्वतांसतांभवंतिसंतोनहिकोपनिष्ठुराः॥निचुलस्वामिनःकोपान्मुंच-
मांत्वंमहामुने॥१६॥शकुनिस्त्वंमहाघोरंकुंभयोनेनिवारय॥इतिविज्ञापितोगस्त्यःशकुंते-
नद्विजोत्तमाः॥१७॥विचार्यतमुवाचेदंयाहिकृष्णांशतक्रतो॥तत्रतीव्रंतपस्तप्त्वाविपाप
स्त्वंभविष्यसि॥१८॥इत्युक्तोमुनिनाशक्रोह्यगस्त्येनमहात्मना॥जगामसह्यजातीरमुत्त
रंसर्वपापहं॥१९॥तत्रतप्त्वातपस्तीव्रंव्रतस्थःशकुनिःस्वयं॥कृष्णाद्वीपंसमासाद्यध्या-
नयोगपरायणः॥२०॥तस्यप्रसन्नोभगवान्शिवःकृष्णांबुसेवनात्॥उवाचपरयाप्रीत्या
ब्रूहिशक्रतवेप्सितं॥२१॥शकुनिस्तंप्रणम्येशंप्रोवाचमुदनिर्भरः॥यदिप्रसन्नोभगवा-
न्मन्नाम्नातीर्थमुत्तमं॥२२॥भूयात्त्वंचमहादेवद्वीपेतिष्ठस्वपुण्यदे॥तथेत्युक्त्वामहादेवः
कृष्णाद्वीपेस्वपुण्यदे॥२३॥शकुनीशत्वमापन्नोयावदाभूतसंप्लवं॥तस्माच्छकुनकंतीर्थंप्र
वदंतिमनीषिणः॥२४॥यस्यसंस्पर्शनादेवसर्वपापैःप्रमुच्यते॥माधवस्यासितपक्षेचतु-
र्दश्यामुपोषितः॥२५॥स्नापयेच्छकुनेशंतुघृतप्रस्थेनसत्तमः॥चंदनेनसुगंधेनकुंकुमे-
नापिचार्चयेत्॥२६॥तंडुलैःशतपत्रैश्चबिल्वपत्रैर्विशेषतः॥अर्चयित्वामहेशानंगुग्गु- १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लुंसघृतंदहेत् ॥ २७ ॥ प्रातःस्नात्वात्वमावास्यांब्राम्हणान्भोजयेत्तुयः ॥ सयातिरुद्रसालो
क्यंयावदाभूलसंप्लुवं ॥ २८ ॥ यःसोमश्रवणेस्नात्वाशकुनेशंसमर्चयेत् ॥ ब्राम्हणान्भोज
येद्यस्तुक्तसर्वपापैःप्रमुच्यते ॥ २९ ॥ भक्त्यायःशकुनंतीर्थंशृणोतिश्रावयेदपि ॥ सर्व-
पापविनिर्मुक्तःपदंगच्छत्यनामयं ॥ ३० ॥ ॥ इतिश्रीस्कंदपुराणेहृव्यामहात्म्ये
शंकुलेशतीर्थवर्णनंनामसप्तदशोऽध्यायः ॥ ॥ शकुंलेशार्पणमस्तु ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति सप्तदशोऽध्याय समाप्तः ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥अतःपरंमहातीर्थंत्रिषुलोकेषुविश्रुतं॥ देवर्षिपितृभिर्जुष्टंदर्शनात्सर्वपापहं॥१॥संयोगःकृष्णावेण्योर्योयोजनांतेद्विजोत्तमाः॥येनेयंकृष्णवेणेतित्रिषुलोकेषुगीयते॥२॥कृष्णाचयाजगद्धात्रैब्रह्मणानिर्मितापुरा॥वेणाप्राक्कृष्णयायुक्तामहर्तीरव्यातिमापसा॥३॥तत्प्रयागसमंतीर्थंभुक्तिमुक्तिफलप्रदं॥ महापापक्षयकरंकलौकन्यागतेगुरौ॥४॥यत्रसप्तर्षयःसिद्धायत्रदेवामहाव्रताः॥पितरोयत्रतृप्तास्युस्तत्तीर्थंभुविविश्रुतं॥५॥ ॥ऋषयऊचुः॥ ॥स्वामिन्सर्वज्ञत्वेस्कंदपृच्छामोविविधाःकथाः॥याःश्रुत्वामनुजोलोकेगतिंयास्यतिसद्गुरो॥६॥कृष्णाविष्णुतनुःसाक्षाद्वेणादेवोमहेश्वरः॥उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः॥७॥एतद्विस्तार्यनोब्रूहिसर्वज्ञोऽसिमहामते॥कोमुक्तःसंगमेह्यस्मिन्दुर्धरादघसंगतः॥८॥स्कंदउवाच॥ ॥शृणुध्वंमुनयःसर्वेकथांपौराणिकींशुभां॥नंदिग्रामेपुराकश्चिद्देवशर्मेतिविश्रुतः॥९॥विद्यावान्धनसंपन्नोज्ञानीचबहुबांधवः॥तस्याभवन्महापुत्रोयज्ञशर्मेतिविश्रुतः॥१०॥ब्रह्मद्रोहकरोनित्यंकृतघ्नःकामुकोऽबुधः॥नित्यंद्यूतक्रियासक्तःपरस्त्रीलंपटःसदा॥११॥सुहृद्भिर्बोधितोनित्यंसाधुभिःपुण्यगौरवात्॥नैवाकरोत्सतद्वाक्यंदुर्वृत्तःपापनिष्ठुरः॥१२॥एवंसमगमत्कालोदुर्वृत्तस्यसुदु-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मेतेः॥ कदाचिद्दैवयोगेनवसिष्ठंसददर्शह॥१३॥ वसिष्ठोपिचतंज्ञात्वाअसकृत्तंविनि-
घ्नच॥ किमिदंकुरुषेमूढद्विजत्वंनाशितंकुले॥१४॥ सर्वेषांप्राणिनांमध्येमानुष्यमति
दुर्लभं॥ ततोपिदुर्लभंजन्मब्राम्हणानांसतांकुले॥१५॥ क्षणशः सुखमायातिकामलु
ब्धेनचेतसा॥ आकल्पंरौरवंयातिदुर्वृत्तादेनसोद्विज॥१६॥ एवंज्ञात्वाऽनिशंधीमान्पु-
ण्यंकर्मसमारभेत्॥ अनिरस्यकृतंकर्मप्रायश्चित्तादिनाद्विज॥१७॥ श्वपचत्वंसमाया
तिब्रम्हराक्षसजन्मच॥ वसिष्ठस्यतदावाक्यंश्रुत्वाप्रोवाचमंदधीः॥१८॥ ॥यज्ञश-
र्म्मोवाच॥ ॥त्राहिमांकृपयास्वामिन्निरयाद्दुःसहाद्गुरो॥ कस्मात्तानरकेमग्नंशरणाग
तवत्सल॥१९॥ नकेनापीदृशंवाक्यंभाषितंमुनिसत्तम॥ ॥वसिष्ठउवाच॥ ॥सा-
धुसाधुमहाप्राज्ञशृणुष्वावहितोभव॥२०॥ गच्छतीर्थंसदारम्यंत्रैलोक्येतुसुपुण्यदं॥-
कृष्णावेणीसंगमेतुस्नाहिमाघेविरक्तधीः॥२१॥ तेनपुण्येनमहतागतिंप्राप्स्यसिशा-
श्वतीं॥ एवंश्रुत्वावसिष्ठस्यवाक्यंपीयूषसन्निभं॥२२॥ संगमेकृष्णावेण्योस्तयज्ञशर्म्मा
गतस्तदा॥ ददर्शकृष्णवेणांतांप्रणम्यपरयामुदा॥२३॥ स्नात्वादत्वाचहुत्वाचसंगमे-
शंप्रपूज्यच॥ किंचित्कालंतत्रवसन्तपः सकृतवान्द्विजः॥२४॥ विमानमाकाशगतं-
विलोक्यकिमेतदित्येवविचिंत्यचेतसा॥ श्रीविष्णुभक्तावपिदेवरूपिणौचतुर्भुजौहेम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिशंगवाससौ ॥ २५ ॥ आगम्य सहसा तौ तं निन्युर्देवसन्निधौ ॥ किंकिणीजालसंयुक्ते-
विमाने तं निधाय च ॥ २६ ॥ वैकुंठभवनं प्राप्तः कृष्णावेण्याः प्रसादतः ॥ तस्मात्प्रयागतुल्यं-
तत्तीर्थं मुक्त्यैकसाधनं ॥ २७ ॥ यत्र सप्तर्षयः सिद्धा यत्र देवा महाबलाः ॥ पितरो यत्र तृप्ता-
स्युस्तत्तीर्थं भुवि विश्रुतं ॥ २८ ॥ तस्मात्सर्वप्रयत्नेन कृष्णावेणीसमागमः ॥ सेव्यते सततं
सद्भिः स्वर्गमोक्षार्थसाधनः ॥ २९ ॥ सर्वपापक्षयकरं सर्वसिद्धिकरं नृणां ॥ अमासोमसमा
योगे कृष्णावेण्योस्तु संगमे ॥ ३० ॥ सवत्सां कपिलां दत्वा गोसहस्रफलं लभेत् ॥ यः सोमश्र-
वणे स्नात्वा संगमेशं समर्चयेत् ॥ ३१ ॥ महाफले कादशभिस्तस्य वंशो न हीयते ॥ संगमे कृ-
ष्णावेणाया राहुग्रस्ते दिवाकरे ॥ ३२ ॥ यो ददाति द्विजाग्रेभ्यो वृत्तिमात्रां वसुंधरां ॥ मध्यक्षे
त्रां सुकृष्णां च यवगोधूमशालिनीं ॥ ३३ ॥ सर्वपापविशुद्धात्मा सर्वभोगसमन्वितः ॥ तदं
ते सागरांताया राजा भवति धार्मिकः ॥ ३४ ॥ ज्ञानध्यानसमायुक्तस्तदंते शिवमश्नुते ॥ इ-
त्येषः कथितो विप्राः कृष्णावेणीसमागमः ॥ ३५ ॥ सर्वपापक्षयकरः श्रवणात्सर्वसिद्धिदः ॥
॥ ॥ इति श्रीस्कंदपुराणे कृष्णामहात्म्ये कृष्णावेणासमागमो नामाष्टादशोऽध्या-
यः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इति अष्टादशोऽध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥चंद्रचूडात्मजस्कंदब्रूहिरम्यांकथांच-
नः॥नतृप्तिमधिगच्छामोयथापीयूषपानतः॥१॥ ॥स्कंदउवाच॥ ॥अतःपरंप्रवक्ष्या
मिकथांत्रैलोक्यपावनीं॥शृणुध्वमेकमनसोवित्तानस्यतरंगिणीं॥२॥मध्यदेशेद्विजः
कश्चिद्वेदवेदांगपारगः॥धनीचबहुपुत्रश्चब्रह्मज्ञश्चातिथिप्रियः॥३॥श्रुत्वाकीर्तिं
सुविपुलामौदार्यंपाकशासनः॥विहगरूपमास्थायमुनेराश्रममागमत्॥४॥नृवाचातं
वदत्पक्षीआतिथ्यंमेविधीयतां॥मह्यंनराभिषंशीघ्रंदीयतांद्विजसत्तम॥५॥तद्वाक्यंस
हसाश्रुत्वापुत्रान्प्रोवाचसस्मितः॥हेपुत्राःपश्यतचिरमतिथिंगृहमागतं॥६॥पु-
त्राःशृणुतमद्वाक्यंकमनीयस्यपक्षिणः॥कर्तव्यमद्यसहसाह्यातिथ्यंमुक्तिसाधनं
॥७॥ ॥पुत्राऊचुः॥ ॥अतिथिर्यस्यसंप्राप्तोगेहंसाधोर्महात्मनः॥यथादेशंय
थाकालंज्ञानेनक्रियतेयदि॥८॥आतिथ्यंवैश्वदेवांतेसफलंजीवितंगुरा॥ग्रहस्था-
श्रमिणांधर्मोयदातिथ्यस्यरक्षणं॥९॥दातव्यंहिप्रयत्नेनह्यामिषंत्वात्मसंभवं॥ज्ञातो
तिथि प्रियोयस्माद्यातिह्यतिथयःसदा॥१०॥ ॥पितोवाच॥ पितुराज्ञाप्रकर्तारःसु-
पुत्राःसंतिभूतले॥दुष्टाभवादृशाश्चान्येह्यविद्याकाममोहिताः॥११॥मूर्खाभवंतोभव
तमद्वाक्योल्लंघकायदि॥पितुर्वाक्यंसमाकर्ण्यप्रणम्योचुःसुदुःखिताः॥१२॥ ॥पु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्राऊचुः॥ ॥क्षमध्वंतातनोवाक्यंत्वत्पुत्रादीनभाषिणः॥त्वद्वाक्योल्लंघकेष्वेषुकृ
पांकुरुदयानिधे॥१३॥दारिद्र्यंप्रथमंदुःखंद्वितीयंतमउच्यते॥दारिद्र्यान्निर्वृतिंप्राप्य
ज्ञानेनसुखमश्नुते॥१४॥पूर्वंत्वंनोयदिप्राप्तंतदाकुत्सितयोनिषु॥प्राप्स्यामो
विविधान्यत्रदुःखान्येतत्क्षमस्वभो॥१५॥साधवःसमचित्तास्तेदीनरक्षणतत्पराः॥
पितोवाच॥ ॥ब्रह्माविष्णुश्चरुद्रश्चनिवसंत्यत्रवैद्यमी॥१६॥तद्दर्शनाद्गतिंज्ञानंभ
वंतःप्राप्स्यथक्रमात्॥ ॥पुत्राऊचुः॥ ॥सत्यलोकेस्वयंभूश्चविष्णुर्वैकुंठधामनि
॥१७॥कैलासेहिमजानाथःकुत्रतेद्यभवन्त्रयः॥वक्तव्यंतुत्वयाधामत्रयाणांभुवि-
विश्रुतं॥१८॥ ॥पिताउवाच॥ ॥कृपयावच्मितत्तीर्थंयुष्माकंपुत्रकाःखलु॥भव
द्भिस्तत्रगंतव्यंत्रितयंयत्रवर्तते॥१९॥कृष्णाविष्णुतनुःसाक्षाद्विवोवेणीस्वरूपधृक्
॥ब्रह्माककुद्मतीगंगाकरहाटेतुगच्छथ॥२०॥स्नात्वातत्रसमभ्यर्च्यसंगमेशंप्रयत्नतः
॥दृष्ट्वादुर्गांभगवतींलक्ष्मींदुर्दैत्यनाशिनीं॥२१॥ज्ञानंविज्ञानसहितंभविष्यतिनसंशयः॥
पितुर्वचनमाकर्ण्यसर्वेपुत्राःसमागताः॥ककुद्मिन्याः संगमे तुस्नात्वाज्ञानमवाप्यच॥
स्तुतिंचक्रुःकृष्णवेणींप्रीत्यासहककुद्मिनीं॥२३॥तदोत्तस्थुर्जलाद्रूपाण्यनुमेयानितेजसा
॥विस्मयंपरमंजग्मुर्विश्वासंप्राप्यसुव्रताः॥२४॥पितुरंतिकमाजग्मुःश्रद्धावंतोदयान्वि १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ता:॥ वृत्तांतमूचुस्तेसर्वेतेजः किंब्रूहितत्त्वतः॥२५॥ तद्वाक्यंसम्यगाकर्ण्यपुत्राणांद्वि
जसत्तमाः॥ब्रह्मरूपंतदाचख्यौज्ञातव्यंज्ञानतःसुताः॥२६॥ज्ञानहीनोयतोदेहीविट्-
कृमिर्विषयेवसन्॥नजानातिपरंतत्त्वंयोगिगम्यंसुदुःसहं॥२७॥तस्माद्दृष्टंभवद्भिश्च
पूर्वपुण्यैकराशिभिः॥धन्यायूयंकृतार्थाश्चइतिसंदिष्टवांस्तदा॥२८॥कुकुद्मिनीसंगम-
मज्जनेननश्यंतिपापानिकिमत्रचित्रं॥ब्रह्माहरिर्नीलगलश्चयस्मिन्वसंतिनित्यंजल-
रूपधारिणः॥२९॥कुकुद्मिन्यासंगमंतुकृष्णावेण्योर्हिसंगमं॥श्रुत्वानरःपापमुक्तःस्ना
नजंफलमाप्नुते॥३०॥ ॥इतिस्कांदेकृष्णा० करहाटक्षेत्रसंगमवर्णनंनामएकों
नविंशोऽध्यायः॥ ॥छ॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इति एकोनविंशोऽध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥स्कंदब्रूहिसमाख्यानमन्यत्तीर्थस्यचा
नघ॥नतृप्तिमधिगच्छामस्त्वद्वाक्यामृतपानतः॥१॥ ॥स्कंदउवाच॥शृणुध्वंऋ-
षयः सर्वेसेतिहासंपुरातनं॥कृष्णावेण्योर्हिमाहात्म्यं कुकुद्मिन्याःपुरोऽभवत्॥२
कृष्णावेण्योस्तुसंभूतोभैरवोभीमरूपधृक्॥तत्क्षेत्राधिपसान्निध्यात्सिद्धिक्षेत्रंप्र
चक्षते॥३॥तत्रस्नात्वानरःपश्येद्भक्त्याक्षेत्राधिपंहरं॥सर्वपापविशुद्धात्मा प्रा-
प्नोतिपरमंपदं॥४॥कमंडलीसमायाताकृष्णावेण्यांतपस्विनः॥ ततःककुद्मिनी-
योगात्कृत्वास्मिन्वारुणंजपं॥५॥गायत्र्यष्टशतंचापिमुच्यतेसर्वपातकैः॥शिली
भूतंमहाकायंराक्षसंदुष्टचेतसं॥६॥भित्वाधाराभिरुग्राभिःकालेनप्रेषितंद्विजाः
॥यतःसरित्समायातातत्रतीर्थंमहाफलं॥७॥विहंगंनामलोकेस्मिन्तीर्थानामुत्त
मोत्तमं॥यत्रताक्ष्यस्तपस्तप्त्वालेभेसर्वमनोरथान्॥८॥तत्तीर्थंशंभुसान्निध्यात्प-
वित्रंपापनाशनं॥यत्रजातिस्मरःस्नात्वाजंबुकःस्वर्गमाप्तवान्॥९॥ ॥ऋषय
ऊचुः॥ ॥कोसौजातिस्मरस्तत्रस्नात्वामुक्तोभवन्मुने॥कृपांकुरुमुनिश्रेष्ठदयालु
नांत्वमग्रणीः॥१०॥ ॥नारदउवाच॥ ॥आसीदिंद्रस्यतनयोजयंतइतिविश्रु
तः॥चकमेमदिरांपीत्वारंभांयःकाममोहितः॥११॥ततःशशापशक्रस्तंजंबूकोभव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्मते ॥ जंबुकत्वेयदाकृष्णांद्रक्ष्यसेजातिवित्तदा ॥१२॥ तत्रस्नात्वापुनर्धाममामकंचो
पयास्यसि ॥ तेनतज्जंबुकंतीर्थंप्रजातंसह्यजातटे ॥१३॥ तत्रनागेश्वरोदेवः संभूतोभ
क्तवत्सलः ॥ तंदेवंवास्तुकिः साक्षात्सर्वदाप्यत्रतिष्ठति ॥१४॥ सुधियानष्टपापानांस
नागस्त्वक्षिगोचरः ॥ तच्चनागेश्वरंस्थानंसर्वसिद्धिकरंनृणां ॥१५॥ कुब्जेश्वरंततोदि
व्यंतत्रदेवींसमर्चयेत् ॥ सर्वपाप विनिर्मुक्तोरुद्रलोकेमहीयते ॥१६॥ ततः पौलस्त्यती
र्थंचपौलस्त्येशस्तथाहरः ॥ तत्रस्नात्वातमभ्यर्च्यसर्वान्कामानवाप्नुयात् ॥१७॥ ती
र्थानांपरमंतीर्थंबाहुतीर्थंप्रचक्षते ॥ तत्रस्नात्वाचपीत्वाचसोमृतत्वायकल्पते ॥१८
॥ ॥ ऋषयऊचुः ॥ ॥ कस्मात्तीर्थमभून्नामबाहुमात्रमितिस्मृतं ॥ एतत्त्वंब्रूहि
सकलंनिदानंबाहुतीर्थजं ॥१९॥ ॥ स्कंदउवाच ॥ ॥ पुरादाशरथीरामः पौलस्त्यं
हतवान्यदा ॥ ब्राह्मणान्स्वयमानीयवसिष्ठप्रमुखान्मुनीन् ॥२०॥ प्रपच्छप्रयतोभूत्वास्वयं
निर्विण्णचेतसा ॥ एनसांपरमंदुःखंब्रह्महत्यासमंनहि ॥२१॥ निष्कृतिस्तत्रकर्तव्या ह्या
त्मशोधनकारणात् ॥ पौलस्त्योब्राह्मणश्रेष्ठारावणोलोककंटकः ॥२२॥ मयाहतोराज
दर्पादपराधीसचाहवे ॥ ज्ञानादज्ञानतोवापिमोहाद्दर्पात्तथैवच ॥२३॥ यत्कृतंकर्मसु
नयोऽशुभंवाशुभमेवच ॥ मानुष्यंदुर्लभंप्राप्यएनसोनिष्कृतिंनरः ॥२४॥ नकरोतियदा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोहाद्घोरयंप्रतिपद्यते ॥ अग्निर्दहतिकाष्ठेनसूर्योदहतिरश्मिभिः ॥ २५ ॥ राजादहति
दंडेनब्राह्मणोमनसादहेत् ॥ विपिनंसर्ववृक्षाणांदहत्यग्निः समिंधितः ॥ २६ ॥ ब्राह्मणा
ग्निःसमूलानिकुलानिप्रदहत्यसौ ॥ भवंतःसाधवःश्रेष्ठाब्राह्मणावेदपारगाः ॥ २७ ॥ ज्ञा-
त्वादाशरथिंमांतुशरणागतमंजसा ॥ त्रायध्वंब्रह्महत्यायाःशरणागतवत्सलाः ॥ २८ ॥
ऋषयऊचुः ॥ ॥ साधुसाधुमहाप्राज्ञब्रह्मण्यदीनवत्सल ॥ यस्यस्मरणमात्रेणनि
ष्पापोजायतेनरः ॥ २९ ॥ एतादृशस्यतेपापंपूतात्मन्वैकुतःपतेत् ॥ तथापिप्राप्यवैदेहं
परेषांज्ञानबोधकं ॥ ३० ॥ कार्यावैब्रह्महत्यायानिष्कृतिर्भवतानघ ॥ गंगादिसर्वतीर्थानां
स्नानात्पापक्षयोभवेत् ॥ ३१ ॥ अयोध्यायांचकर्तव्यंराज्यंधर्मेणवैत्वया ॥ तीर्थाटनेयदा-
गच्छेःक्षयमेष्यंतिवैप्रजाः ॥ ३२ ॥ राज्ञांहिपरमोधर्मोयत्प्रजापरिपालनं ॥ तस्मिन्विलंबो
नोकार्यस्तीर्थयात्राप्रसंगतः ॥ ३३ ॥ तीर्थंकृच्छ्रंसमासाद्यतपःकार्यंसुदारुणं ॥ तपसासाध्य
तेराज्यंज्ञानंचाप्युत्तमांगतिं ॥ ३४ ॥ गच्छत्वंमनुजैःसाकंकृष्णावेणीहरेत्तनुं ॥ यस्याःपोदर्श-
नात्पापंब्रह्महत्यादिकंतथा ॥ ३५ ॥ क्षयमेष्यतितत्क्षिप्रंदक्षिणातीर्थसेवनात् ॥ तद्वाक्य
श्रवणाद्रामःकृष्णावेणींसमाययौ ॥ ३६ ॥ सन्निवेश्यैवसकलंवायुपुत्रेणधीमता ॥ नदीत
टंसमासाद्यचकारतपउत्तमं ॥ ३७ ॥ कृष्णावेणींस्वकल्लोलवेलांदोलितविक्रमां ॥ दृष्ट्वारा-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मस्तदाकोपात्किमित्येवंविचिंतयत्॥ ३८॥हनूमान्तत्रसंगम्यस्वबाहुभ्यांनिरुध्यतां॥
पास्याम्यहंकृष्णवेणीमगस्त्यःसागरंयथा॥ ३९॥कृष्णावेणीतदारामसार्गत्यद्वाद्वि
धाऽभवत्॥प्रसाद्यरामंतंकृष्णावरंप्रापसुदुर्लभं॥ ४०॥ तस्माद्वेकारणात्तद्विबाहुती-
र्थंप्रचक्षते॥बाहुतीर्थेनरःस्नात्वासर्वपापैःप्रमुच्यते॥ ४१॥ ॥इतिश्रीस्कंदपुरा-
णेकृष्णामहात्म्येबाहुतीर्थवर्णनंनामविंशत्यध्यायः॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥तीर्थान्यनंतरूपाणिकृष्णावेण्यांवसंतिहि
॥मुख्यान्येवपवित्राणिशृणुध्वंभोमुनीश्वराः॥१॥भृगुवंशेसमुत्पन्नोब्राह्मणःश्रुतिपार-
गः॥तपस्वीध्यानसंपन्नोधनीचबहुबांधवः॥२॥वार्धक्येतस्यपुत्रोऽभूद्दुर्वृत्तःसकलेष्व-
पि॥ममारतस्मिंस्तत्कालेतत्पत्नीचपतिव्रता॥३॥तेनसाकंगतातत्रमुक्तिंलोकाप्रापपुरस्त-
दा॥बालकोदीनरूपेणह्यनाथःसमभूत्तदा॥४॥केनचिद्ब्राम्हणेनासौपोषितस्तस्यबालकः
॥कृतेचोपनयेसोपिममारपोषकःपिता॥५॥द्वादशाब्दवयाबालःकैरातंदेशमागमत्॥
तत्संगात्कृतवान्कर्मस्तेयंपथिस्थदुर्मतिः॥६॥तत्कन्यांकामुकोभुंजंस्तस्यांपुत्रानजी-
जनत्॥कुटुंबीहिंसयातत्रकालगत्यायथौनदीं॥७॥कृष्णावेणींसमासाद्यदृष्ट्वाब्राह्मणपुं-
गवान्॥कश्यपादिऋषिन्दृष्ट्वायजंतश्चैवसर्वशः॥८॥मात्राणिचपवित्राणिपश्यन्हर्तुंस-
मुद्यतः॥ददतेमानिसर्वाणिनोचेद्धन्मीतिचाब्रवीत्॥९॥तंदृष्ट्वाऋषयःसर्वेकृतांत-
समतेजसं॥धनुर्बाणधरंदुष्टंसदादुर्नीतिकारकं॥१०॥तिष्ठतिष्ठेतिसंप्रोचुःकिमर्थंहि
समागतः॥कालोहिगतइत्येवंमनसित्वंविचारय॥११॥कास्त्रीत्वंकःसुताःकस्यपा-
पसंग्रहतत्परः॥एतेकिंतेकरिष्यंतिपरलोकेभयावहे॥१२॥विचार्यैवंत्वयावत्सपश्चात्
कार्यंस्वकर्मतत्॥तावदस्मान्वृक्षमूलेबध्वाशीघ्रंगृहंव्रज॥१३॥कुटुंबंस्थविचार्यैव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कू॰म॰ अत्रागच्छाचिरात्खलु ॥ अनुमान्यसतान्वध्वाद्वृक्षमूलेमुनीश्वरान् ॥१४॥ गत्वागेहं अ॰
४८ समाहूयपुत्रान्जायांस्नुषांस्तथा ॥ प्रपच्छदीनमनसासर्वानात्मनोगतिं ॥१५॥ मयाहः २१
ताश्चबहुशोब्राह्मणाःपापकर्मणा ॥ तत्पापस्यविभागेकिंभवंतोनविभागिनः ॥१६॥ रौ
रवेनरकेनित्यंवसतःप्रेत्यवाइह ॥ ॥पुत्रादयऊचुः॥ ॥किमुक्तंभवतास्वामिन्पोष्या
युष्मत्कृताःकिल ॥१७॥ एतादृशंविगर्ह्यंतत्कर्मकुर्यात्पितायदि ॥ कृतंवायदिवादुःखं
शुभंवाऽशुभमेवच ॥१८॥ येनयेनकृतंकर्मतद्भोक्तव्यंतुतेनवै ॥ अन्यस्यनहिभागस्त
रौरवेनरकेपितः ॥१९॥ तेषांवाक्यंसमाकर्ण्यनिर्विण्णस्तत्क्षणादभूत् ॥ अहोबतमहत्क
ष्टंममदुर्वृत्तकस्यच ॥२०॥ किंकार्यंनिरयेपन्थ्येकोनिवारयितुंक्षमः ॥ साधून्यास्यामिशरणं
मुनीन्वैब्रह्मवादिनः ॥२१॥ धनुर्बाणोपरित्यज्यमुनीन्सशरणंययौ ॥ प्रणम्यदंडवद्भूमौकृतां-
जलिरभाषत ॥२२॥ जन्मन्येकोऽहमेवात्रभोक्तादुःखस्यकर्मणः ॥ त्रायध्वंसाधवोमहं
लोकेदीनानुकंपिनः ॥२३॥ भवद्भिनाहंकान्यास्येसंसारार्णवतारकान् ॥ ॥ऋषयऊचुः॥
धन्योसिकृतकृत्योसिमुमुक्षुस्त्वंद्विजात्मज ॥२४॥ कृपयापरयाविष्टाःकर्णेसंश्राव्यतारकं ॥
निर्गुणंब्रह्मनिर्द्वंद्वं ॥ मंत्राणामुत्तमोत्तमं ॥२५॥ तदातंमंत्रमेवैषोजजापव्युत्क्रमेणच ॥ वृक्ष
रंससमासीनोवल्मीकेतद्वनेवसत् ॥२६॥ कालांतरेसमाताःशिष्यंतंद्रष्टुमिच्छवः ॥ कमंड- १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लुजलैः स्नाप्य वल्मीकादुद्धृतः पुनः ॥ २७ ॥ वाल्मीकऋषिरित्यासीन्नाम्नाकृष्णासमी-
पतः ॥ कृष्णावेण्यांनरः स्नात्वावल्मीकेश्वरसेवच ॥ २८ ॥ नस्वाधिमुच्यतेजंतुर्गतिंप्राप्नो
तिशाश्वतीं ॥ २९ ॥ ॥ इतिश्रीस्कांदेकृष्णामहात्म्येवल्मीकतीर्थवर्णनंन्नामए
कविंशतितमोऽध्यायः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥इति एकविंशतितमोऽध्यायः॥

२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥तत्तीर्थत्कृष्णावेणायांतीर्थान्येवपदेप
दे॥ प्राधान्यतोद्विजश्रेष्ठाः शृणुध्वंहिसमासतः॥ १॥ धनुःपंचप्रमाणेन स्कंदतीर्थंप्र-
चक्षते॥ धनुर्दशप्रमाणंतुवामनंतीर्थमुच्यते॥ २॥ ब्राह्मंतीर्थंततोरम्यंसरस्वत्याधनु-
र्दश॥ ततोपितीर्थप्रवरंमहापातकनाशनं॥ ३॥ पापनाशनतीर्थंचगंगाचोत्तरवाहि
नी॥ तत्रस्नात्वाचपीत्वाचसप्तजन्मार्जितान्यपि॥ ४॥ नश्यंतिनात्रसंदेहः पापानि
स्रुबहून्यपि॥ ॥ऋषयऊचुः॥ ॥पापनाशनतीर्थंचकस्माज्जातंकदागुह॥ एत-
द्विस्तार्यसकलंसेतिहासंतुनोवद॥ ५॥ पुराब्रह्मादयोदेवासर्षयश्चप्रपीडिताः॥ क्षीरा
ब्धौशरणंजग्मुर्नारायणमनामयं॥ ६॥ विदित्वादेवदेवेशोविष्णुर्वैभक्तवत्सलः॥ आ-
विरासीत्ततोदेवान्ज्ञातंह्यागमनंतुवः॥ ७॥ दैत्यैः प्रपीडितायूयंसर्वेवैमाहिषादिभिः॥ ता
न्हंतुंहिमयाचिंत्यउपायोह्यत्रदारुणः॥ ८॥ तेदैत्यायुद्धशौंडाश्चत्रैलोक्येदुःखकारकाः
॥ तपश्चक्रुर्वरंलब्धास्त्रियोमृत्युर्भवेदिति॥ ९॥ तस्माद्देयातभोक्षिप्रंभवानींभक्तवत्सलां-
॥ दैत्यघ्नींमूलप्रकृतिंसावःकार्यंकरिष्यति॥ १०॥ इतितद्वाक्यमाकर्ण्यसंभ्रमापन्नमान
साः॥ अमरास्तुष्टुवुर्देवींत्रिलोकीपालनक्षमां॥ ११॥ भुवनेश्वरींजगद्धात्रींसृष्टिस्थित्यंत
कारिणीं॥ प्रणम्यदंडवद्भूमौवरदांदैत्यनाशिनीं॥ १२॥ ॥ऋषयऊचुः॥ भुवनेश्वरीं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमस्यामोभक्तकल्पद्रुमांसदा ॥ वरदांकामदांशांतांकृष्णातीरनिवासिनीं ॥ १३ ॥ सर्वसि
 द्धिप्रदेदेविभुक्तिमुक्तिप्रदेशुभे ॥ भुवनेश्वरिमहाकालिमनोऽभीष्टप्रदायिनि ॥ १४ ॥ स-
 र्वाभयप्रदेदेविसर्वदुष्टविनाशिनि ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदायिनि ॥ १५ ॥
सर्वक्लेशहरेदेविश्रीर्महाविष्णुरूपिणि ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदा० ॥ १६ ॥
अंतर्यामिस्वरूपेणास्थितेसर्वत्रसर्वगे ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदा० ॥ १७ ॥
भवनाशकरेदेविभवभेषजदायिनि ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदायिनि ॥ १८ ॥
अविद्यापटलध्वंसिमहानंदेऽभयप्रदे ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदा० ॥ १९ ॥
संसारतारणोपायेनिर्जरैरुपसेविते ॥ भुवनेश्वरिमहाकालिमनोभीष्टप्रदायिनि ॥ २० ॥
इदंस्तोत्रंपठित्वातुऋषयोविमलाशयाः ॥ कृतांजलिपुटास्तस्थुस्त्राहित्राहीतिवादि-
नः ॥ २१ ॥ मुनिभिःसंस्तुतादेवीमनोभीष्टप्रदायिनी ॥ प्राहप्रसादसुमुखीयाचध्वंवरमु-
त्तमं ॥ २२ ॥ ॥ ऋषयऊचुः ॥ ॥ देविधन्यावयंसर्वेतवदर्शनमात्रतः ॥ नयाचामोव
रंचान्यंवयंत्वांभक्तवत्सले ॥ २३ ॥ नद्यामस्यांकृष्णावेण्यांवसत्वंसर्वगेशिवे ॥ दर्शना
त्सर्वभक्तानांमनोभीष्टंददस्वनः ॥ २४ ॥ देव्युवाच ॥ ॥ वसामिकृष्णवेणायाजले
भूम्यांतपस्विनः ॥ भवत्कार्यंकरिष्यामिस्तोत्रश्रवणमात्रतः ॥ २५ ॥ येपठंतिस्तोत्रमिदं १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शृण्वंतिश्रद्धयान्विताः॥तेषामभीष्टंदास्यामिभक्तानांनात्रसंशयः॥२६॥मासमात्रंप
ठेद्यस्तुपुरश्चरणकाम्यया॥ तस्यकार्याणिसिध्यंतिस्नात्वानद्यांयतव्रतः॥२७॥इत्थं
स्तुतासंस्तुतादेवीदैत्यदर्पविनाशिनी॥दत्वाऽभयंनिर्जराणांखड्गखेटकधारिणी॥२८॥इ
हैवमुक्तिर्हस्ताग्राऽमृतपात्रंचबिभ्रती॥२९॥ ॥इतिश्रीस्कंदपुराणेकृष्णामा-
हात्म्येमनोभीष्टस्तोत्रवर्णनंनामद्वात्रिंशोऽध्यायः॥ ॥७॥ ॥७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥इतिद्वाविंशोऽध्यायः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥कृष्णावेण्यांमहानद्यांस्नात्वापापवि
नाशने॥ दृष्ट्वाभगवतींरम्यांसर्वाभीष्टप्रदायिनीं॥१॥ सौगंधिकैरनेकैश्चगंधैःपुष्पै
र्मनोहरैः॥ धूपैर्दीपैश्चनैवेद्यैःस्रुवस्त्रपरिधानिकैः॥२॥ कर्पूरचूर्णसंयुक्तैस्तांबूलैश्च
सपूगकैः॥ नानास्रुवर्णपुष्पैश्चनीराजनमहोत्सवैः॥३॥ मंत्रपुष्पांजलीभिश्चसंपू
ज्यविधिपूर्वकं॥ प्रणम्यदंडवद्भूमौकृतांजलिपुटस्सदा॥४॥ पूजांतेस्तोत्रमेतद्धिम
नोभीष्टप्रदंजपेत्॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं॥५॥ मुक्तिंप्राप्नोतिसद्भ
क्तोभगवत्याःप्रसादतः॥ तस्मात्तीर्थानिचान्यानिपवित्राणिद्विजोत्तमाः॥६॥ धनुषांच
तुःप्रमाणानिशृणुध्वंमेसमासतः॥पापनाशनतीर्थात्तुदुग्धतीर्थंततोवरं॥७॥ दधिती
र्थंमहारम्यंघृततीर्थंस्रुविस्तरं॥ नवनीताख्यतीर्थंचभगवत्याःप्रपूजने॥८॥ शुद्धां
बुतीर्थंतस्मात्तुमधुतीर्थंततोवरं॥खगतीर्थंनागतीर्थंसिद्धतीर्थंततःपरं॥९॥ विंश
द्धनुःप्रमाणेनविष्णुतीर्थंफलप्रदं॥नागारितीर्थंमत्युग्रंकालकूटाघनाशनं॥१०॥
अर्कतीर्थंततोज्ञेयंदद्रुकुष्ठादिनाशनं॥दर्शनात्सर्वपापघ्नंऋषितीर्थंततःपरं॥११॥मा
र्कंडेयस्ततःप्राच्यांतपःकुर्वन्महामतिः॥आराधयत्तत्तोदेवींतुष्टावपरयामुदा॥१२॥
॥मार्कंडेयउवाच॥ ॥प्रणतोस्मिजगद्धात्रींजगद्वंद्यांसैभुवंगतां॥तपसाब्रह्मणात

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वांकृष्णावेणींहरेस्तनुं ॥१३॥शैलादुत्तुंगमालाभिः स्वर्गसोपानपंक्तिवत् ॥याभाति·
विलताभूमौनृणामुत्तारणायवै॥१४॥गंभीरवारिघोषेणभातिहुंकुर्वतीवसा॥रोषाज्ज
गद्घोघानांमूलतस्तर्जनायच॥१५॥आवर्तनाभिःपद्माक्षीशुभांगीफेनहारिणी॥अ-
ह्मप्रियाज्ञानकरीसाक्षाद्भातिसरस्वती॥१६॥रम्यारातिप्रियाविष्णोर्वरबाहुध्रुतांबुजा॥-
चकास्तियास्वयंलक्ष्मीर्जरादुर्गतिनाशिनी॥१७॥बहुधाशंभुसान्निध्यात्सदादर्शनगौर
वा॥सौभाग्यदायिनीगौरीतारिणीजगदंबिका॥१८॥पवित्रकरणालापैर्जनान्सांत्वयती
बहून्॥कल्पवृक्षपरिभ्रष्टाभातिपुष्पफलान्विता॥१९॥याभातिकल्पवल्लीवधात्रावि
स्तारितानृणां महात्मनांयाशरणंपापिनामपिसौख्यदा॥२० विचित्रसुद्धमाहात्म्यांतांनतोस्मि
गरीयसीं॥यत्काकायसमयोयातिरसस्पर्शात्स्वर्णतां॥२१॥एवंकृष्णाजलस्पर्शात्सद्यः
पापोहिपुण्यतां॥येयंदक्षिणगंगेतिगीयतेदिविकिंनरैः॥२२॥दक्षिणाशांगतायस्माद्दे·
वीसामेप्रसीदतु॥एवंसंस्तूयमानासानिर्गत्यजलमध्यतः॥२३॥प्रसन्नामुनिवर्यतंव·
रदाऽस्मीतिसावदत्॥सोऽथप्रणम्यहृष्टात्माप्रांजलिःपरमेश्वरीं॥२४॥प्राहधन्योस्म्य
हंदेविदृष्ट्वात्वांभगवत्तनुं॥दीर्घमायुर्मयालब्ध्वांविष्णुमाराध्यवैपुरा॥२५॥विनाहिभग
वद्भक्त्यातद्व्यर्थमितिमेमतिः॥तस्मात्परात्मनिशिवेगोविंदेतुचिदात्मनि॥२६॥त्वयिप्र १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्तिमायायांभक्तिःस्यात्सार्वकालिकी॥ ॥देव्युवाच॥ ॥एवमस्तुमुनिश्रेष्ठय-
श्चस्नात्वोष्यत्यनेनमां॥२७॥स्नातियश्चात्रदीर्घायुर्मत्प्रसादाद्भविष्यति॥ ॥नारद-
उवाच॥ इत्युक्त्वांतर्हितादेवीमुनिस्तत्राचरत्तपः॥२८॥मार्कंडेयाभिधंतीर्थंतेनतत्प-
रमंभुविमार्कंडेयाभिधंलिंगंतत्रजालंधरप्रदं॥२९॥नद्यांस्नात्वातमभ्यर्च्यमुच्यतेह्य
घवान्नरः॥३०॥ ॥इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येमार्कंडेयतीर्थवर्णनंना-
मत्रयोविंशोऽध्यायः॥ ॥छ॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इतित्रयोविंशोऽध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥मुनिरुवाच॥ ॥मार्कंडेयाभिधात्तीर्थाद्योगितीर्थं
प्रचक्षते॥ योगिनोयत्रसिध्यंतिज्ञानयोगश्चसिद्धयः॥१॥ श्रीतीर्थमुत्तमंज्ञेयंदर्शना
त्स्नानतोपिवा॥प्राप्नुवंतिजनाभक्तांश्रियंविज्ञानतत्पराः॥२॥नदरिद्रोभवेत्तत्रस्ना
नात्षण्मासमात्रतः॥गोतीर्थंशंभुतीर्थंचपितृतीर्थमतःपरं॥३॥त्रिंशद्धनुःप्रमाणं
वानघघ्नममृतंज्ञात्वापठस्वागमैः त्रैलोक्याभयदंमहाकलिमलप्रध्वंसिसेव्यंजनैः कृष्णा-
तीरकथामृतंपरपदप्राप्तेर्महत्साधनं॥ १३॥ ॥इतिस्कंदपुराणेकृष्णा॰ एकचत्वारिंश
त्तमोऽध्यायः॥ ॥छ॥ ॥छ॥ ॥छ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीगणेशायनमः॥ ॥उत्तंकउवाच॥कृष्णद्वैपायनस्यैवमुत्पत्तिः पावनीश्रुता॥ लोकानां
चहितार्थायकिंभूयः श्रोतुमिच्छसि॥१॥ याज्ञवल्क्यउ०॥उत्तंकवर्यसकलागमतीर्थसारंकृष्णा
तटस्थमनुभावविशेषगम्यं॥शृण्वन्नरस्तुभवदीयमुखारविंदात्ख्यातंकृतंनिजकुलंपुरुषेणले
न॥२॥ उत्तंकउ०॥मुनेशृणुमहत्तीर्थंसर्वलोकैकपावनं॥ संत्यनंतानितीर्थानिकृष्णावेण्यांचय
द्यपि॥३॥तथापिकानिचिद्वक्ष्येपवित्राणियथातथं॥ व्यासतीर्थाद्धनुःषट्कप्रमाणमतिपावनं
॥४॥ब्रम्हतीर्थमितिख्यातंस्नात्वाब्रम्हत्वदंनृणां॥ब्रम्हतीर्थात्पुरोभागेधनुःपंचप्रमाणतः॥५॥
वालखिल्याभिधंतीर्थंसर्वपापप्रणाशनं॥वालखिल्यगणास्तत्रनिवसंतितपस्विनः॥६॥वाल-
खिल्याभिधेतीर्थेस्नानंकृत्वायथाविधि॥ब्रम्हयज्ञादिकंकुर्वन्वैकुंठंप्राप्नुयान्नरः॥७॥तत्ती
र्थात्प्रवरंज्ञेयंशुकतीर्थंमुदावहं॥शुकतीर्थेनरोगत्वाद्दर्शनाद्याति साधुतां॥८॥तीर्थमन्यप्रव-
क्ष्यामियत्तुतत्सन्निधौपरं॥ विख्यातंकृष्णवेण्यांतुनारसिंहाभिधंखलु॥९॥आराध्यतपसाय-
त्रनारसिंहंपराशरः॥तद्दर्शार्थंसमायातोनृहरिस्तत्रसत्वरं॥१०॥ज्वालाकारंनृसिंहास्यंदृष्ट्वा
मुनिरुदारधीः॥प्रणम्यसिरसादेवंज्वालामालातिभीषणं॥११॥स्तुतिंचकारसहसाभक्तराजस्तदा
हरेः॥पराशरउ०॥नमामिदेवंभुवनैकसुंदरंसुरासुरैर्वंदितपादपंकजं॥१२॥निरंजनंनिर्विषयैक
वत्सलंकृष्णातटस्थं नृहरिंजगद्गुरुं॥ज्वालानृसिंहंकरुणावतंसंभक्ताधिहारंविबुधैकवंद्यं॥१३॥

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःखापहं भक्तजनावकीर्णं कृष्णातट०॥१४॥ कृपां कुरु मयि स्वामिन् रोषं त्यज्य सुदुःसहं॥
अमृतस्निग्धया दृष्ट्या विश्वं पश्य दयानिधे॥१५॥ आहि आहि नृसिंह त्वं ज्वालामालाकुला दि
शः॥ तेजः संहृत्य हे स्वामिन् स्वात्मन्येव वशं नय॥१६॥ इति स्तुत्वा नृसिंहं तं तत्र पाराशरो मु-
निः॥ नाम ज्वालानृसिंहेति चक्रे भुवनसंमतं॥१७॥ ऋषेर्वाक्यं तदा श्रुत्वा नृसिंहो ह्यतिभीषणः॥
मुनिं पराशरं भक्त्या प्रोवाच करुणानिधिः॥१८॥ तीर्थे मां स्थापयाशु त्वं ज्वलदग्निशिखोपमं॥
शांतिं यास्यामि कृष्णायां दहेन्नो चेज्जगत्त्रयं॥१९॥ तदा पराशरो योगी वियोगात्खिन्नमान-
सः॥ अनुज्ञया हरेस्तत्र मूर्तिं तीर्थजले ऽक्षिपत्॥२०॥ आसाद्य कृष्णातीर्थं सा मूर्तिस्त्रैलोक्यपाव
नी॥ स्वभक्तज्ञानदा तत्र स्थिता सर्वजनार्तिहृत्॥२१॥ पराशरस्ततो गच्छन्तीर्थानि विविधानि च
॥ यावत्सागरसंयोगं हृदि देवं सदा स्मरन्॥२२॥ उत्तंको याज्ञवल्क्यं च वर्णयित्वा पुनः पुनः॥ संपू
ज्य परया भक्त्या कृष्णां द्रष्टुं पुनर्ययौ॥२३॥ कृष्णायां यानि तीर्थानि पवित्राणि महांति च दृष्ट्वा
स्पृष्ट्वा च योगीशो मुनेराश्रममभ्यगात्॥२४॥ श्रुत्वाख्यानमिदं सर्वं श्रावयेद्वा समाहितः॥ नृहरेः
कृपया तस्य वांछितं वै भवेद्द्विजाः॥२५॥ ॥इति श्रीस्कंदपुराणे कृष्णामाहात्म्ये द्विचत्वा
रिंशो ऽध्यायः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥वचस्त्वैतज्जगदीशायुक्तंप्रह्मप्रदंलज्ज
गतांप्रवृत्तये॥पूज्यस्त्वमेवत्रिषुलोकनाथतीर्थावलीश्रेष्ठतमाहिवाच्या॥१॥इत्थंनिशम्यस
तदाऋषीणांवाक्यमंजसा॥प्रोवाचप्रीतिसंयुक्तस्कंदःकिंचिद्धसंस्तदा॥२॥ ॥स्कंद॰
॥मुनयःसंतितीर्थानिकृष्णायांकोटिशस्तथा॥तथापिवक्तुंकःशक्तोज्वालातीर्थमहत्तरं
॥३॥म्रियमाणस्यदैवात्तुतीर्थमेतत्परायणं॥पतितोपिमृतोयत्रगच्छेत्सेवापुनर्भवं॥४॥
केदारेजलपानाच्चसोमपानाद्यदाप्यते॥कृष्णावेणीजलस्पर्शात्तदाप्नोतिनसंशयः॥५॥कृ
ष्णावेण्यांमहात्तीर्थंपराशरविनिर्मितं॥संदर्शनात्तदायांतिविष्णुलोकंसनातनं॥६॥वि
ष्वक्सेनादयःसर्वेपार्षदाःसुरसत्तमाः॥वसंतितत्रसंसिद्धाहरेःप्रियचिकीर्षया॥७॥
ज्ञानिनश्चमहाभागामुक्तास्तत्रवसंतिहि॥ज्ञात्वातीर्थवरंपुण्यंइहामुत्रफलप्रदं॥८॥
यत्रपींडप्रदानेनमुक्तिंयांत्यतिपापिनः॥गयायांपिंडदानेनएकस्यैवभवेद्गतिः॥९॥कुला
नामिहसप्तानांगतिर्भवतिशाश्वती॥एकोदेवस्त्रिधाभूत्वानारसिंहोऽतिभीषणः॥१०॥-
तीर्थेनृसिंहनामाख्येरूपमेकंप्रचक्षते॥मंत्रमूर्तिर्द्वितीयाख्याज्ञानीयऋषिसत्तमाः॥११॥
दीनानांमंत्रहीनानामज्ञानपथवर्तिनां॥मूर्तिःप्रत्यक्षतोज्ञेयाज्वालानरहरेःपरा॥१२॥अ
त्रार्थेकथयिष्यामिकथांपौराणिकींशुभां॥नृसिंहस्यसुरेशस्यपावनीमघहारिणीं॥१३॥नं

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 दिग्रामेमहानासीद्ब्राह्मणोवैभवैर्युतः॥ विष्णुशर्म्मेतिविख्यातोविष्णुव्रतपरायणः॥१४॥ पं-
 चरात्रागमज्ञश्चसत्यवाक्येचतत्परः॥ज्ञानीचनिर्ममोदारस्तितिक्षुर्मोहवर्जितः॥१५॥अर्जि
तंतेनतद्द्रव्यंकोटिसंख्याधिकंतदा॥ तस्यभार्यास्तुदुर्वृत्ताधर्मकार्यपराङ्मुखी॥१६॥ धनव्य-
यः सदामाभूदितिचिंतापरायणा॥ तस्यावाक्यानुरूपेणविषयासक्तचेतनः॥१७॥ तत्संगा-
द्विद्धीर्नासौधर्मंचक्रेद्विजोत्तमः॥नचकारतदाधर्मंस्त्रीजितोब्राह्मणाधमः॥१८॥एवंब
हुतिथेकालेकदर्यत्वोऽपलंबिते॥ कश्चिद्यतिः समायातोमध्यान्हेमाधवेयदा॥१९॥आति
थ्यकालेसंप्राप्तेतद्गेहेप्राविशत्तदा॥गृहाजिरेयतिस्तिष्ठन्भिक्षांदेहीतिचावदत्॥२०॥उवा
चैनंगृहपतिर्बहुशोबोधयन्नपि॥ मद्गृहेनभवेद्भैक्ष्यंगच्छान्यत्रेतितंवदन्॥२१॥यतिस्त्वंमा
मुपायोहिसचाप्नोत्युत्तमांगतिं॥लोभेनलोकपीडार्थंकुतोग्रामंसगच्छति॥२२॥फलमूलैः
सदारण्येवसन्भिक्षुः सदैवहि॥तीर्थान्यालोचयन्कालेसिद्धस्थानेसदावसन्॥ सए-
वयतिरित्युक्तोनान्योविषयलालसः॥ एवमुक्तस्तदातेनस्त्रीजितेनशठेनच॥२४॥ यतिश्चु
कोपमनसायद्यपिक्षमयायुतः॥तंप्रोवाचमहायोगीकृपयाऽहंसमागतः॥२५॥ सत्यमु-
क्तंत्वयावत्सयतिधर्मविदाद्विज॥सर्वधर्मान्सदावेत्सिसर्वज्ञोऽसिमहामते॥२६॥ ब्रूहिध-
र्मान्गृहस्थानामशेषेणचयादृशान्॥गमिष्यामिसदातान्वैनान्यत्रभैक्ष्यमाकृयां॥२७॥ १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माभैर्धनव्ययाशंकिन्कुदर्यौसिद्विजाधम॥ यतिवाक्यंतदाश्रुत्वाकांतांप्रेक्ष्यसुदुःखितः॥२८
सापितूष्णींतदातस्थौनोत्तरंप्रददौद्विजः॥ यतिर्जगामसहसाधर्माधर्मविचारिणौ॥ २९॥
हित्वान्यत्रतदायोगीपुण्यमप्याहृतंतयोः॥श्रुत्वाख्यानंयतेर्नित्यंश्रद्धायुक्तःपुमान्यदि॥
३०॥सर्वपापविनिर्मुक्तःपुण्यांबुद्धिमवाप्नुयात्॥३१॥ ॥इतिस्कांदेकृष्णामाहात्म्ये
त्रिचत्वारिंशोऽध्यायः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इतित्रिचत्वारिंशोऽध्यायः॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशाय नमः॥ ॥ऋषय ऊचुः॥ श्रुतं वै भवतः स्कंद महदाख्यानमुत्तमं॥
न तृप्तिमधिगच्छामो यथा पीयूषसेवनात्॥ यतेर्योगीश्वरस्यैवं ताभ्यां नाराधनं कृतं॥ तदा त
योर्गतिः का वा जाता महदतिक्रमात्॥२॥ ॥स्कंद उवाच॥ विचित्रमिदमाख्यानं शृणुध्वं
मुनिसत्तमाः॥ लब्ध्वातिदुर्लभं जन्म मानुष्यमतिपावनं॥३॥ ज्ञात्वा संपत्तियुक्तोपि ह्यातिथ्यं
न चकार ह॥ शास्त्राणि विविधान्येव ज्ञात्वा तूष्णीं स्थितो द्विजः॥४॥ तस्मान्मूकः स विप्रोभूद्याति
क्षोभात्तदैव हि॥ नष्टदृष्टिस्तथा कांता जाता नेत्रनिमीलनं॥५॥ कृत्वाचारात्द्विगंतव्यं भिक्षा
र्थं यतिना त्वया॥ इत्युक्तं निष्ठुरं वाक्यमतस्तौ दुःखितौ भृशं॥६॥ स्वकर्म सहसा तत्र स्मरंतौ
पापभागिनौ॥ दैवात्कालांतरे तौ तु मृतिमापतुरातुरौ॥७॥ द्वितीये जन्मनि तथा स्त्रीपुमांसौ
बभूवतुः॥ कर्नाटदेशे संभूतौ नगरे चांजनाह्वये॥८॥ दुर्बलौ दुःखिनौ दैवात्क्षुत्क्षामावनप
सकौ॥ तदा वैराग्यमापन्नौ ब्रह्मवृंदं च जग्मतुः॥९॥ प्रणामं चक्रतुर्भक्त्या हाहा हे कष्ट चैर थो
चतुः॥ किं कृतं कर्म पूर्वस्मिन् उभावत्यंतदुःखितौ॥१०॥ प्रवदंतु मुनिश्रेष्ठा स्वावां जन्मांत
रार्जितं॥ ॥ऋषय ऊचुः॥ ज्ञात्वा तयोस्तौ न दृष्ट्वा ऊचुस्तत्कर्म दुर्धरं॥११॥ पूर्वजन्मनि सं
वृत्तं यतिक्षोभाच्च संगतं॥ ज्ञात्वापि धनलोभेन यः करोति च हेलनां॥१२॥ साधूनां भावितात्मा
मूर्खः स जन्मांते विनिश्चितं॥ परोपघातिनी वाचं वक्ता मूकः प्रजायते॥१३॥ यतिद्रोहात्तु रौद्री

॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कु॰म हासुत्तकद्रव्ययोस्तथा॥हरणाज्जायतेमूकस्तथामूढोन्यजन्मनि॥१४॥ यतिद्रोहश्चभ- अ॰
८५ वताजानतापूर्वजन्मनि॥कृतस्तेनचमूकत्वंत्वयातत्कर्मनिर्मितं॥१५॥भार्यात्वयापिका- ५४
र्पण्याद्दंधत्वंप्रापकर्मतः॥देवद्विजगृहेतीर्थेपुण्यस्थानेतथैवच॥१६॥पुराणश्रवणस्था-
नेयोगिनामाश्रमेतथा॥येदीपदानंकुर्वंतिज्ञानवंतोभवंतिते॥१७॥जन्मांतरेस्वच्छदृष्टियों-
गःपुत्रादिसंततेः॥वैपरीत्येमहत्पापंशृणुब्राह्मणपुंगव॥१८॥ज्ञात्वाऽनयावित्तलोभाद्य
तिक्षोभःकृतोबहु॥तस्मादंधाबभूवैषानिष्कृतिःक्रियतांत्वया॥१९॥देवालयान्मठस्था-
नात्सिद्धस्थानात्महापथात्॥पुराणश्रवणस्थानात्तयादीपोहृतोबलात्॥२०॥तस्मा
दंधेयमित्यत्कालत्प्रायश्चित्ततात्वया॥कर्तव्याशीघ्रमेवेहखेदंमाकुरुवैद्विज॥२१॥द-
रिद्रेणकथंकार्यानिष्कृतिःपूर्वकर्मणः॥द्रव्यैर्यज्ञैर्महादानैर्भाग्यवान्कर्तुमर्हति॥२२॥दुर्ब-
लस्तपसाशुद्ध्येत्तीर्थयात्रादिनापिवा॥इतिश्रुत्वातदावाक्यमृषीणामूर्ध्वरेतसां॥२३॥ऊ-
चतुःपरयाभक्त्याश्रुततीर्थंमहत्तरं॥भवंतःसाधवोनित्यंकारुण्याद्भक्तवत्सलाः॥२४॥अव-
श्यंपापनाशायतीर्थंकथयताचिरं॥ ॥ऋषयऊचुः॥तीर्थानांप्रवरंतीर्थंप्रयागंमुक्तिदायकं
॥२५॥काश्यांतीर्थंपांचनदंत्रैलोक्यश्रेष्ठमुच्यते॥गंगागोदावरीकृष्णातीस्तागंगाःपवित्रकाः
२६॥तासुस्नानंजपोहोमस्तपस्तीरेमहत्फलं॥सितासितेयदास्नातःस्वर्लोकंप्राप्नुयान्नरः १

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२७॥ तत्तीरेमृतिमापन्नोगतिंप्राप्नोतिशाश्वतीं ॥ गोदांद्दष्ट्वाप्रणम्यादौस्नात्वात्प्रयतमा-
नसः॥२८॥पापक्षयकरीनित्यंमुक्तिदात्रीनसंशयः॥ सिंहराशौगुरौयातेयावत्संवत्सरंद्वि
ज॥२९॥तत्तीरेवसतिर्येषांज्ञात्वातद्धर्मसंहितां॥ तेषांजन्मार्जितंपापंनश्यत्येवनसंश-
यः॥३०॥कृष्णायाःशृणुमाहात्म्यंत्रैलोक्येचातिपावनं॥नकोपिमहतांमध्येवर्णितुंशक्य
एवहि॥३१॥तथापिकरुणांकृत्वायथाज्ञानंवदामतत् ॥यागतिर्योगयुक्तानांमुनिनामूर्ध्व
रेतसां॥३२॥सागतिःसर्वजंतूनांकृष्णातीरनिवासिनां॥ बहुजन्मार्जितैःपुण्यैःकृष्णा-
तीरेवसेन्नरः॥३३॥पापात्मापिनरोयस्त्यात्कृष्णातीरेऽतिपावने॥कन्यासंस्थेसुराचार्येव-
सेत्संवत्सरावधि॥३४॥अनुस्यूतंपापनाशःकृष्णातीरस्थितस्यच॥जन्मजन्मार्जितंपापं-
नाशयिष्यतिपावनी॥३५॥प्रतिग्रहान्निवृत्तश्चयदृच्छालाभतुष्टिमान्॥सत्कार्येशून्यम
न्येषांयोवसेत्सलभेत्फलं॥३६॥गत्वाचकृष्णावेणायास्तीरेवससभार्यकः॥ वांछितार्था-
न्वरान्देवोदास्यत्यचिरमूर्जितान्॥३७॥ ॥इतिस्कांदेकृष्णामाहात्म्येचतुश्चत्वारिं
शोऽध्यायः॥४४॥ ॥४४॥ ॥४४॥ ॥४४॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ब्राह्मणउवाच॥ ॥महाबलेश्वरजटाजूटोद्भूताघहारि
णी॥कृष्णवेणीमहागंगायावत्सागरगामिनी॥१॥तस्यांतीर्थान्यनेकानिसंतितन्नपदेप-
दे॥किंयास्येतीर्थवर्यमांप्रवदंतुमनस्विनः॥२॥इतितद्वाक्यमाकर्ण्यहर्षमापुर्महर्षयः
॥ब्राह्मणाऊचुः॥ ॥आस्तिकोऽसिमहाबुद्धेवांछितंप्राप्स्यसेयतः॥३॥ज्वालानृसिंह
तीर्थंतुकृष्णवेण्यांमहामते॥पंचबाणप्रमाणंतुतत्रगच्छाविचारयन्॥४॥धर्मानुसारि-
न्नतत्वज्ञपृच्छतस्तेपुनःपुनः॥तस्मिंयार्थेसमाख्यातंगुह्यमेतत्सनातनं॥५॥इतितद्वा-
क्यमाकर्ण्यश्रद्धालुर्ब्राम्हणोत्तमः॥सभार्यःप्रमुदान्वैतान्प्रणम्यचपुनःपुनः॥६॥ ॥
ब्राम्हणउवाच॥ ॥अद्यमेसफलंजन्मयुष्माभिस्तारितंकुलं॥प्रीतोस्म्यनुगृहीतोस्मि
दर्शनादेववोऽधुना॥७॥युष्मद्दर्शनतोमुक्तोतीर्थंगच्छावसकृव्रता॥ इत्युक्त्वातान्प्रणम्या
शुकृष्णावेण्यास्तटेशुभे॥८॥ज्वालानृसिंहतीर्थंतौजग्मतुर्भक्तितत्परौ॥कन्यागतेगु-
रौयावद्द्वादशाब्दावधिंतटे॥९॥तपश्चक्रतुरत्युग्रंसार्धैकादशवत्सरं॥अंधमूकौदंपती
तौकृत्वातत्राश्रमंशुभं॥१०॥शरीरंतीर्थदेवेभ्यःसमर्प्यचयथाविधि॥शरीरंतारकंदेवजी
वेद्वामृतिमेतुवा॥११॥विक्रीतस्यपशोर्यद्वद्भरणेनपुमान्श्रमी॥तौदेहममतांत्यक्त्वाती-
र्थदेवान्समर्प्यच॥१२॥स्वदेहंकृष्णावेणायास्तटेदेवाभिवंदिते॥निवृत्तौतौमहाभक्त्यागं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋ०म गास्नानंप्रचक्रतुः॥ १३॥नानांतरायसहस्रग्नौगंगाध्यानपरायणौ॥ददर्शतुर्नवैसिद्धिंअंधमू- अ०
८७ काबुभावपि॥ १४॥व्रतंनिरशनंगृह्यतेपालेदारुणंतपः॥ द्वादशेवत्सरेपूर्णेकन्यासंस्थेगु- ४५
रौपुनः॥ १५॥ तयोर्दृष्टिपथंयातोनारसिंहोदयानिधिः॥नेत्रेऽदात्द्विजपत्न्यैतुवाचंचैवद्वि-
जातये॥ १६॥मूकोवाचतदादेवंत्राहित्राहीतिचासकृत्॥ मूर्त्तिंददर्शतुःस्वप्नेउभावपि-
तपस्विनौ॥ १७॥गच्छत्वंराजशार्दूलंभीमंनृपतिसत्तमं॥ श्वोभूतेजलगांमूर्तिंमदीयांत्वं-
समानय॥१८॥ मदाज्ञांब्रूहिराज्ञेत्वंनोचेद्भस्मकरोम्यहं॥ जलादानीयसद्भक्त्यासिद्धभूमौ-
निवेशय॥१९॥ स्वप्नांतेब्राह्मणोदृष्ट्वाकांतांप्रोवाचहर्षितः॥ पतिव्रतांमहाभागांकथयामा
सविस्तरात्॥ २०॥ कृपाजातानारसिंहस्यभद्रेकृष्णातीरेनैवभूतंभविष्यत्॥ उक्तोरात्रौस्वा
मिनाहंयदाद्यदृष्टंभद्रेमीणनंपूर्णमेतत्॥ २१॥ भार्येकिंवर्णयाम्यद्यवाचंमेकरुणाकरः॥ दत्तवा
न्पुण्यनिलयस्तपसाकिंन्नसाध्यते॥ २२॥ अहोजनोयंमूढत्वान्नभजेत्कामलंपटः॥अतो
दुःखंसदाभुंक्तेस्वरूपंविस्मृतंयतः॥ २३॥ अहोधन्यमहोधन्यमतःसाम्यंनिदर्शितं॥ आम्ह
णैश्वरूपापूर्णैरावयोर्ज्ञानमीहितं॥ २४॥ येनमार्गेणयद्दृष्टंहरिरूपमनामयं॥ गुरूणांरूप
यानस्यात्किंकिंतद्देहिनामपि॥ २५॥ साधूनांसमचित्तानांतथादीनानुकंपिनां॥ भावानुरू
पंभगवान्वपुर्दर्शयतिस्वयं॥ २६॥ मातरोगुरवोज्ञेयाः पितरोबांधवास्तथा॥ स्वामिनोबुद्धिदा १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तारोयस्माद्दृष्टं महत्पदं ॥ २७ ॥ अन्योन्यमभिभाष्यैवं विशुद्धेनांतरात्मना ॥ प्रातरुत्थायस
हसाराजानमभितौजसं ॥ २८ ॥ जग्मतुर्हृष्टमनसौ लब्धवाक्दृष्टिसत्पथौ ॥ मूकोवाचम
हावाक्यं पेशलं चार्थगौरवं ॥ २९ ॥ ददर्श भूपतिं सोपि प्रतीतिमपि वर्णयन् ॥ राजापरमधर्मा
त्मा प्रणनाम विनम्रधीः ॥ ३० ॥ तौ प्रोवाच महातेजाः संस्थाप्य च निजासने ॥ उपविष्टौ तदा
राजा पूजयामास सादरं ॥ ३१ ॥ रत्नैर्वस्त्रैः स्रगंधाद्यैर्भूषणैः समलंकृतौ ॥ अमात्यैरपि
लोकैश्च नागरैरपि भूषितौ ॥ ३२ ॥ तत्पुरस्तात्तु वृत्तांतं किमित्येवं स्फुविस्मितः ॥ प्रहर्ष
मतुलं लेभे भीमोऽसौ रविवंशजः ॥ ३३ ॥ ॥ राजोवाच ॥ ॥ तपसाराधितो देवो नारसिं
होदयानिधिः ॥ प्रत्यक्षं दृष्टिवच्चसी प्रापतुर्द्विजवाक्यतः ॥ ३४ ॥ धन्येयं विप्रवनिता धन्यो
यं ब्राह्मणोत्तमः ॥ धन्यो देशः शुभाचारो यत्र कृष्णाघहारिणी ॥ ३५ ॥ धन्योऽयं यस्य देशे
च ब्राह्मणा निवसंति हि ॥ अहो मे पितरस्तुष्टा मद्गृहं पावनं कुलं ॥ ३६ ॥ आज्ञां कुरुत मां
क्षिप्रं किं कार्यमतिदुर्लभं ॥ तत्करिष्यामि सहसा साधूनामिष्टदोस्म्यहं ॥ ३७ ॥ ब्राह्मणउ०
॥ जलादुद्धृत्य तां मूर्तिं सिद्धस्थाने निवेशय ॥ ब्राह्मणैः सह मंत्रज्ञैर्यावद्भूरविचंद्रकाः ॥ ३८
॥ इति तद्वाक्यमाकर्ण्य कृष्णातीरं जगाम ह ॥ राजामात्यैर्जानपदैर्नागरैर्ब्राह्मणोत्तमैः ॥ ३९
॥ तृणराशिमथानीय क्षिप्तस्तस्मिन्महान्हदे ॥ यत्र ज्वालासमुद्भूता जलोपरि समंततः ॥ ४० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृ.म तत्रगत्वामहामूर्तिंप्रगृह्यसहसाऽनयत् ॥ ४१॥ वादित्रैः शंखतूर्यैश्चभेरीभिश्चमृदंगकैः अ.
९८ ॥ नृत्यगीतकलाभिज्ञैस्तदाकेस्थापितजनैः॥ ४२॥ ज्वालानृसिंहमकरोन्नामतस्यद्विजैः ४५
सह॥ पूजांचक्रुर्महाभक्त्यानानालंकारभूषणैः॥ ४३॥ जग्मुः स्वंस्वंनिवेशंचउषतुस्तस्यस-
न्निधौ॥ एवंबहुतिथेकालेमूर्त्यांतेजः समाहितं॥ ४४॥ उभाभ्यामैक्यतांप्रापनारसिंहपदां
बुजे॥ कथितंनारसिंहस्यचरितंपरमाद्भुतं॥ ४५॥ यः शृणोतीममध्यायंश्रावयेद्वासमाहि
तः॥ तस्येंद्रियाणांपटुताभवेन्नृहरिभक्तितः॥ ४६॥ श्रीनृसिंहप्रसादेनसर्वान्कामानवा
प्नुयात्॥ गतिंप्राप्नोतिललितांयोगिनामप्यगोचरां॥ ४७॥ ॥ इतिश्रीस्कांदेकृष्णा
माहात्म्येनृसिंहमाहात्म्यवर्णनंनामपंचचत्वारिंशोऽध्यायः॥ ७॥ ॥ ७॥

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥कदाहिफलभूयस्त्वंकृष्णायांपिंडदा-
नतः॥कालंतंनःसमाख्याहिलक्षणादिविभेदतः॥१॥ ॥स्कंदउवाच॥ ॥कृष्णावे-
ण्यास्तदाकेतुपिंडंदद्याद्विचक्षणः॥अधिमासेजन्मदिनेचास्तेभृगुरुशुक्रयोः॥२॥तीर्थ
श्राद्धं नवैत्साज्यसिंहस्थेपिबृहस्पतौ॥अथापिसकलंकालंवक्ष्येलोकहितायवै॥३॥शत
मिंदुक्षयेदानंसहस्रंराहुपर्वणि॥संक्रमेशतसाहस्रंव्यतीपातेत्वनंतकं॥४॥चंद्रसूर्यो-
परागेतुयत्कर्तव्यंतदुच्यते॥सर्वंहेमसमंदानंसर्वेब्रह्मसमाद्विजाः॥५॥सर्वंगंगासमंतोयं
राहुग्रस्तेदिवाकरे॥पर्वकालेतुसंप्राप्तेनस्नायाद्दृढविग्रहः॥६॥सप्तजन्मसुरोगीस्याद्दुः
खीचैवपुनःपुनः॥व्यतीपातेऽथसंक्रांतौग्रहणेचंद्रसूर्ययोः॥७॥पुण्यकालस्तदाज्ञेयो-
यदाप्युत्करुपस्थितः॥तदागोभूहिरण्यादिदत्तमक्षय्यतांव्रजेत्॥८॥यदावाप्राप्यतेवि
त्तंश्रद्धाचोत्पद्यतेयदा॥तदैवदानकालःस्यादनित्यंजीवितंपतः॥९॥अनंतफलदंनृणांकृ-
ष्णास्नानंमहाफलं॥सर्वदेवमयोविष्णुःसर्वतीर्थमयीगया॥१०॥सर्वधर्ममयोविप्रःस
त्संयोगोविमुक्तिदः॥कृष्णातीरेविशेषेणदानमानंसमश्नुते॥११॥एतच्छ्रुत्वामहद्वा-
क्यंस्कंदेनोक्तंद्विजर्षभाः॥पुनस्तीर्थान्यनेकानिकृष्णायांफलदानिच॥१२॥कीदृशानीति
वदनःसाकल्येनहरात्मज॥शृण्वतांत्वन्मुखांभोजान्नतृप्तिर्हिकथासुधां॥१३॥ ॥स्कं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰म दउवाच ॥ ॥ज्वालातीर्थान्महत्तीर्थंपंचबाणप्रमाणतः॥ रुद्रतीर्थंमहा पुण्यंसर्वाघौ· अ·
८९ घविनाशनं ॥१४॥ रुद्रतीर्थस्ययःकुर्याद्दर्शनंपापनाशनं॥वीतरागभयक्रोधोगतिमाप्नो ४६
तिशाश्वतीं ॥१५॥ वीतरागोनिराहारस्तेपेयत्रहिकौशिकः॥ कौशिकंतीर्थमित्याहूरुद्रती
र्थाद्धनुर्दश ॥१६॥ कौशिकीयत्रसंयुक्ताकृष्णायासरिदुत्तमा॥ तत्रस्नानंचयेकुर्युस्तेमु-
क्तानैवसंशयः ॥१७॥ तत्रस्नात्वासमभ्यर्च्यगंगामध्यगतंहरं॥ तारयेत्सप्तवैपूर्वान्तथास
प्तैवचोत्तरान् ॥१८॥ ततःसप्तकुलोद्धारंतीर्थमेतत्प्रचक्षते॥ तत्तीर्थात्प्रवरंतीर्थंकृष्णा
यांपापनाशनं ॥१९॥ शौनकस्यमहर्षेस्तदघौघस्यचनाशनं॥ तत्रस्नात्वास्वयंभूतंशंक
रंपापनाशनं ॥२०॥ अर्चयित्वासमाप्नोतिगतिमन्यत्रदुर्लभां॥ ततश्चभारतंतीर्थंदर्शनात्पा
पनाशनं॥२१॥ भरतेश्वरसंयुक्तंतत्रस्थित्वामहामतिः॥ दौष्यंतिर्भरतस्तत्रज्ञानंलब्ध्वाप
सद्गतिं॥२२॥ ॥ऋषयऊचुः॥ ॥स्कंदब्रूहिमहाभागयाज्ञवल्क्योमहामुनिः॥तत
श्चकारकिंभूयोविस्तरेणकथामृतं॥२३॥ ॥स्कंदउवाच॥ ॥शृणुध्वमृषयः सम्य·
क्चित्रंतच्चरितंमुनेः॥ याज्ञवल्क्यऋषिःपूर्वंययौतत्तीर्थमुत्तमं॥२४॥उत्तंकोपियियोकृ
ष्णांद्रष्टुंभुवनपावनीं॥उत्तंकोयाज्ञवल्क्यश्चस्नातुंमुनिगणैर्युतौ॥ २५॥ तीर्थान्यालोक्य
सहसास्नानंचक्रतुरादरात्॥ कृष्णावेणींतदादृष्ट्वाउदग्वाहांप्रतस्थतुः॥२६॥ यातांदृष्ट्वात· १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तः कृष्णांतस्तु तुर्गौरवात्स्मृतं ॥ तत्रस्तेमुनयोदेवींजगन्मान्यैरुपासितां ॥ २७ ॥ गंगांदृष्ट्वा
जगद्धात्रींमुनयोपिचतांययुः ॥ ते ऽन्योन्यमूचुः प्रत्यक्षंगंगायाः पावनींतनुं ॥ २८ ॥ पूजयामः
कथंदेवीमितितांतुष्टुवुः स्तदा ॥ ॥ ऋषयऊचुः ॥ ॥ त्वंभक्तवत्सलेत्येवंसदालोकेषु-
गीयसे ॥ २९ ॥ भक्तानामुपपन्नानांजातानोदृष्टिगोचरा ॥ ससंभ्रमागतिर्यत्रतिष्ठत्यमाश्र-
मांतिके ॥ ३० ॥ त्वंहिद्विजप्रेमरक्षार्थमाविर्भूतासियेयतः ॥ जगत्यमृतरूपायास्तास्त्वंब्रह्म
रूपिणी ॥ ३१ ॥ अजरामरतांयातिमर्त्यस्त्वत्सेवनाद्यतः ॥ कलशेन्वैवतांस्थाप्यमुनयश्चो-
र्ध्वरेतसः ॥ ३२ ॥ मर्त्यानांस्वस्तिकरणात्त्वंमहामृतवाहिनि ॥ धर्मार्थिनांमुमुक्षूणामर्थमोक्षा
दिदायिनी ॥ ३३ ॥ तत्त्वंदीनपरादेविसर्वेशेनेहकल्पिता ॥ शरण्यासर्ववर्णानांसमस्ताश्रमि
णांतथा ॥ ३४ ॥ सर्वसंजीवनीत्वंहिमर्त्यानामुपगत्वरा ॥ हंसार्जुनोत्पलदलाजलचारिणस्त्वा
मायांतिदूरगमनादपिलोयकामाः ॥ ३५ ॥ आयांत्यहोपरमहंसवराश्चदेवित्यक्त्वास्पृहांवि-
षयजामिहमोक्षकामाः ॥ ३६ ॥ ज्ञातुमिच्छाऽखिलाघघ्निप्रपाणंतुपदेपदे ॥ ज्योतिष्टोमफ-
लंदद्याद्यस्यांस्नाताः कृयातिते ॥ ३७ ॥ यद्यप्येकदिनेसम्यक्कृतत्तीरेऽनुष्ठितंद्विजैः ॥ स्व-
कर्मभक्त्यासततमच्छिद्रंतैः कृतंभवेत् ॥ ३८ ॥ ब्रह्मचारीसकामश्चगृहीभवतिनिश्चशः ॥
गृहिणोध्यानमात्रेणतेजोराज्यजयादिकं ॥ ३९ ॥ स्वस्वकामानाप्नुवंतित्वत्तोहिजननीमिव ॥ त्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰म॰ न्मूर्तिर्धवलादीर्घाकपिलाभातिदूरतः॥४०॥आगतायद्गुवंद्रष्टुंशेषस्यैवाकृतीशुभा॥य- अ॰
९० स्याश्चमाहात्म्यमहोशिवोपिजानातिनोकंजभवोपिसर्वं॥संक्षेपतोवेत्तिगुहोपियस्मात्तां ४६
त्वांकथंवेत्यशुभोमनुष्यः॥४१॥एवंसदानंदगुणांवरेण्यामानंदमूर्तिंशरणंगतानां॥गृ-
हाणपूजांस्वतनुंप्रशस्तांप्रदर्शयास्मात्कुरुवैकृतार्थान्॥४२॥ ॥नारदउवाच॥ ॥
एवंतैस्तूयमानासाजलमध्यात्समुद्गता॥प्रसन्नमूर्तिर्दिव्यांगीद्योतयंतीदिशोदश॥४३॥शं-
खचक्रगदापद्मधारिणीभक्तवत्सलां॥वरदाभयदात्रींतांदीनत्राणपरायणां॥४४॥दृष्ट्वा-
जयजयेत्युच्चैस्तवंचक्रुरनेकशः॥ततस्तैरर्पितांपूजांगृहीत्वानातिविस्तरां॥४५॥तेभ्यो
वरान्ददौकृष्णास्वस्वेष्टान्वैपृथक्पृथक्॥सबालवृद्धैःसस्त्रीकैःस्मृतातैरर्चितापृथक्॥
४६॥चिरंतेषांवरान्दत्वायथैप्रीत्याप्रसादिता॥ततस्तान्मध्यतःकृत्वाद्विधाजातामहान-
दी॥४७॥संयुक्तान्वततोऽधस्तादाश्रमंतंतथास्थितं॥मध्यादिवस्तुभिर्यस्मात्पूजितेयंम-
हानदी॥४८॥तत्संगात्मधुरंनामतीर्थंतत्प्रवरंविदुः॥तस्मिन्तीर्थेनरःस्नात्वायज्ञानांत-
पसांफलं॥४९॥प्राप्नोतिदेवास्तत्रैववरान्दधुरनेकशः॥तयोःप्रवाहयोःसंगेतीर्थंत्रैलो-
क्यपावनं॥५०॥देवास्तस्मिन्ह्रदेसर्वेजलक्रीडार्थमागताः॥मासावधिस्थितास्तत्रसर्वा
देवांगनाःशुभाः॥५१॥ताभिःक्रीडार्थमायाताःसर्वेदेवाःसवासवाः॥कंकोनाममुनिर्यत्र २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तपःपरममास्थितः॥५२॥गायत्रीजापकोनित्यंप्रत्यक्षंसमजायत॥गायत्रीतंप्रसन्ना
भूत्संगमेतपसामुने॥५३॥तत्राश्चर्यवतीदेवीगायत्रीतंवरंददौ॥गायत्र्युवाच॥किमपे-
क्षितमेतद्धिवरंवरयसुव्रत॥५४॥स्वोचितंकर्मकृतवान्यतस्त्वंब्रूहिमेवरं॥कंकऋषि-
रुवाच॥संगमेऽस्मिन्जगन्मातर्यस्त्वांजपतिभक्तितः॥५५॥तस्यवांछापूरणीयात्वया-
चागत्यसर्वशः॥ओमित्युक्त्वाततोदेवीदत्वातस्मैवरंययौ॥५६॥तस्मिन्कालेययुःसर्वेऋ-
षयोदीर्घदर्शनाः॥तंमुनिंददृशुस्तत्रब्रम्हचारिणमुत्तमं॥५७॥ ॥इतिश्रीस्कंदपु-
राणेकृष्णामाहात्म्येषट्चत्वारिंशत्तमोऽध्यायः॥ ॥शुभंभवतु॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥ ॥मुनेकृतंतपश्चोग्रंपरोपकृतयेत्वया॥ कृ
ष्णावेण्यावरोदत्तस्कंभ्यंपरमदुर्लभः॥ १॥ यद्यपिब्रह्मचारीत्वंआश्रमेचाद्यएवतु॥ स्थि
तोऽसियद्यपिततोगृहस्थाश्रमउत्तमः॥ २॥ ज्ञात्वैवंकुरुकृष्णायास्तटेपुनरनुत्तमं॥ तप
स्तेनसदातुष्टावरदास्याज्जगज्जनिः॥ ३॥ अंबाभक्तार्द्रहृदयादीनानुग्रहकारिणी॥ तस्यां
नदुर्लभंकिंचित्तुष्टायांब्राह्मणोत्तम॥ ४॥ इतिश्रुत्वामुनिर्वाक्यंऋषीणांकरुणात्मनां॥ प्रो
वाचपरमप्रीत्याप्रणम्यशिरसापुनः॥ ५॥ ॥मुनिरुवाच॥ ॥नजानेत्वांजगत्कर्त्रींस
वैषांजननीमपि॥ दर्शयध्वंभवद्भिस्त्वांप्रत्यक्षंचेत्स्वरूपामम॥ ६॥ तदावाक्यंमुनेःश्रुत्वामुन
योऽन्योन्यमब्रुवन्॥ परोपकरणार्थायवक्तव्यंकरुणाकरः॥ ७॥ याज्ञवल्क्यत्वमेवासिसर्व
ज्ञःसर्वसंमतः॥ ज्ञात्वाब्रूहिमहामायांजगदंबांवरप्रदां॥ ८॥ इतितद्वाक्यमाकर्ण्ययाज्ञव-
ल्क्योमहामुनिः॥ ध्यानंचकारसहसाभगवत्याःकृपानिधिः॥ ९॥ ऋषीणांसन्निधौतत्-
त्रगंगायाःसंगमेशुभे॥ ॥याज्ञवल्क्योवाच॥ ॥नमामिदैत्येश्वरनाशकर्त्रीं
ब्रम्हादिदेवैरपिसंस्तुतांत्वां॥ भक्तप्रियामिष्टवरप्रदांशुभांमायावतींकालहरांतमोगुणां॥
१०॥ द्विपंचवक्त्रांचतथाभुजाढ्यामनेकनागेंद्रवरैर्विभूषितां॥ भक्तप्रिया०॥ ११॥ सूर्यप्र
भारंजितनेत्रशोभांत्तांरव्यक्तवर्यांत्रिदशैकलोचनां॥ भक्तप्रिया०॥ १२॥ तपोमयांत

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रू०म सजनाघहारिणींसकामवांछाप्रदांमुनिस्तुतां ॥ भक्तप्रिया० ॥ १३ ॥ शंखाब्जचक्रे अ०
९२ षुभृशुंडशूलगदाधनुःपरिघंशीर्षखड्गैः ॥ भक्तप्रिया० ॥ १४ ॥ इत्थंस्तुत्वायाज्ञवल्क्यो ५७
महाकालींत्रयीमयीं ॥ महामायांमहहृद्यांदर्शनादिष्टदायिनीं ॥ १५ ॥ प्रणम्यसहसातो
लुमुनिभिःसंशितव्रतैः ॥ प्रादुर्बभूवसामायाजगादसुमुनिसत्तमं ॥ १६ ॥ वरंवरयचाभी
ष्टंयाज्ञवल्क्यमहामुने ॥ मदीयंदर्शनंलोकेनृणांकामप्रदंस्मृतं ॥ १७ ॥ श्रुत्वेतितन्नि
गदितंपरोपकृतयेमुनिः ॥ प्रोवाचविस्मयाविष्टोजगदंबांमुदायुतः ॥ १८ ॥ महाकालि
महामायेभक्ताभीष्टप्रदायिनि ॥ त्रयीमयेत्रिलोकज्ञेब्रम्हण्येभक्तवत्सले ॥ १९ ॥ तिष्ठत्वं
कृष्णावेण्याश्चतटेभक्तानुकंपिनी ॥ अस्मैत्वंमुनयेकामान्पुत्रपौत्रादिसंपदः ॥ २० ॥ दे-
हि धन्येकृपापूर्णेभुक्तिंमुक्तिंतथाशुभां ॥ ॥ देव्युवाच ॥ ॥ अवश्यंभाविनो-
ह्यर्थाभविष्यंतिमहामुने ॥ २१ ॥ मनोरथोपिभवितामुनेराश्रमवासिनः ॥ अहंतिष्ठामिस
ततंयुष्मद्वाक्याभियंत्रिता ॥ २२ ॥ अन्यान्वरान्प्रदास्यामिवांछितार्थान्मनोगतान् ॥ ब्रू
हित्वंयाज्ञवल्क्येहजनानामुपकारतः ॥ २३ ॥ याज्ञवल्क्योपितच्छ्रुत्वामहाकाल्याःप्रभाषि
तं ॥ उच्चैःप्रहस्यसहसाप्रोवाचवदतांवरः ॥ २४ ॥ तमोमूर्तियतोदृष्ट्वात्वांदेवींचभयानकां
॥ नभजिष्यंतिमनुजायतस्त्वंसौम्यतांव्रज ॥ २५ ॥ श्रुत्वैवंमुनिवाक्यंसादेवीभगवतीत १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दा॥रूपंजग्राहरुचिरंमुनीनांपश्यतांसतां॥२६॥तांदृष्ट्वामुनयःसर्वेजग्मुर्विस्मयमादृ
ताः॥चतुर्भुजांमहादेवींमहिषासुरमर्द्दिनीं॥२७॥मुक्ताहारसमायुक्तांकटिसूत्रविराजि
तां॥सूर्यकोटिप्रतीकाशांदेवींकात्यायनींतदा॥२८॥चतुःषष्ट्यायोगिनीभिर्नीराजित॥
पदांबुजां॥नमनंचक्रिरेसर्वेमुनयःसंशितव्रताः॥२९॥कात्यायनिनमस्तेस्तुश्रीपीठेसु
रपूजिते॥नमस्तेगरुडारूढेनमस्तेहंसवाहिनि॥३०॥नमस्तेवृषभारूढेकात्यायनिनमो
स्तुते॥पद्मासनस्थितेदेविपरब्रम्हस्वरूपिणि॥३१॥त्राहिनोदेविकल्याणिकृष्णाती
रेचिरंवस॥इदंस्तोत्रंपठेन्नित्यंश्रावयेद्वासमाहितः॥३२॥दुष्टानांनाशनंचैवजाड्यानां
भ्रांतिभंजनं॥आयुष्यंचतथाऽरोग्यंसर्वापदनिवारणं॥३३॥भौमवारेभृगोर्वारेअष्टम्यां
नवमीदिने॥चतुर्दश्यांपूर्णिमायांदर्शनात्सर्वसाधनं॥३४॥तेषामेवंवरंदत्वाभक्त्यात·
त्रावसच्चिरं॥गंगातीरेतदादेवीभक्तानांप्रीतिवर्द्धिनी॥३५॥कंकनामापिगृहिणींचक्रे
तत्रभृगोःसुतां॥तस्यांपुत्रान्महायोगीजनयामाससुव्रतान्॥३६॥ऐश्वर्यमतुलंप्राप
चिरंदेव्याःप्रसादतः॥याज्ञवल्क्यादिमुनयस्तांपूज्याथविनिर्गताः॥३७॥श्रुत्वा
ध्यायमिमंसम्यक्श्रद्धयामनुजोत्तमः॥सर्वपापविनिर्मुक्तःकृष्णानुग्रहतोभवेत्
॥३८॥ ॥७॥ ॥इतिश्रीस्कंदपुराणेश्रीकृष्णामहात्म्येस

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कू॰म ‖ सप्तचत्वारिंशोऽध्यायः ॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥शुभं०॥ ‖ अ॰
१३ ४७

२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥सर्वेतेमुनयोगंगांद्रष्टुंह्यग्रेततोगताः॥सं-
गमात्पुरतस्तीर्थंभार्गवाख्यंतमोनुदं॥१॥यत्राद्यापिजपन्मंत्रान्भ्रातर्वसतिभार्गवः॥माहा-
त्म्यमतुलंतस्यवक्तुंवर्षशतैरपि॥२॥नशक्यतेहिपरमंगुह्यंप्राक्सर्वसिद्धिदं॥ब्रह्मविष्णुशि
वानांसरूपंजिज्ञासुरुत्तमः॥३॥पदाहनद्यदाविष्णुंतदासात्विकमब्रवीत्॥मुनीनांसस
भांगत्वावर्णयामाससादरं॥४॥अच्युतंकमलाकांतंभक्तवत्सलमव्ययं॥शांतंनिजस्वरू-
पाद्यंक्षमायास्तन्निकेतनं॥५॥श्रुत्वातद्वाक्यमस्यग्रंपादेनाहतमच्युतं॥अन्योन्यमालो
क्यतदाभृगुंसर्वज्ञतार्किकं॥६॥ब्रह्मणोवरदोदेवोजगद्व्यापीजनार्दनः॥कथंतंस्वपदाह
त्वापावनोऽसिमहीतले॥७॥तद्वाक्यंवज्रसदृशंभृगुःश्रुत्वाऽतिखिन्नधीः॥निष्कृतिं-
ब्रूतमुनयोयथापूतोभवाम्यहं॥८॥निर्द्रोहिणंकुरुध्वंमांकृपयाजगदीशितुः॥तच्छ्रुत्वामु
नयःसर्वेकृपयाऽभिपरिप्लुताः॥९॥भृगुंप्रोचुःकृष्णावेण्यां संगमंतीर्थमव्ययं॥
विश्वतारकसंज्ञंन्चगत्वायाहिपवित्रतां॥१०॥कृष्णादर्शनतःकिंचित्स्पर्शात्पापंतथैवच॥
स्नानात्ततीरतपसःकरणात्क्षिप्रमेवहि॥११॥सर्वंनश्यतितेपापंस्नानाद्दानतःकृतं॥त
त्सेवनाच्चैवभृगोभृगुतीर्थंभविष्यति॥१२॥तद्वाक्यश्रवणात्तत्रगत्वातत्राकरोत्तपः॥तप-
साद् तेनंप्रासोभृगोर्विष्णुःसनातनः॥१३॥तंदृष्ट्वापूजयामासकेशवंभार्गवस्तदा॥निष्पापो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिन्कृष्ेयुल्कानांतर्धानंसमाययौ॥ १४॥ इतिहासमिमंपुण्यंश्रावयेच्छृणुयादपि॥ ब्रह्महत्या
दिपापानिजन्मजन्मार्जितान्यपि ॥१५॥ नश्यंत्येवनसंदेहः कृष्णवेण्याः प्रसादतः॥१६॥ ॥
इतिश्रीस्कांदेकृष्णामाहात्म्ये अष्टचत्वारिंशत्तमोऽध्यायः॥४८॥ ॥७॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥भृगुतीर्थेततोजग्मुर्याज्ञवल्क्यादयोद्विजाः
यानियानिचतीर्थानिस्नातुंभक्त्यातपस्विनः॥ १॥ जंबुतीर्थेततोजग्मुःसिद्धिंयत्रापजांबवान्
जंबुतीर्थस्यमाहात्म्यंवक्तुमिच्छामिभोद्विजाः॥ २॥जांबवान्रामपादाब्जरजसासुतऐक्ष्यवा
न्॥ राममेवसदाध्यायन्मेघश्यामंकृपानिधिं॥ ३॥युगांतरेततःकृष्णंस्यमंतार्थिनमागतं॥
युद्धांतेकृष्णमूर्तितांराममूर्तिंददर्शह॥ ४॥आहित्राहीत्युक्त्वाचैनंवचसाकरुणानिधिं॥प्रणम्य
प्रददौकन्यारत्नंकृष्णायभक्तितः॥ ५॥स्वामिद्रोहकृतंपापंकेनगच्छतिसत्वरं॥इतिस्मपृच्छस
ऋषीन्जांबवान्परमादरात्॥ ६॥स्ववृत्तांतंनिवेद्याथतीर्थयात्रार्थमुद्यतः॥ऋषयस्तंतदा-
ऽब्रुवुस्तत्पापक्षालनायच॥ ७॥धन्योसिऋक्षवर्यस्त्वंधन्योसिमहतामपि॥ संपादितंकृ
ष्णवाक्यंतथापिकुरुनिष्कृतिं॥ ८॥कृष्णावेण्यामहत्तीर्थंविरजाख्यंसुपुण्यदं॥भृगुतीर्था-
ग्रतोबाणत्रितयावधिचोत्तमं॥ ९॥ तत्तीर्थेवसतोनित्यंतवपापंविनश्यति॥श्रुत्वातदैवसह
साऋक्षराजोमहामनाः॥ १०॥गंगांजगामशुध्यर्थंब्राम्हणानांवचस्मरन्॥षण्मासावधितत्र
स्थोजांबवान्राममच्युतं॥ ११॥पूजयामासविधिवद्गंगास्नानपरायणः॥प्रादुर्बभूवगंगातुतमु
वाचकृपानिधिः॥ १२॥जांबवन्गतपापस्त्वंत्वन्नाम्नातीर्थमुत्तमं॥ख्यातियास्यतिमत्तीरे
स्नानात्पातकनाशनं॥ १३॥इत्युक्त्वांतर्हितादेवीतीर्थेसाविष्णुरूपिणी॥जांबवानाश्र-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मंकृत्वातीर्थेतेजः समादधौ॥१४॥ जंबुलीर्थेनरः स्नात्वादृष्ट्वातत्रस्थितंशिवं॥ सर्वपापवि
शुद्धात्माब्रह्मत्वंप्राप्नुयाच्चिरं॥१५॥ श्रुत्वारव्यानमिदंसम्यक्तीर्थेजांबवलःक्रमात्॥ तत्ती-
र्थस्नानजनितंपुण्यमाप्नोतिमानवः॥१६॥ ॥इतिस्कं॰ एकोन॰ ध्यायः॥ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥श्रीगणेशायनमः॥ऋषयऊचुः॥मानुष्यंदेहमालंब्यकृष्णःपरबलार्दनः॥चकार
सर्वकर्माणिप्राकृतोऽन्योयथागुह॥१॥अनागसंजांबवंतंयुद्धेनापीडयत्कथंमण्य-
र्थेसदसिप्रोक्तंतस्मात्सत्राजितंरुषा॥२॥कृष्णाभीत्यामणिंसोपिप्रसेनायस्वबंधवे॰
॥दत्तवान्सोप्यरण्येषुमृगेंद्रेणनिपातितः॥३॥तंहत्वाजांबवान्रत्नमहरत्स्वगुहांगतः
॥अस्मिन्नर्थेसंशयोनस्तंछिंधिबहुलात्मज॥४॥स्कंदउवाच॥इतितत्प्रश्नसंहृष्टः
कार्तिकेयोमहामतिः॥उवाचकृपयाविष्टोविचित्रंतत्कथानकं॥५॥शृणुध्वमृषयः
सर्वेकथांपौराणिकींशुभां॥कृष्णस्यचरितप्रख्यांसर्वपापप्रणुदांशुभां॥६॥पापस्पर्शो
नवैजातुकृष्णस्याक्लिष्टकर्मणः॥तथापिलोकशिक्षार्थेधृतदेहस्यभूतले॥७॥कृष्णः
स्वपापनाशार्थेलोकान्कर्मस्वयोजयन्॥ब्राम्हणान्स्वयमाहूयनिष्कृतिंसमपृच्छत॥८
परेषांद्रोहजंपापंकुत्रनश्येद्वदंतुमां॥नैचाहंनिष्कृतिंकुर्यात्कर्मणांसंकरोभवेत्॥९॥
ब्राम्हणाऊचुः॥ब्रम्हहत्यादिपापानितथाचासंतपापिनांनश्यंतियस्यनामोक्त्यातस्यकिं
तवपातकं॥१०॥अवशोपिगिराब्रूतेकृष्णकृष्णेतिनामते॥सद्योमुक्तिमवाप्नोतितस्य
किंपातकंगुरो॥११॥कृष्णउवाच॥सत्यमुक्तंभवद्भिस्तुतथापितनुधारणात्॥अवश्यमेवक
र्तव्याज्ञात्वानिष्कृतिरात्मनः॥१२॥तीर्थंतीर्थविदांश्रेष्ठाःसद्यःपापनुदंद्विजाः॥वदंतुसर्व-

१ टी०-नचेदहमित्यर्थः

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ.म पापघ्नंभुक्तिमुक्तिप्रदायकं॥१३॥श्रु त्वेतिवाक्यंमुनयः कृष्णास्यकरुणात्मनः॥ऊचुःस्ते अ.
१५ कृपयाविष्टाः सर्वज्ञंजगदीश्वरं॥१४॥ऋषयऊचुः॥पृथिव्यांयानितीर्थानिक्षेत्राणिविवि ५०
धानिच।भुक्तिमुक्तिप्रदान्येवपापक्षयकराणिच॥१५॥वक्ष्यामस्तानिसर्वज्ञशृणुष्वैकम
नागुरो॥मथुराद्वारकामायाअयोध्याकांच्यवंतिका॥१६॥काशीक्षेत्रंकुरुक्षेत्रंहरिक्षेत्रंच
पुष्करं॥नैमिषंचप्रभासंचगंगासागरसंगमः॥१७॥महेंद्रपर्वतश्चैवसेतुबंधस्तथैवच॥गया
चत्रिविधाप्रोक्ताश्रीरंगंतीर्थमुत्तमं॥१८॥गंगागोदावरीचैवयमुनाचसरस्वती॥गोमती
शरयूचैवकृष्णावेणीमहानदी॥१९॥तुल्यंहितीर्थसंघानांपुण्यमस्मन्मतंहरे॥सर्वज्ञोसि
विचार्यैवंतीर्थंस्वाभिमतंव्रज॥२०॥इतितद्वाक्यमाश्रुत्यप्रहस्यजगदीश्वरः॥प्रोवाच
वासुदेवस्तान्सर्वलोकोपकारकं॥२१॥तीर्थंतत्कृष्णावेण्यांचप्रसिध्धंजनपावनं॥पापनाश
नसंज्ञंयद्भार्गवाद्वाणयुग्मकं॥२२॥युष्मद्वाक्यामृतंश्रुत्वागच्छाम्यादरतोद्विजाः॥अन्य
त्रलभतेपुण्यंनृभिर्वर्षशताधिकैः॥२३॥त्रिरात्रेणसदापुण्यंकृष्णातीरेमुनीश्वराः॥तरल
तरतरंगाकृष्णावेणीकिलैकासकलपतितदोषातंकहाकामधेनुः॥तदिहसकलतीर्थेष्वाव
धिःशेवधिर्याधनददिशिवहंतीसर्ववांछाप्रदात्री॥२४॥सर्वपापक्षयकरीकृष्णाचोत्तरवा
हिनी॥तत्रैवगमनंयुक्तंपापनाशनतीर्थके॥२५॥नजान्हवीनयमुनापुष्करंगोमतीनच १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरस्वतीहरिक्षेत्रंयथाकृष्णोत्तरावहा॥२६॥स्नानंचोत्तरवाहिन्यांसर्वपापक्षयंकरं॥वा-
जपेयफलंदानात्तीरवासाच्चनिर्वृतिः॥२७॥सर्वतीर्थाधिकागंगाकृष्णवेणीशुभप्रदा॥
उदग्वहामहादोषनाशिनीमुक्तिदायिनी॥२८॥इतिश्रुत्वामुनेर्वाक्यंकृष्णस्यपरमात्मनः
सर्वेप्रहृष्टम सस्तीर्थज्ञानविशारदाः॥२९॥ऊचुःप्रांजलयस्तज्ज्ञाः कृष्णंत्रिभुवनेश्वरं॥गं
तव्यंकृष्णवेणींतांकृष्णाऽस्माभिःकृभक्तितः॥३०॥मासावधिंवापक्षंवास्नानदानार्थ
मेवच॥श्रुत्वामुनीनांवचनंस्वानुकूलंतदाहरिः॥३१॥सर्वेषांरव्य.पनायाथघोषया-
मासदुंदुभिं॥सर्वैः कृहद्भिर्विप्रैश्चकृष्णवेणींययौहरिः॥३२॥आराद्दृत्वावासुदेवःकृष्णां
चोत्तरवाहिनीं॥वेणुनादंततश्चक्रेनानास्वरविभूषितं॥३३॥तच्छ्रुत्वासहसाजग्मुःकृराब्र
ह्मादयोहरिं॥नमश्चक्रुर्वासुदेवंगंगातीरेतपस्विभिः॥३४॥धन्येयंकृष्णवेणीचततोपि
भवदंशजा॥जनाघंहंतुकामेनत्वयाकृष्णाविनिर्मिता॥३५॥कृष्णःप्रोवाचतान्सर्वान्स्नानं
कुर्वंतुसादराः॥स्नात्वाकृष्णोपिसहसाआयुतंगाःसमाददौ॥३६॥ब्राम्हणेभ्यस्तथादानं
स्वर्णरत्नांबरादिकं॥भोजनंब्राम्हणेभ्यश्चएवंसप्तदिनंहरिः॥३७॥तदंतेदर्शनंतस्यकृष्ण
वेण्याबभूवह॥कृष्णस्यधर्मगुप्त्यर्थंलोकयात्राकृतस्यच॥३८॥तांदृष्ट्वासहसोत्थाय
कृष्णःसपुरुषोत्तमः॥उवाचमुनिभिःदेवैःप्रीत्यागद्गदवाग्घरिः॥३९॥कृष्णउवाच॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृ॰म॰ कृष्णावेणिनमस्तेस्तुपावनेत्वंपरायणे॥पापघ्निकामदेदेविविचित्रंचरितंतव॥४१॥ अ॰
९६ एकजन्मनिमेकृष्णेपापंपुण्ययुगेकृतं॥दर्शनंचिरमेतत्तुवदकृष्णेस्तुपावनि॥४२॥कृ०॥ ५०
कृष्णकृष्णमहायोगिन्जगन्मयनमोस्तुते॥संसारसागराज्जंतूनुद्धर्तुंत्वमिहागतः॥
४३॥यस्यनामोदयःसूर्यःपापनीहारसंहतिं॥नाशयत्येवसहसातवपापंकुतोभवेत्॥४४
॥त्रैलोक्यपावनार्थायलोकशिक्षार्थमेवच॥तीर्थयात्राकृतास्वामिन्भवताकरुणात्मना॥
॥४५॥त्वांयाचेकरुणापूर्णमत्तीरेपुरुषोत्तम॥तिष्ठसर्वैःसुहृद्भिस्त्वंस्वकैर्मुनिगणैस्तथा
॥४६॥त्वन्नाम्नातीर्थमेतत्तुख्यातिंयास्यतिपावनं॥कृष्णातीर्थेनरःस्नात्वाकृष्णास्मर-
णतत्परः॥४७॥जन्मजन्मार्जितैःपापैर्मुच्यतेनात्रसंशयः॥अयमेववरोदेयोदेवेष्वपिसु
दुर्लभः॥४८॥अविलंबेनमेस्वामिन्वियोगभयहेतुतः॥प्रहस्यवासुदेवोपिश्रुत्वावा-
चंसतांहरिः॥४९॥एवमस्त्वितितत्तीर्थरूपीपरमपावनः॥त्रिलोकींपावयन्तत्रस्थितो
मुनिगणैःसह॥५०॥विचित्रमिदमाख्यानंश्रावणात्पापनाशनं॥श्रावयेद्यःसदाभक्त्या
वांछितार्थान्समाप्नुयात्॥५१॥ ॥इतिस्कांदेकृष्णामाहात्म्येपंचाशत्तमोऽध्या
यः॥छ॥ ॥छ॥ ॥छ॥ ॥शुभंभवतु

२

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥कृष्णातीर्थात्पुरोभागेबाणयुग्मप्रमाणतः॥
आदित्यतीर्थमित्युक्तं सद्यः सर्वाघनाशनं॥१॥जपस्तपस्तथादानंहोमःश्राद्धंतिलोदकं
॥तत्राक्षयंभवेन्नित्यंकृष्णावेण्यांद्विजोत्तमाः॥२॥आदित्यहृदयंनित्यंपठेत्तीरेपुमान्स्तुयः
सप्तजन्मार्जितैःपापैर्मुच्यतेनात्रसंशयः॥३॥तत्रस्नात्वातमभ्यर्च्यनदीमध्यगतंहरिं॥
सर्वपापविशुद्धात्माभित्वाचंडांशुमंडलं॥४॥सयातितत्पदंशुद्धंपूतात्माह्यघवानपि॥
कृष्णायांचततस्तीर्थंमुद्गलाख्यंमहत्तरं॥५॥बाणयुग्मप्रमाणंतुस्नानात्सद्गतिदंनृ-
णां॥पुरतोबाणषट्केनविदुरस्यमहात्मनः॥६॥तीर्थंषट्धनुषांसम्यक्सर्वपापहरंद्वि
जाः॥ज्ञानदंसर्वलोकानांयमलोकनिवारणं॥७॥पृथक्फलानितीर्थानिसंत्यस्मिन्वैप
देपदे॥तीरद्वयेतथामध्येपापघ्नानिनसंशयः॥८॥तीर्थानिकृष्णावेण्यांतुबहूक्त्याकिंम
योच्यते॥यत्स्पर्शपुण्याच्चरहःप्रदुष्टंपापंजनानांविधुनोतिवायुः॥९॥ध्वांतंयथार्कोज
गतांधुनोतितांविस्तराद्वर्णयितुंकईष्टे॥ततश्चशातलिंगायाः संगमोमुक्तिदःस्मृतः॥१०
॥क्रौंचतीर्थंततोयत्रसिद्धिंक्रौंचमुनिर्ययौ॥यज्ञवाटंततःपूर्वंविदुरस्यमहात्मनः॥११
॥तत्रस्नात्वानरोभक्त्यावाजपेयफलंलभेत्॥ततश्चषण्मुखःसाक्षात्कृष्णांद्रष्टुंसमाय
यौ॥१२॥गौरीतत्रययौपश्चात्पुत्रसंदर्शनार्थिनी॥स्वयंभूःशंकरश्चापितत्रसंन्निहितः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰ म सदा॥१३॥विनायकस्तुयत्स्नेहात्समायातोगणैःसह॥तत्रैवसन्निधिंचक्रुःसर्वेतत् अ॰
९७ स्थानगौरवात्॥१४॥तत्तीर्थंसर्वपापघ्नंसर्वसिद्धिकरंसदा॥कुमारालयमित्येतत्प्रख्या- ५१
तंभुवनत्रये॥१५॥कुमारस्यप्रियंस्थानंसर्वदासर्वसिद्धिदं॥पापानितत्रनश्यंति महापात-
किनामपि॥१६॥सृष्टगायास्ततःसंगःसर्वपापहरःशुभः॥स्वयंभूःशंकरस्तत्रसदास्तेभ
क्तवत्सलः॥१७॥पुरतस्तत्रवैतीर्थंसीताह्रदमनुत्तमं॥यत्रसीतासुखंलेभेलक्ष्मीमारा
ध्यभक्तितः॥१८॥तत्रस्नात्वानरोभक्त्यापूतःस्वर्गतिमाप्नुयात्॥ऋषयऊचुः॥ततः
किमभवत्स्कंदयाज्ञवल्क्येनतापसैः॥१९॥संवादोज्ञानदःसर्वैस्तीर्थयात्राविशारदैः॥सूत
यावदसर्वज्ञस्यमहात्म्यंविशेषतः॥२०॥ इतितत्प्रश्नसंतुष्टहृदयोमुनिपुंगवः॥प्रोवाचका
र्त्तिकेयस्तुऋषीन्धर्मार्थसंहितं॥२१॥कृष्णवेण्यांतदाचक्रुर्यानितीर्थानिस्कश्रताः॥स्नात्वा
स्नात्वातथाज स्वाऋषयोभक्तितत्पराः॥२२॥कृष्णातीर्थेतदासस्कः क्षणंविश्राम्यतत्तटे॥
मुद्गलतीर्थमालोक्यक्रौंचतीर्थंततःपरं॥२३॥सीताह्रदंततोजग्मुःस्नात्वाचपरमादरात्
संध्यांकृत्वाततोजग्मुर्द्रौपदीतीर्थमुत्तमं॥२४॥धर्मतीर्थंसमालोक्यधौम्यतीर्थंतथैवच
॥तीर्थानामुत्तमंतीर्थंशंखतीर्थमनुत्तमं॥२५॥पार्वतीयंचतेगत्वायाज्ञवल्क्यंऋषीश्वराः
समपृच्छन्कथंतीर्थंद्रौपद्याख्यंभुविश्रुतं॥२६॥जातंकथंहिधर्मस्यधौम्यस्यचपुनर्वद १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शंखतीर्थस्यमाहात्म्यंकृष्णायांभुविविश्रुतं॥२७॥स्कंदउवाच॥ धर्मराजोयदाप्राप्यरा-
ज्यंकृच्छात्गजाह्वये॥ ब्राम्हणेधौम्यमामंत्र्यप्रोवाचकृष्णासन्निधौ॥२८॥ज्ञातयःसुहृ
दोबुध्यागुरवोवैमयाहताः॥तत्पापनिष्कृतिःकुत्रप्रोच्यतांस्नानदानतः॥२९॥तादृशंप्र
वरंतीर्थमद्राज्येपुण्यसंचयः॥भवितातत्समालोच्यशीघ्रंब्रूततपोधनाः॥३०॥मनसालो
च्यसिध्याचप्रोचुस्तीर्थमनुत्तमं॥ऋषयऊचुः॥अथतीर्थंप्रवक्ष्यामःशृणुत्वंमनुजैःसह॥
३१॥ज्ञातिक्षयकृतात्पापान्मुच्यसेत्वंयुधिष्ठिर॥तच्छ्रुत्वासानुजोधर्मःप्रांजलिश्चोक्तवा
न्मुनीन्॥३२॥शीघ्रंब्रुवंतुभोविप्राःसर्वज्ञाःकरुणाकराः॥ब्राम्हणाऊचुः॥जयंतीनगरेकृ
ष्णासर्वपापप्रणाशिनी॥३३॥अस्थीन्यत्रजलस्पर्शात्षण्मासात्पृथिवीपते॥शिलारूपा
णिजायंतेकिमतस्तीर्थमुत्तमं॥३४॥तच्छ्रुत्वाधर्मराजोसौब्राम्हणैर्बंधुभिःसह॥केशवेनच
संयुक्तोहस्त्यश्वादिभिरावृतः॥३५॥धौम्येनस्वजनैर्भक्त्याप्रजाभिर्सुखव्यवृत्तिभिः॥प्रय-
यौपांडवःश्रीमान्जयंतींमहतींपुरीं॥३६॥हृष्टपुष्टजनाकीर्णांगोपुरैरुपशोभितां॥चतु
र्द्वारांमहापद्मसदृशांलोकरक्षकां॥३७॥दृष्ट्वेंद्रनगरीतुल्यांराजाहर्षसमाकुलः॥क्रोशा
र्द्धांदंतिकंयानादुत्तीर्यपरमादरात्॥३८॥पादाभ्यांप्रययौधीमान्तथासर्वैर्द्विजातिभिः॥कृ
ष्णांदृष्ट्वाधर्मराजाप्रणनामसुहुर्मुहुः॥३९॥सर्वेलोकास्तदाकृष्णांनमश्चक्रुर्मुदान्विताः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 गंगातीरेतदागत्यस्नानंचक्रुर्यथाविधि॥४०॥धौम्यमामंत्र्यचापृच्छद्दातुंदानानिभक्तितः
 केभ्योदानंप्रदातव्यंवक्तव्याःपात्रपात्रता॥४१॥पात्रापात्रविचारेणकृतंदानंसुपुण्यदं॥
वक्तव्यंविस्तराद्धौम्यकृष्णातीरेविशेषतः॥४२॥धौम्यउवाच॥दानानिविविधानीह स
र्वथाकर्तुमर्हसि॥पात्राणिकथयिष्येत्वांतदिहैकमनाःशृणु॥४३॥नदद्याद्यशसेदानंन
भयान्नोपकारिणे॥ननृत्यगीतशीलेषुहासकेषुचधार्मिकः॥४४॥नमत्तेनैवचोन्मत्ते-
नस्तेयेनचिकित्सके॥नवाग्हीनेविवर्णेवानांगहीनेनवामने॥४५॥नदुर्जनेदौःकुलेवाव्र-
तैर्वायोनसंस्कृतः॥यत्श्रोत्रियमृतेदानंदानंब्रम्हविवर्जिते॥४६॥असम्यक्चैवयद्दत्त
मसम्यक्चप्रतिग्रहः॥उभयोःस्यादनर्थायदातुरादातुरेवच॥४७॥यथाखदिरमालंब्य-
शिलांवाप्यर्णवंतरेत्॥मज्जन्मज्जन्नधोयातितद्दातामप्रतिग्रही॥४८॥काष्ठैरार्द्रैर्यथाव
न्हिरुपस्तीर्णोनदीप्यते॥तपःस्वाध्यायचारित्रैरेवंहीनःप्रतिग्रही॥४९॥कपालेयद्वदाप
स्तुःश्वदृत्तौचयथापयः॥आश्रमस्थानदोषेणवृत्तिहीनेतथाकृतं॥५०॥यथादारुमयो
हस्तीयथाचर्ममयोमृगः॥ब्राम्हणश्चानधीयानस्त्रयस्तेनामधारकाः॥५१॥यथाषंडर
तिःस्त्रीषुयथागौर्गविवाऽफला॥शकुनिर्वाप्यपक्षःस्यान्निर्मंत्रोब्राम्हणस्तथा॥५२॥-
ग्रामधान्यंयथाशून्यंयथाकूपश्चनिर्जलः॥यथाहुतमनग्नौचतथैवस्यान्निरक्षरः॥५३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवतानांपितॄणांचहव्यकव्यविनाशकः॥ शत्रुरर्थहरोमूर्खोनलोकान्प्राप्तुमर्हति ॥५४॥
एवंज्ञानविधिःप्रोक्तोमयातुभ्यंयुधिष्ठिर॥ एवंज्ञानग्रहेचेष्टोविशेषंशृण्वतःपरं॥५५॥
तीर्थेष्वागतविप्राश्चतत्तीरएवसंतिच॥तेब्राह्मणाःपवित्राश्चसर्वदानेषुवैवराः॥५६॥
तेषांदत्तंकिंचिदपितदानंत्रायकस्थले॥पात्रापात्रंविचार्यैवंगंगातीरेऽतिपावने॥५७॥
दानंदद्यात्प्रयत्नेनयुधिष्ठिरनसंशयः॥इतिश्रुत्वाचतद्वाक्यंप्रहस्यचयुधिष्ठिरः॥५८॥
दत्तास्तनेभ्योविप्रेभ्योदानानिसुबहून्यपि॥प्रत्येकंभारमेकैकंसुवर्णंगोसमन्वितं॥५९॥-
प्रपास्यविधिवत्पिंडानूत्तातांतुद्दिश्यवारिणा॥तुलापुरुषदानंयैसर्वदानोत्तमोत्तमं॥६०॥
हयंगजांश्चान्नदानंश्रद्धयातत्रदत्तवान्॥तदासंतुष्टमनसःसर्वेदानंप्रचक्रिरे॥६१॥द्रौप
द्याधर्मराजस्यधौम्यस्यचमहात्मनः॥त्रयाणामपितीर्थानिनाम्नातेषांपृथक्पृथक्॥६२॥
बभूवुःसतुलांचक्रेसपत्नीकोसुदान्वितः॥तुलायामेकभागेतुस्वयंवैसंस्थितःशुचिः
॥६३॥सुवर्णरत्नवैडूर्यप्रवालमौक्तिकानिच॥निधायभागेचान्यस्मिन्ब्राह्मणेभ्यःप्रद
त्तवान्॥६४॥भूरिश्राद्धंततःकृत्वागोदानानितथैवच॥पौरुषेःपावमान्यैश्चरुद्रसूक्तै
स्तथैवच॥६५॥अभिषिच्यमहालिंगंस्वयंशंरवेनसंहरिः॥सुवर्णकुसुमैःपूज्यबिल्वप-
त्रैस्तथैवच॥६६॥धूपदीपैःसुनैवेद्यैर्दक्षिणामंत्रपुष्पकैः॥दीपमालादिभिश्चापिसंपू-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्यशशिशेखरं ॥ ६७॥ ब्राम्हणानांभोजनैश्चकोटिसंख्यामितैर्नृपः ॥ कुब्जांधबधिरादि-
भ्यस्त्वनाथेभ्यस्तथैवच ॥ ६८॥ वस्त्राण्जिकंबलादीनियथायोग्यंयुधिष्ठिरः ॥ ततोहर्षात्
कृष्णवेण्यास्तीरेराजायुधिष्ठिरः ॥६९॥ जयंतीनगरेभक्त्याद्रव्यंतृणवदुत्तमं ॥ द्विजेभ्यः क्षे-
त्रवासिभ्योदानानिचपृथक्पृथक् ॥ ७०॥ राजानंतत्रतिष्ठंतंमंत्रिणः शरणंययुः ॥ गजाव्हयं
परित्यज्यगंगातीरेकथंवसेः ॥ ७१॥ किमर्थंसाहसमिदंभवताकरुणात्मना ॥ कुलंराज्ञः
परोधर्मोयत्प्रजानांस्फुरक्षणं ॥ ७२॥ नलोनीलश्चमांधातामनुश्चापिशिबिस्तथा ॥ अंबरीष-
पृथुश्चापियेचान्येभूभुजोत्तमाः ॥७३॥ प्रजापालनधर्मेणतीर्णाः सर्वेभवांबुधिं ॥ नान्यत्कुर्वं
तिराजानः प्रजानांरक्षणंविना ॥ ७४॥ वार्षिकंकरमादायप्रजानांरक्षणंविना ॥ रौरवेनिप
तंत्येवतस्मात्कुर्यात्प्रजावनं ॥ ७५॥ दस्युभिः पीडितास्तत्रप्रजाः परमदारुणैः ॥ तस्माद्गं
म्यतांराजन्गंगातीराद्गजाव्हयं ॥ ७६॥ अयमेवमहान्धर्मोइदमेवपरंतपः ॥ इदमेवपरंज्ञानं
यत्प्रजानांस्फुरक्षणं ॥७७॥ इतितेषांवचः श्रुत्वाधर्मराजोमहामतिः ॥ अवश्यमितिनिश्चि
त्वातान्कृष्णवाक्यानुमोदितः ॥७८॥ तथापिकृष्णांपापघ्नींत्यक्तुंनोत्सहतेमनः ॥ ब्राम्ह
णानांतदाश्रुत्वावाक्यानित्समहीपतिः ॥ ७९॥ प्रत्युवाचतदावाक्यंखिन्नः परमधर्मवि-
त् ॥ अभाग्यानांकथंतत्तुपीयूषंजीर्यतेपुनः ॥ ८०॥ प्रासादयांकृष्णावेणायांप्रातसंविभ्रमंमह-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्तरं ॥ तस्माद्विप्रा भवंतस्तस्मात्तीरे पुण्यात्मनां नहि ॥ ८१ ॥ किं कर्तव्यं मया त्वद्य प्रवदंतु मु-
नीश्वराः ॥ मुनय ऊचुः ॥ धर्मोऽयं महतां राजन्प्रजानां परिपालनं ॥ ८२ ॥ ब्राम्हणानां राजभि-
श्च गंगातीरनिवासिनां श्रोत्रियाणां निस्पृहाणां रक्षणं वान्नदानतः ॥ ८३ ॥ तथा स्वप्राणदा-
नं च परोपकृतये सदा ॥ दधीचिश्चोंछवृत्तिश्च शिबिश्चापि बलिस्तथा ॥ ८४ ॥ तस्मात्त्व-
या कार्यमेतत्सावधानेन चेतसा ॥ प्रजानामुपकारार्थं गच्छ त्वं हास्तिनापुरं ॥ ८५ ॥ रक्षणा-
द्ब्राम्हणानां ते सर्वपुण्यं भवेच्चिरं ॥ परोपकृतये नित्यं यो यत्र निवसेन्नरः ॥ ८६ ॥ तत्र तस्य
भवेद्गंगा यमुना च सरस्वती ॥ काशी गया कुरुक्षेत्रं कृष्णावेणी च पुष्करं ॥ ८७ ॥ माहात्म्य-
श्रवणान्नित्यं तीर्थसेवनजं फलं ॥ विज्ञाय तीर्थमाहात्म्यं तीर्थे यः श्रद्धयान्वितः ॥ ८८ ॥ से-
व्यते तीर्थवासी स्यान्न तु भेको जलेऽखिलः ॥ श्रुत्वैवं द्विजवाक्यानि स युधिष्ठिरभूपतिः ॥
८९ ॥ कृष्णामालोक्य तरसा गंतुं दध्रे मनो द्विजैः ॥ तदा कृष्णोऽपि चागत्य कृष्णवेण्यास्तटे शु-
भे ॥ ९० ॥ स्नानं चक्रे यत्र यत्र धर्मादिभिरतंद्रितः ॥ तत्तत्प्रवरतीर्थं तु तत्तन्नाम्ना बभूव ह ॥ ९२
॥ तत्र विख्यातमभवत्तीर्थं शंखाख्यमद्भुतं ॥ ततश्च पुष्कं तीर्थानां जातं परमपावनं ॥ ९३
॥ अतस्तेषु पुमान्स्नात्वा वांछितार्थान्समश्नुते ॥ राजा तु तापसैर्वृद्धैर्मंत्रिभिः सपुरोहितः
॥ ९४ ॥ कृष्णवेणीं नमस्कृत्य सप्रांजलिः खिन्नधीः स्वयं ॥ पुनः पुनः प्रणम्याह मा विस्मर ह

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिप्रिये ॥ ९५ ॥ मामित्येवं प्रार्थयित्वा जगाम गजसाह्वयं ॥ पुण्याध्यायमिमं पुण्यं कृष्णा

नद्याः सविस्तरं ॥ ९६ ॥ शृणोति श्रावयेद्विद्वान्सर्वान्कामानवाप्नुयात् ॥ ९७ ॥ ॥

इति श्रीस्कांदे कृष्णामाहात्म्ये एकपंचाशत्तमोऽध्यायः ॥ ॥ ५१ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥ ॥याज्ञवल्क्यादयोगत्वातीर्थान्यालोक्यय
त्नतः॥ धौम्यादिशंखतीर्थांतंसर्वेतत्रेत्यतस्थिरे॥१॥ शंखतीर्थेनराःस्नात्वानैध्रुवाश्र
ममुत्तमं॥ प्रापुस्तत्रमृतिंसर्वेयुधिष्ठिरगजापयुः॥२॥ नृसिंहस्यप्रसादेनकुलंतस्का
र्यमंजसा॥ भंजनादाश्रमस्याथप्रसादात्पुनरुत्थिताः॥३॥ कृष्णानुमोदितमुनौशरण्ये
चयुधिष्ठिरे॥ कमंडलुजलाक्षेपाद्गजाजीवमवाप्नुयुः॥४॥ इतःपरंयदिगजामदीयाश्रम
मागताः॥ निश्चयेनमृतिंयांतिनैध्रुवस्यवचोयथा॥५॥ तमाश्रमंसदाश्चर्यकारकंह्यव
लोक्यच॥ पुरतोगंतुकामास्तेतीर्थान्याप्पुर्मनस्विनः॥६॥ त्रयोदशाथतीर्थानिकृष्णावे
ण्यास्तटेद्विजाः॥ त्रियोजनांतरस्थानिदुर्लभानिमहात्मनां॥७॥ येषांमध्येमहातीर्थसं
गमाख्यंविराजते॥ ऋषयऊचुः॥ त्रयोदशस्कतीर्थानिकानिस्कंदमहामते॥८॥ कृपया
ब्रूहिनोदेवपापघ्नानियुगेयुगे॥ स्कंदउवाच॥ ब्रम्हतीर्थंतुविज्ञेयंयत्रघोषःसुदुर्लभः॥९
॥याज्ञवल्क्यादयःसर्वेऋषयःसंशितव्रताः॥ ब्रम्हयज्ञंतदाकृत्वाभक्त्यातत्रैतमानसाः
॥१०॥ ब्रम्हत्वंप्रापुर्यत्रसनातनमनामयं॥ ब्रम्हीभूतायतस्तत्रब्रम्हतीर्थंविदुर्बुधाः॥
११॥ तत्तीर्थाद्बाणमात्रंतुपितृतीर्थंविदुर्द्विजाः॥ पितरोयत्रमोदंतेतर्पणैःसलिलोदकैः॥
॥१२॥ पापिनःसद्गतिंयांतितत्तीर्थप्रवरंयतः॥ श्रीतीर्थंतुततःपश्चाद्बाणपंचकमानतः॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 ॥१३॥अब्धिकन्यातपश्चक्रेविष्णुंभर्तारमिच्छती॥नारायणाद्वरंलेभेश्रीतीर्थंभुविवि-
 श्रुतं॥१४॥ततोविप्रवरंनामगौरीतीर्थंमहत्तरं॥तपश्चक्रेयत्रगौरीशंकरार्थमहर्निशं॥
१५॥प्रसन्नस्त्र्यंबकोयत्रदत्तवान्वरमुत्तमं॥सुदंलेभेयतोगौरीगौरीतीर्थंप्रचक्षते॥१६
॥गौरीतीर्थेनरःस्नात्वासौभाग्यंपुत्रसंपदः॥प्राप्नुवंतिस्त्रियोप्यत्रगतिंवैयोगिदुर्लभां॥
॥१७॥देवानामग्रणीरिंद्रोगौतमाच्छापमंजसा॥प्राप्यतीर्थानिसर्वाणिअवलोक्याघ
वान्हरिः॥१८॥संगमेस्नानमात्रेणमनोनिर्मलतांययौ॥अग्रणीतिसमाचख्यौस्ना-
नात्पापंविनश्यति॥१९॥इंद्रस्तप्रापतपसादेवानांपदमुत्तमं॥इंद्रतीर्थमितिख्यातं
स्नानादैश्वर्यदायकं॥२०॥विष्णुतीर्थंततोज्ञेयंपीयूषार्थेपुराहरिः॥सामर्थ्यंलब्धवा
न्यत्रतपसाबहुवासरं॥२१॥वरंलब्ध्वाकृष्णवेण्याःक्षराक्षरविपर्यये॥गंधर्वाश्च
तपश्चक्रुर्हरिदर्शनतत्पराः॥२२॥ततःकृष्णाप्रसन्नाभूद्गंधर्वेभ्योवरंददौ॥तत्रस्ना
नान्महाविद्यांप्राप्नुयान्मनुजोत्तमः॥२३॥तत्तीर्थात्प्रवरंज्ञेयंकामदंसार्वकालिकं॥
उर्वशीयत्रतपसाविश्वामित्रछलेच्छया॥२४॥बहुकालांतरेकृष्णाप्रसन्नाघहारिणी
॥वांछितंमेसमाचक्ष्वयत्तेमनसिवर्तते॥२५॥उर्वश्याहततःकृष्णामिंद्रेणप्रेषिताह्यहं
॥कौशिकंतपतांश्रेष्ठंमोहयित्वाशुचिस्मिते॥२६॥आगच्छेतिपुनःस्वर्गंतत्सामर्थ्यंप्र

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देहिमे॥ॐमित्युक्त्वाकृष्णवेणीतत्रैवांतर्हिताक्षणात्॥२७॥ ततोजगामचार्वंगीविश्वा
मित्राश्रमंपुनः॥ तंलोभयित्वासाबालातपोनिधिमनन्यधीः॥२८॥ उर्वशीतीर्थमालो
क्यनिःकामोजायतेभुवि॥ ततस्तीर्थवरंज्ञेयंपंचाशद्बाणमात्रतः॥२९॥ सूर्यतीर्थमि
तिख्यातंसर्वतीर्थोत्तमोत्तमं॥ सूर्यमेकोऋषिर्यत्रतपःपरमदारुणं॥३०॥ तद्ध्यानाराय
णंध्यायन्कृष्णातीरमुपाश्रितः॥ पूर्णेवर्षशतेजातेआविरासीन्महामतिः॥३१॥ कृष्णा
ऋषिमुवाचेत्थंवांछितार्थंवृणीष्वभो॥ ब्राम्हणोज्ञानसंपन्नोवव्रेवरमनुत्तमं॥३२॥ म
माश्रमपदेनित्यंजगन्मातर्हियेनराः॥ स्नानंकुर्वंतिभूयिष्ठास्तपोविद्याविशारदाः॥३३
॥तेषांपापानिनश्यंतुत्वत्पदंयांतुतेशुभे॥ ददौवरंब्राम्हणाययथाभिलषितंततः॥३४॥
यस्मिन्तीर्थेसूर्यभक्तस्तपःकुर्वन्सदाऽवसत्॥ तत्पुण्यंकोवर्णयितुंशक्तःस्यान्मानवो
भुवि॥३५॥ महाश्रेष्ठोयाज्ञवल्क्यश्चेतिहासानब्रवीच्चतान्॥ तीर्थानांप्रवरंज्ञेयंससरसा
गरसंज्ञकं॥३६॥ माहात्म्यंतत्प्रवक्ष्यामिशृणुध्वंमुनिसत्तमाः॥ अत्रार्थेकथयिष्या-
मिप्राचीनमितिहासकं॥३७॥ पुराभूत्सुमतिर्नामशालग्रामोमहायशाः राजाधर्मज्ञ
कुशलोदैवात्तीरमुपागतः॥३८॥ याज्ञवल्क्यादयोप्यत्रसमाजग्मुर्यदृच्छया॥ तान्न
मस्कृत्यसहसाविनयात्प्रत्युवाचह॥३९॥ राज्यंमयाकृतंप्रेक्ष्यआन्वीक्षिक्याद्यसंयु-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

तः॥गतिःकावाममइतिमनस्येवंविचिंत्यते॥ ४०॥ प्रवदंतु महाभागाकरुणारसमं
वृताः॥इतितद्वाक्यसंतुष्टाराजानंरुक्ममतिंतदा॥ ४१॥ ऊचुर्यज्ञश्चकर्त्तव्योराज्ञाप-
रमधर्मिणा॥यज्ञेनप्रथतेसर्वंधनव्ययविशंकया॥ ४२॥ब्राम्हणैःसहसंचिंत्यकृष्णातीं
रे तुभूपतिः॥यज्ञंचकारविततंसांगंसंभारसंभृतः॥ ४३॥ यज्ञांतेऽवभृथस्नानेसमुद्रे
भ्यःसमाहृतं॥जलंतत्तपसातैस्तुमिलित्वादीक्षितंद्विजाः॥ ४४॥ सप्तसागरमित्येवं
यज्ञेप्रथितमंजसा॥अद्यापितीर्थशोभासायज्ञभूम्यांविराजते ॥४५॥तत्राधिभावि
वातीर्थेकलौतुजनमेजयः॥तदंतिकेमहायज्ञंसर्प्पसत्रंकरिष्यति॥ ४६॥ दृश्यतेचि
न्हमत्युग्रंपुण्यवद्भिःप्रदृश्यते॥ सप्तसागरतीर्थेतुस्नात्वादत्वायथाविधि॥ ४७॥स-
प्तसागरसंघेषुस्नातपुण्यफलंलभेत्॥स्नबुधिर्यत्रजायेतगतिश्चापिनसंशयः॥४८॥
तत्तीर्थात्प्रवरंतीर्थंक्रोशमात्रमथोशृणु॥विभूतितीर्थमत्युग्रंश्रवणात्पापनाशनं॥४९
तपस्विनंमहात्मानंकृष्णातीरनिवासिनं॥राक्षसःक्रोधताम्राक्षःक्रोधादुद्रावतंमुनिं
५०॥तंदृष्ट्वासंभ्रमापन्नोगंगातीरमृदंतदा॥चिक्षेपसहसाविप्रोजलैःसार्द्धमुदारधीः॥
५१॥जलस्पर्शाद्ददाहाशुविसृष्टोराक्षसाधमः॥दिव्यंदेहमनुप्राप्यप्रणम्योवाचतंपुनः
॥५२॥ब्राम्हणानांचसाधूनांछलनादीदृशींगतिं॥प्राप्तोस्मित्वत्कृपादृष्ट्यापुण्यलोकं

CC-0. Digitized by eGangotri and MIDF- Delhi

अ॰
स्कं॰म॰ जाम्यहं॥५३॥इतितेनस्कसंभाष्यविमानेनगतोदिवं॥आरुह्यदिव्यवपुषातत्तीर्थंभस्म ५२
१०३ संज्ञकं॥५४॥अतोमाहात्म्यमेतेषांतीर्थानांविस्मयावहं॥स्वामिन्कथयनामानिप्रभा-
वंचपृथक्पृथक्॥५५॥स्कंदउवाच॥पश्चिमेप्रथमंतीर्थंगोःपादमितिकीर्तितं॥धनुस्त्रिं
शत्सहस्रंतुबहुगोपादचिन्हितं॥५६॥मर्यादार्थंचतस्यप्राक्गोःपादांतेस्थितःशिवः॥
लिंगरूपीस्वयंभूर्लोगोःपादेशोऽखिलाघहृत्॥५७॥सुरभिःसाजगन्मातासमभ्यर्च्यचशंकरं
॥गवामैश्वर्यमासाद्यतीर्थायास्मैवरान्ददौ॥५८॥योऽत्रस्नात्वानदीमध्येगोःपदेस्पृश्यशंक
रं॥गोवधान्मुच्यतेघोरात्सोपवासस्त्रिभिर्दिनैः॥५९॥लोकानांमातरोगावस्तासांद्रोहंचरंति
ये॥नतेषांनिष्कृतिर्यावद्दहगोतीर्थसेवनं॥६०॥ताडयंतिचयेगाश्चक्लेशयंत्यतिकर्षणात्॥नि
रुंधंतिचतेषांवैह्येतत्तीर्थंविशोधनं॥६१॥योऽत्रस्नात्वाऽर्चयेल्लिंगंमासमेकंजितेंद्रियः॥इह
गोष्टर्द्धिमाप्नोतिप्रेत्यगोलोकमश्नुते॥६२॥स्वपितृभ्यश्चयोन्नानदद्यात्तिलमिश्रान्जलांजली·
न्॥कामधेनुरहंतेषांसदैवेष्टप्रपूरिणी॥६३॥इतिदत्वावरान्देवीस्वर्लोकंगोकुलैर्ययौ॥पर्व-
ण्येतास्तुसंध्यांतिलेनेदंगोःपदंस्मृतं॥६४॥तस्मात्पर्वसुभक्त्यातुस्नात्वाऽभ्यर्च्यपितॄन्क्रमान्
शिवंनत्वानरोभक्त्यागवांमंत्रमिमंजपन्॥६५॥नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच॥
नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः॥६६॥एवंकृत्वासकृन्मर्त्यःसूतोब्रह्मपदंव्रजेत्॥
स्मृत्वैवंदूरसंस्थोपिगोप्रदानफलंलभेत्॥६७॥इतिस्कान्देमा॰द्विपंचाशत्तमोऽध्यायः॥५२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥तस्मात्पूर्वमनंताख्यंपंचाशद्धनुषावृतं॥तीर्थां-
तरंसरिन्मध्येलिंगंतुफणिनाकृतं॥१॥यत्रानंतस्तपस्तेपेकाद्रवेयोमहामतिः॥नागारेर्ग
रुडाद्भीतःशयनंस्यांहरेरिति॥२॥अथकालेनसंप्रीतौशिवशौरीजगत्पती॥समागम्या
भयंदत्वातंचक्रातेतथाऽमरं॥३॥शय्यात्वंमेभवेत्युक्त्वाविष्णुस्तस्यफणेःस्वयं॥उपावि
शत्तुस्वस्पर्शैलीलयाशंभुनासह॥४॥प्रसन्नःशंभुसंस्पर्शात्सोधिनष्टतपःश्रमः॥जहर्ष
धन्यतांयातःप्रसादादुत्तरंददन्॥५॥ताव ब्रह्मादयोदेवावेदास्तीर्थानितापसाः॥समेत्यतुष्टु
वुःसर्वेदृष्ट्वादेवौफणास्थितौ॥६॥फणिशय्यांसमारूढेलक्ष्मीशेसहशंभुना॥चक्रुर्महो
त्सवंसिद्धागंधर्वाःपुष्पवर्षिणः॥७॥ततोऽनंतोवरान्वव्रेसिद्धदेवौचसन्निधौ॥मन्नाम्ने-
दंभवेत्तीर्थंप्रख्यातंसर्वकामदं॥८॥तीर्थानामक्षराणांच्चदेवतानांसदैवहि॥युवयोश्चापि
कलयासमस्तानांचसन्निधौ॥९॥श्रीविष्णुरुवाच॥अनंततीर्थमेतद्धिकीर्त्यतेभुवन
त्रये॥स्नानदानजपादीनामनंतफलदंस्मृतं॥१०॥अनंतस्त्वमनंतोऽहंअनंतोयंस-
दाशिवः॥तीर्थानिदेवावेदाश्चसर्वेनंतास्थितास्त्विह॥११॥ईश्वरउवाच॥योत्रस्ना-
त्वाफणिस्थौतुसमाधायैकलिंगके॥अर्चयेत्परयाभक्त्यासमयासहमोदते॥१२॥ब्र
ह्माद्याऊचुः॥अस्माकंसन्निधौचात्रसन्निधौदेवदेवयोः॥प्रियोसौनागराजस्ययोभूत्तु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 स्याजगत्पते:॥१३॥स्कंदउवाच॥इत्थंसंभाष्यतेसर्वेतत्रैवांतर्दधुस्तदा॥निर्यंसन्नि
 हिताश्चात्रतेनेदंतीर्थमुत्तमं॥१४॥ततः प्रभृतिलोकानांज्ञापनार्थंशिलात्मकं॥अद्यापि
दृश्यतेलिंगंफणेहरिहरात्मकं॥१५॥पंचचान्यानिनामानिसिद्धवेद्यानिसंतिहि॥अत्रै
वपुण्यदृश्यास्तिशिलानामांतरेणसा॥१६॥तस्मात्स्नात्वाचनियतोलिंगंहरिहरात्म
कं॥शेषंचभक्त्यासंपूज्यप्रणमेदितिवैजपन्॥१७॥योऽनंतोधरणींधत्तेयोनंतः सचरा
चरः॥योनंतस्त्वंचविश्वेशस्त्वीननंतान्नतोस्म्यहं॥१८॥येऽनंततीर्थस्यगृणंतिदिव्यं
माहात्म्यमेतन्मुनिसंघगीतं॥तेसस्तुरोगादिभयव्यपेताःकुलाभिर्वृद्धिंसततंलभंते॥१९
॥स्कंदउ०॥सूर्यतीर्थंततः पूर्वमितितीर्थविदोविदुः॥धनुःशतप्रमाणंचसिद्धिदंसिद्ध
सेवितं॥२०॥तस्यपश्चिममर्यादांज्ञापयन्लिंगमूर्तिधृक्॥सोमेशइतिविख्यातोनदी
मध्येस्रुसंस्थितः॥२१॥महर्षिःपावमान्यस्तत्रतत्त्वामहत्तपः॥आराधयन्जगन्मूर्तिंसू
र्यंतुष्टावभक्तिमान्॥२२॥पावमान्यउ०॥नमःसवित्रेऽव्यक्तायस्मात्र्यमणिनेतथा॥
जगत्स्थितिसृष्टिकर्त्रेबालायहितकारिणे॥२३॥ध्येयायध्यानगम्यायशुद्धबुद्धायतेन
मः॥त्रयीमयायस्वछंदचारिणेन्दुरोचिषे॥२४॥यथाग्रीष्मेशोषयसितृणानिदुरितंतथा
॥त्वंस्रुज्वलज्ज्वलैःपूर्णान्नित्याभ्युदयशालिनः॥२५॥स्वभक्ता न्वसमानांश्चकरो·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षिकरुणानिधे॥ब्रम्हादिदेवाः संध्यासु ये कुर्वंति जलांजलीन्॥२६॥युक्तं वै नाहि ते पू-
ज्यास्तेषां त्वं च वरप्रदः॥यथा प्रतिक्षणे देव अनायासेन बोध्यसे॥२७॥आयुरारोग्यदाता
त्वं त्वं च प्रत्यक्षजस्तथा॥त्वमेव जीवश्चक्षुश्च तेजश्चास्योपकारकं॥२८॥भाग्यं त्वं पर
मात्मा च त्वन्मयं सकलं जगत्॥प्रसीद सर्वभूतात्मन् लोकात्मन् विश्वतोमुख॥२९॥जन्म
मृत्युजराव्याधिसंसारभयनाशन॥एवं संस्तुवतस्तस्य भगवान् भक्तवत्सलः॥३०॥दि-
व्याकृतिः पुरस्तस्थावादित्यो निजमंडलात्॥तं दृष्ट्वा सहसा देवं हृष्टरोमासनात्ततः॥३१॥
पपात दंडवद्भूमौ प्रसीदेति वदन्मुहुः तमुत्थाप्याह देवेशो वरं वरय सुव्रत॥३२॥प्रीतोऽस्मि
तपसा ते ह्यस्तोत्रेण च महामुने॥पावमान्य उवाच॥तुष्टस्त्वं यदि देवेश भवरोगहरो ह्यसि·
॥३३॥ज्ञानं भक्तिं च मे देहि भवरोगघ्नमौषधं॥सूर्य उ०॥यदुक्तं तत्तथैवास्तु स्तोत्रेणाने·
न यो हि मां॥३४॥भक्त्या स्तोष्यति तस्यापि स एवास्तु सदा वरः॥सूर्यतीर्थमिति ख्यातमे
तत्तीर्थं भविष्यति॥३५॥यत्र मत्प्रापणाद्याच ताम्रा संदृश्यते शिला॥योत्र स्नात्वा सम
भ्यर्च्य सोमेशं मां च भक्तिमान्॥३६॥नमस्कुर्याद्वरस्तस्मै सोऽस्तु यद्धितमीप्सितं॥अनु·
ग्राह्योतिभगवान् ऋषिं तीर्थं च सर्वदा॥३७॥ययौ स्वमंडले देवः कृतार्थश्चाभवन्मुनिः
॥तस्मात्सूर्यप्रसादेन तीर्थमेतद्धि मुक्तिदं॥३८॥सर्वकामप्रदं पुण्यं सदा सेव्यं मनीषिभिः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥इतिश्रुत्वामहत्तीर्थमाहात्म्यंलोकपावनं॥३९॥नतृप्तिमधिगच्छामस्तीर्थमन्यद्वदस्व
नः॥स्कंद उ॰॥तस्मादनंतरंसंतःकोटितीर्थंप्रचक्षते॥४०॥पवित्रंपरमंयावच्छिलासे-
तुःप्रदृश्यते॥सप्तर्षयोऽत्रमध्यान्हेकदाचित्स्नातुमुद्यताः॥४१॥प्रत्येकंकोटितीर्थानि-
मनसासमभावयन्॥अथतेषांप्रभावेणतीर्थानांसप्तकोटयः॥४२॥तत्तीर्थंसमनुप्रा-
प्ताःस्थितास्तत्रैवतद्गिरा॥तस्मात्तत्परमंतीर्थंसेवितव्यंमनीषिभिः॥४३॥दानंश्राद्धंज
पोयत्रसप्तकोटिगुणोभवेत्॥तस्मादनंतरंपूर्वंचक्रतीर्थमुदाहृतं॥४४॥शिलायांसंस्थि
तंदेवंभुक्तिमुक्तिफलप्रदं॥अंबर्षिणा[1]ततःपृष्टःप्राहविज्ञानसाधनं॥४५॥तत्तीर्थमिह
लोकानांहितार्थंप्राहकेशवः॥क्षिप्तमेतन्महाचक्रंसुदर्शनमनुत्तमं॥४६॥दर्शयिष्यति
तेत्तीर्थमित्युक्त्वाप्राहिणोद्विभुः॥तेनैतद्दर्शितंतीर्थंततःप्रभृतिभूतले॥४७॥चक्रतीर्थ-
मितिख्यातंराजाचात्रावसच्चिरं॥कात्यायनीचतत्रास्तेतत्तीर्थस्यसमीपतः॥४८॥च
क्रतीर्थेवसन्मर्त्यःषण्मासाल्लभतेध्रुवं॥ज्ञानंसंसारचक्रघ्नंप्रसादादेवचक्रिणः॥४९॥त
तःपूर्वंमहापुण्यंशंखतीर्थमितिस्मृतं॥शंखाकृतिःशिलायत्रदृश्यतेतावदेवतु॥५०॥क
दाचिद्देवकीसूनुर्गच्छन्दक्षिणदिग्जये॥तत्रमध्यान्हिकंकर्मचक्रेलोकगुरुर्हरिः॥५१॥शं
खेनोदकमानीयतस्मिन्तीर्थेसमाधवः॥लिंगंसंस्थापयामासप्राहचैतन्महाफलं॥५२॥लो

१टि॰ अंबरीषेणेत्यर्थः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कानांज्ञापनार्थायचिन्हंतत्रशिलातले ॥ शंखेनचक्रेलोकेशस्ततीर्थंचोत्तमोत्तमं ॥ ५३ ॥
तस्मात्पूर्वंमहातीर्थंसंगमेलोकविश्रुतं ॥ यावन्मलापहारिण्यास्तटंपूर्वंप्रदृश्यते ॥ ५४ ॥ त
देतत्परमंतीर्थंदुर्लभंपापकर्मणां ॥ नमेप्रगल्भतेवाणीतस्यमाहात्म्यवर्णने ॥ ५५ ॥ क्रोश
मात्रंस्रुविस्तीर्णंसंगमंक्षेत्रमुत्तमं ॥ गोःपदानिचतीर्थानितत्रैवनिवसंत्यतः ॥ ५६ ॥ प्रण
वस्थायथावेदाःशिवस्थाःसर्वदेवताः ॥ तथा सर्वाणितीर्थानिसंगमस्थानिसंश्रताः ॥
५७ ॥ सिध्धक्षेत्रंशिवक्षेत्रंपुण्यक्षेत्रंतदुच्यते ॥ मुच्यतेत्रपरात्पापान्मुच्यतेसंसृतेर्मृतः ॥ ५८ ॥
वराहस्योत्तरेदेशेदाक्षिणेसंगमस्ततः ॥ ममक्षेत्रमितिप्राहस्वयंदेवोमहेश्वरः ॥ ५९ ॥ श्रीशै-
लेचप्रभासेचश्मशानेऽमरकंटके ॥ घटपासंगमेसेतौवसामिक्षेत्रगौरवात् ॥ ६० ॥ वाराण-
स्यांचविश्वेशंसंगमेशंचसंगमे ॥ स्नात्वारामेश्वरंनत्वाजन्माद्यौघंव्यपोहति ॥ ६१ ॥ स्नात्वातु
लानितीर्थानिअर्चयन्मासमात्रकं ॥ तस्याहंस्फलभोदेविकिंमुस्वर्गादिकंफलं ॥ ६२ ॥ घटपा
याःसंगमेचमत्सेवार्थंसदानराः ॥ सिद्धर्षयोयक्षवरानागाश्चापिहिसंगमे ॥ ६३ ॥ तीर्थात्मालिं
गरूपीचक्षेत्रात्मेतित्रिधास्मृतः ॥ स्थानेतस्मिन्सदाविप्रामर्त्यानांहितकाम्यया ॥ ६४ ॥
लिंगात्माप्यष्टधायत्रास्थितोहंभक्तवत्सलः ॥ नदीमध्येबहिश्चापिक्षेत्रेस्मिन्स्वयमुत्थितः
६५ ॥ कृष्णवेण्यामनेकानिप्राधान्यादष्टलिंगकं ॥ वाराणस्यांयथोंकारकृत्तिवासकपर्दिनः ॥ ६६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

विश्वेशमध्यमेशौचलिंगान्येतानिभोद्विजाः॥पंचलिंगात्मकान्यत्रपंचमूर्तानिभारत॥६७
अमृतोयज्ञनामार्कोरामेशःशंकरःशशी॥लिंगानामष्टकंचैतत्स्मृतंसर्वाघनाशनं॥६८॥शि
वलोकप्रदंनृणांअर्चनात्मुक्तिदायकं॥अष्टानांचैवलिंगानांमाहात्म्यंसमुदाहृतं॥६९॥देव्यै
स्कंदायचतथाप्रोक्तवान्शंकरःस्वयं॥कृपयाजगतांस्थित्यैयत्रसर्वगणैर्वृतः॥७०॥क्षेत्रप्र
दक्षिणांकर्तुर्भूप्रदक्षिणजंफलं॥लभेत्तत्रनरोयस्मात्सर्वत्रासौयतःस्थितः॥७१॥लिंगपंच
कमध्यात्प्राक्धनुषांचशतद्वयं॥रुद्रपादौस्थितौदृष्ट्वापुमान्मुच्येतसंसृतेः॥७२॥रुद्रःक-
पालीतीर्थानिचरन्ब्रह्मकपालधृक्॥तत्रस्थित्वार्चयद्देवंपंचलिंगमयंशिवं॥७३॥लिंगप्रस
ह्यस्थौपादौस्थितौमुक्तिप्रदौद्विजाः॥जगद्धितार्थंविन्यस्तौसर्वपापहरौशुभौ॥७४॥पिंड
प्रदानंतत्रैवकुर्याद्भक्तिसमन्वितः॥दातुश्चतत्पितॄणांचस्यादुर्लभगतिप्रदं॥७५॥त्रिरात्रं
संगमेतिष्ठन्मुच्यतेसर्वपातकैः॥मासंतुनिवसन्दांतोमहद्भिःपातकैरपि॥७६॥संवत्स-
रंतुनिवसन्शिवसालोक्यमाप्नुयात्॥तत्रैवमरणान्मोक्षंनरःप्राप्नोत्यसंशयं॥७७॥श्रु-
त्वाध्यायमिमंपुण्यंश्रावयेद्वासमाहितः॥सर्वपापविनिर्मुक्तोगतिंप्राप्नोतिदुर्लभां॥७८॥
॥इतिस्कांदेकृष्णामाहात्म्येत्रिपंचाशत्तमोऽध्यायः॥ ॥शुभंभवतु॥

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ श्रीगणेशायनमः ॥ स्कंदउवाच ॥ अन्यत्तीर्थंप्रवक्ष्यामिसर्वपापहरंशुभं ॥ ऋणमोच-
नसंज्ञंतुजन्मांतरकृताघहृत् ॥ १ ॥ ऋणैस्त्रिभिः परिवृत्तः पुरुषोजायतेकिल ॥ इज्याध्य
यनसन्मानैर्देवादीनामितिश्रुतिः ॥ २ ॥ शूर्पालक्षेत्रमध्येतत्पवित्रंपापनाशनं ॥ तत्तीरे
ऽश्वत्थवृक्षेऽस्मिन् विष्णुरूपेणसंस्थितः ॥ ३ ॥ तद्वामभागतीरेचअस्थौयत्कालुसहानिः
॥ त्रिःसप्तकुलउद्धारेशूर्प्पालितीर्थरूपिणि ॥ ४ ॥ ब्राम्हणाः कृष्णारूपाश्चलक्ष्मीरूपायत-
स्त्रियः ॥ तत्रागत्यातुतौपूज्यवैकुंठंवसतेचिरं ॥ ५ ॥ दानंस्नानंचयत्तत्रतद्दानंत्यायकल्प
ते ॥ येवसंतित्रिरात्रंतेअश्वमेधादिभागिनः ॥ ६ ॥ तत्तीरस्थौनियुक्तानिषण्मासाक्षुंखरू
पतां ॥ शूर्प्पालिसंगमेचैवछायायांश्रीगिरौतथा ॥ ७ ॥ सर्वत्रसफलभाकृष्णाचतुःस्थानेषु
दुर्लभा ॥ अश्वत्थरूपीविष्णुश्चविष्णुतीर्थंप्रचक्षते ॥ ८ ॥ तत्तीर्थाद्दशबाणंतुऋणमोचन
कंस्मृतं ॥ ऋणापहरणंयोवैअकुर्वन्निहचेन्मृतः ॥ ९ ॥ निगृह्यतेद्विजोत्सर्थंपरलोकेनसं-
शयः ॥ ऋणापहरणंचैवसफलंचात्रसंगमे ॥ १० ॥ कर्मन्वैवास्यजीवस्ययदेवसुकरंपरं ॥
अज्ञानालस्यलोभाद्यैर्देवविघ्नैस्तथापिवा ॥ ११ ॥ एतत्कथंचनाकुर्वन्किंकुर्यात्करुणानि
धे ॥ ईश्वरउ० ॥ साधुवत्सत्वयापृष्टंघृणयाभवदुःखिनः ॥ १२ ॥ ऋणेभ्योबिभ्यतस्त्राणम
स्तिसाधोशृणुष्वतत् ॥ सर्वस्यपापजातस्यनरश्चेदिच्छतेहितं ॥ १३ ॥ निष्कृतिर्नतुशक्या

१टि० प्राप्नुवंतीतिशेषः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साकृष्णावेण्यांचविद्यते॥ कृष्णावेण्योभयतटे योजनांतरसंस्थितं॥१४॥ क्षेत्रंविमुक्ति

दंप्राहुरंतरासह्यसागरं॥ग्रामेवायदिवारण्येतीर्थेवायत्रकुत्रवा॥१५॥ कृष्णावेणांभसि
स्नातोवाजिमेधफलंलभेत्॥ षष्ठिवर्षसहस्राणिभागीरथ्यावगाहने॥१६॥कृष्णवे·
ण्यांसकृत्स्नानंसमंकन्यागतेगुरौ॥ कन्यागतेगुरौसोमवारेविष्णोःशुभेदिने॥१७॥ वेणा
यांप्लावनंनृणांकोटिजन्माघनाशनं॥ कृष्णायांप्लवनंश्राद्धंकक्षेचैवगुवेष्णावे॥१८॥
कन्यागतेगुरौसोमेकोटिजन्माघनाशनं॥तस्यांहितीर्थप्रवरंसंगमंलोकविश्रुतं॥१९॥
स्नानमात्रेणसर्वेषांपापकंचुकनाशनं॥अत्राप्युदाहरंतीममितिहासंपुरातनं॥२०॥दा
ल्भ्योनामद्विजःकश्चिदातिथ्यंकृतवान्पुरा॥ गृहीत्वान्यगृहाद्धान्यंददावतिथयेततः
॥२१॥तदेतद्विस्मृतंतेनऋणंसःपंचतांययौ॥कालेननोदितश्चापितिर्यक्त्वंप्रतिपद्यसः॥२२
॥सह्याचलेततःशून्येसर्वतःकंटकावृते॥निर्जनेव्याघ्रभूयिष्ठेशृगालःसचचारह॥२३
॥पुनर्वृकत्वमापन्नःपुनश्चैवशृगालतां॥पूर्वजातिंस्मरत्येवतपोमाहात्म्यकारणात्॥
२४॥उद्विग्नःकिंकरोमीतिदुःखार्तःसह्यपर्वते॥ वेणीनदीमनुप्राप्तोगोतमंतत्रदृष्टवान्॥
२५॥जानात्येवसततत्सर्वंयद्दाल्भ्येनपुराकृतं॥तेनोक्तंमुनिवर्येणपूर्वपापनिवृत्तये॥२६॥
गौतमउवाच॥दाल्भ्यस्त्वमसिधर्मेणऋणसंबंधकारणात्॥तिर्यक्त्वंदुःखबहुलंप्राप्त

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वानसिसुव्रत॥ २७॥दाल्भ्यउ०॥ भगवन्किंमयाकार्यंकथंज्ञानामिनिष्कृतिं॥ यद्यस्ति
मयिकारुण्यंकथयस्वनिवृत्तये॥२८॥गौतमउ०॥ देवर्षिभिःसदापूज्यात्रैलोक्येबीजका
रिणी॥कल्पकोटिकृतंपापंकृष्णाहंतिक्षणाद्यतः॥२९॥ तत्स्नानादचिरादेवमनुष्यत्वं-
भविष्यति॥ततोगत्वायत्रचोक्तंतत्रस्नानंसमाचर॥३०॥ स्कंदउ०॥ दाल्भ्यायगौतमः
प्राहसर्वपापनिवृत्तये॥ अस्यांतुकृष्णवेणायांस्नानसाधनमुक्तवान्॥३१॥ ईश्वरउ०॥
दाल्भ्यगौतमसंवादंपावनंपुण्यवर्धनं॥वदाम्यहंभवत्प्रीत्याशृणुपुत्रषडानन॥३२॥गत्वा
तुकृष्णवेणायांकुत्रस्नानंसमाचरेत्॥ब्रूहित्वमितिपृष्टःसन्ततःप्रोवाचगौतमः॥३३
॥गौतमउ०॥ कृष्णवेणानदीनाम्नायत्रयत्रचगच्छति॥स्नातस्यतत्रतत्रैवसर्वदानफ
लंभवेत्॥ पौर्णिमास्याममावास्यामष्टम्यांचंद्रसूर्ययोः॥ ग्रहणेस्नानमात्रेणगोसहस्रफ
लंलभेत्॥३५॥ जपोदानंतपोहोमःश्राद्धंसद्गुरुसेवनं॥अक्षय्यंतुभवेद्दाल्भ्यपापस्या
पिक्षयोभवेत्॥३६॥ नदीनामुत्तमावेणीदेवानामुत्तमोहरिः॥ विद्यानामुत्तमोवेदोवर्णा
नांब्राम्हणःपरः॥३७॥ कृष्णवेणीजलंपीत्वाकीकटेष्वपियोवसेत्॥गत्वाषण्मासपर्यं
तंनदोषस्तंसमाश्रयेत्॥३८॥निद्रामात्रंप्रकुर्वंतिकृष्णातीराश्रयेद्विजाः॥ प्राणिनांतेव
रिष्ठास्युर्लभंतेतपसःफलं॥३९॥ नदीनामादिभूतासाकृष्णवेणीद्विजोत्तमाः॥ येपिबं-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्क॰ म॰ ।सिंचतत्तोयंनूनंतेपुण्यभागिनः ॥ ४० ॥ वक्ष्यामिशृणुदाल्भ्यत्वंतवपापनिवृत्तये ॥ मृ- अ॰
१०८ लापहारिणीनामनदीसह्यसमुद्भवा ॥ ४१ ॥ निर्मलासाचकल्याणीब्रह्मणाशापशांत ५४
ये ॥ तस्यास्तत्सलिलंसद्यः किल्बिषंहरतिक्षणात् ॥ ४२ ॥ तदाश्रितांश्चयेभक्त्याप्रयां-
तिपरमांगतिं ॥ तथात्वंसंगमंगच्छपवित्रंपापनाशनं ॥ ४३ ॥ रुद्रंपशुपतिंस्थाणुंतत्रस्ना
त्वानमस्कुरु ॥ मृगरूपंपरित्यज्यऋषित्वंप्राप्स्यसेचिरं ॥ ४४ ॥ यदाकदाचिद्येमर्त्त्याः की
र्त्तयंतिचसंगमं ॥ स्मरंतिपरमंस्थानंनूनंतेमोक्षभागिनः ॥ ४५ ॥ इतिदेवाश्चपितरोगायं-
तेसततंदिवि ॥ तस्मादागत्यतत्तीर्थेपापिनांदुर्मनस्विनां ॥ ४६ ॥ दानरूपेणतत्रैवतिलां
शंयःप्रयच्छति ॥ मेरुतुल्यंफलंप्राप्यतदंतेमुक्तिमाप्नुयात् ॥ ४७ ॥ तत्रपिंडप्रदानेनमुक्ति
रेवनसंशयः ॥ पिंडमात्रप्रदानेनविघ्नशांतिंप्रयातिवै ॥ ४८ ॥ सगरश्चययातिश्चदिलि
पोनहुषस्तथा ॥ भगीरथोऽथरामश्चमांधातृप्रमुखास्तथा ॥ ४९ ॥ असितोदेवलश्चैव
दत्तात्रेयपुरोगमाः ॥ तत्रस्नात्वातपःकृत्वामुक्तिज्ञानपदेस्थिताः ॥ ५० ॥ रामःपुराजग-
न्नाथोभार्गवःक्षत्रियांतकः ॥ तत्रकृत्वातपोघोरंपापस्यांतंप्रपन्नवान् ॥ ५१ ॥ शूर्पालिश्च
महेंद्रस्यसंगमस्त्रयमुत्तमं ॥ त्रिषुस्थानेषुदेवेशःसमत्तिष्ठतिसर्वदा ॥ ५२ ॥ प्रातःकाले
तुशूर्पालित्वपराह्णेन्नसंगमे ॥ सायंमहेंद्रेवसतिरामःक्षत्रकुलांतकः ॥ ५३ ॥ अत्रत्रयंम- २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हापुण्यंरामस्यैवाश्रमत्त्रयं॥पृथिव्यामंतरिक्षेचयानितीर्थानिसंतिवै॥५४॥तानितत्रव-
संत्येवधातुर्वचनकारणात्॥तत्रस्नात्वानमस्कुर्यान्नामभिःशाश्वतंशिवं॥५५॥माघमा-
सेनरःस्नात्वाकार्तिकेमासिसंयतः॥शिवस्यसन्निधौस्तोत्रंयःपठेन्नियतात्मवान्॥५६॥-
सोपिब्रह्मपरंज्ञात्वागतिमाप्नोतिशाश्वतीं॥दाल्भ्यउवाच॥भगवन्ममकारुण्यात्स्तोत्रं
वैवक्तुमर्हसि॥५७॥ज्ञात्वातवप्रसादेनगमिष्यामिपरांगतिं॥गौतमउवाच॥शिवःपशु-
पतिःस्थाणुःसिंहोनंतोवृषध्वजः॥५८॥वीरभद्रोमहादेवःकामहाकुलवर्धनः॥चंडी-
शोभैरवोगुह्योगुरुर्गुरुतरोहरः॥५९॥अजःप्रजापतिःशूलीवृषात्मावृषवर्धनः॥तु-
रीयःखंडपरशुःकपिलोनागभूषणः॥६०॥पद्मनाभःपद्ममूर्तिर्दीप्तिमान्पार्वतीप्रियः॥
ईशःप्रचंडःक्रूराक्षोभूतनाथोजगद्गुरुः॥६१॥नतोस्मित्वांजगन्नाथपापंनाशयमेऽव्यय
॥इत्येतैर्नामभिःस्तुत्वादाल्भ्य त्वंमुक्तिमाप्स्यसि॥६२॥इत्युक्तःप्रणिपत्यैवप्रहृष्टः-
प्रापसंगमं॥कृत्वायथोक्तंतद्भक्त्यादाल्भ्यःप्रापोत्तमांगतिं॥६३॥ततोविद्याबलंदृष्ट्वात
त्रस्थाविस्मयंययुः॥सोपितत्रैवनिवसन्स्थित्वाप्रापनिजांगतिं॥६४॥नारदउवाच॥इत्या
दिमाहात्म्यमचिंत्यमस्याःस्कंदायदेव्यैचजगादशंभुः॥श्रुत्वातिभक्त्यातदशेषपापंविधूयम
र्त्यःशिवलोकमेति॥६५॥ ॥इतिश्रीकृष्णामा०मलापहासंगमवर्ण०चतुःपंचाशत०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥ऋषयऊचुः॥अहोमाहात्म्यमतुलंप्रसादाद्भवतःश्रुतं॥भूयःकथ
यकारुण्यादस्माकंश्रोतुमिछतां॥१॥रामस्तत्रतपश्चक्रेकथंलोकगुरुःप्रभुः॥नारदउवा०॥
त्रिःसप्तकृत्वोनृपतीन्हत्वाभार्गवनंदनः॥२॥तस्यप्रशांत्यैतीर्थानिचरन्वैकिलभार्गवः॥प्रद
र्शनायलोकानांऋषिसंघैस्ततोययौ॥३॥स्नात्वासमस्ततीर्थेषुपूजयन्विश्वदेवताः॥अ
लब्ध्वाचक्षयोदेवःप्रययौसमलापहां॥४॥सह्यपादाश्रितालोकाहिताधामृतवाहिनी॥या
सर्वमलहंत्रीतिप्रख्यातान्चमलापहा॥५॥जायतेयोजनेयस्यांतीर्थानांशतमुत्तमं॥लिंग
रूपंचप्रख्यातंसुरसिध्धर्षिसेवितं॥६॥सह्याद्रावभ्यतोदेवीसेव्यमानोजगत्पतिः॥आनुलो
म्यात्पितृन्देवानर्चयन्संगमंययौ॥७॥अथतस्यकुठाराग्रात्भिन्नहत्याऽतिविह्वला॥नि
र्गत्यमूर्तिमत्येवाकस्त्वमित्याहभार्गवं॥८॥तवचाश्रयणेभीतातवैवानुगताप्रभो॥कुठारा
ग्रेस्थिताभक्त्याज्वालानद्यांनिमज्जतां॥९॥येयमंबुमयीदेवीधर्माणांतुसुधामयी॥ज्वा-
लामयीत्वधर्माणामित्युक्त्वासंगमंययौ॥१०॥अथप्रहृष्टोभगवान्भार्गवोमुनिसन्निधौ
॥प्रदर्श्यैश्वर्यमतुलंप्रशशंसमलापहां॥११॥प्रायश्चित्तार्थिनांविप्रामहापातकिनामपि॥
मलापहैवशरणंविरक्तानांनसंशयः॥१२॥नद्योऽन्याश्चप्रशंसंतिस्वर्गादिफलसाधने॥
मलापहारिण्याकाचित्समाऽन्यानैवविद्यते॥१३॥उदग्वहतियत्रैषास्नानदानजपादिकं॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰ म॰ तत्रप्रशस्यतेऽस्यर्थंभानुवारेत्वनंतकं ॥१४॥ तत्रापिकपिलातीर्थंयात्रदेवगुसंगमं ॥ तत्रा अ॰
११० पिसुलभामुक्तिर्यद्वाकामयतेनरः ॥१५॥ इत्युक्त्वाथजगन्नाथः प्रहृष्टस्तद्विजैःसह ॥ विधि ५५
वत्संगमेस्नात्वातर्प्पयत्पितृदेवताः ॥१६॥ तत्रासौसंगमेक्षेत्रेश्वरःसाक्षात्सदाप्रभुः ॥ ई-
शान्यांशंकरश्चास्तेभुक्तिमुक्तिफलप्रदः ॥१७॥ तस्मिन्क्षेत्रेशिवोभक्त्यापापान्युच्चाटयन्
प्रभुः ॥ यस्यस्मरणमात्रेणसद्योव्याधिग्रहादिकाः ॥१८॥ पीडानश्यंतिविविधाःसिध्यंत्या
शुमनोरथाः ॥ तत्रस्थंचैवपूजार्हंदेवंतंनार्चयंतिये ॥१९॥ तेषांपुण्यफलस्यार्धंक्षेत्रस्वामी
हरत्यसौ ॥ तत्रपूज्याग्रतःपूज्यान्प्रार्थ्यानुज्ञांचभार्गवः ॥२०॥ वाग्यतोमुनिभिःसार्धंशंकरंलो-
कशंकरं ॥ तत्रपूज्यमहायोगीस्वात्मानंजगतांगुरुं ॥२१॥ शिवःपशुपतिःस्थाणुरितिस्तोत्रं
सदापठन् ॥ ततःशिवसमीपस्थोसर्वदेवान्समीपतः ॥२२॥ प्रणम्यप्रयतःप्रायाद्रुद्रपादौसु
शोभनौ ॥ तावभ्यर्च्यपितृभ्यश्चपिंडान्दत्वायथाविधि ॥२३॥ पंचलिंगान्यथाभ्यर्च्यतन्मा
हात्म्यंचसोभ्यधात् ॥ रामउवाच ॥ पृथिव्यामेतदाश्चर्यंशृणुध्वंद्विजसत्तमाः२४ पृथक्पंचमुखः
साक्षाच्छिवोयंस्वयमुत्थितः ॥ सद्योजातंमुखंशंभोर्वायव्यांधर्मदंत्विदं ॥२५॥ ईशान्यांका
मदमनंसिद्धैःसंपूज्यतेसदा ॥ तथातत्पुरुषंदिव्यमाग्नेय्यामर्थदंत्विदं ॥२६॥ अघोरमेतन्नैर्ऋ
त्यांदिशिवैसर्वकामदं ॥ शांतिपुष्टिकरंचैवसमस्तभयनाशनं ॥२७॥ ईशानंतुमुखंमध्ये १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुक्तिदं सर्वकामदं ॥ पंचब्रम्हमयः सोयं तथा सर्वजगन्मयः ॥ २८ ॥ सर्वान्कामान्ददात्या
श्रुतत्तन्मंत्रैः समर्चितः ॥ य एवं नियतो भक्त्या सकृदभ्यर्चयेच्छिवं ॥ २९ ॥ सर्वपापवि-
निर्मुक्तः शिवलोके महीयते ॥ अत्र देवर्षयः सिद्धिं प्राप्ता ब्रह्मर्षयस्तथा ॥ ३० ॥ राजर्षय
श्च बहवो तदेतत्परमं भुवि ॥ नारद उ० ॥ इत्युक्त्वा हर्षितो विप्रैः सऋषीन्प्रतिपूज्य तान् ॥
३१ ॥ तैरेव सहितः प्रायादमृतेशं महेश्वरं ॥ नानाविधाभिः पूजाभिरभ्यर्च्य स शिवं मुदा ॥-
३२ ॥ तस्य माहात्म्यमतुलं ऋषिभ्यः प्राह भार्गवः ॥ भार्गव उ० ॥ एष वः सर्वभूतानामेक आ
त्मा सदाश्रयः ॥ ३३ ॥ धत्ते तेजोमयश्चायं सतत लोकान्सनातनः ॥ दधीचिर्नाम विप्रर्षिर्मृत्युं
ज्ञात्वात्मनः पुरा ॥ ३४ ॥ अमृतेशार्चनाद्वज्रकायो भून्मृत्युवर्जितः ॥ स्वच्छंदमृत्युर्यस्यासी
त्कुरात्तं प्रार्थ्य सेंद्रकाः ॥ ३५ ॥ वज्रमिंद्रायुधं चक्रुस्तेनाद्यापि जयत्यरीन् ॥ अन्येपि बह-
वो धीरा भक्त्याराध्यामृतेश्वरं ॥ ३६ ॥ सिद्धीः प्राप्ताश्च विविधाः क्रीडंते जितमृत्यवः ॥ नम
स्तस्मै महेशाय ज्योतिर्लिंगस्वरूपिणे ॥ ३७ ॥ यस्यादिं मध्यमंतं च ब्रम्हा विष्णुर्न वेत्ति हि ॥
नारद उ० ॥ इति स्तुत्वा प्रभुं नत्वा मुदितोऽसौ द्विजैः सह ॥ ३८ ॥ रामः कृत्वा ययौ सर्वक्षेत्रमेव-
प्रदक्षिणं ॥ गोःपादादिषु तीर्थेषु स्नात्वा स्नात्वार्चयन्पितॄन् ॥ ३९ ॥ देवांश्च समनुप्राप्तः संगमे
ब्राम्हणैः सह ॥ तत्र माध्यान्हिकं कृत्वा कर्तुं नित्यं शिवार्चनं ॥ ४० ॥ शुद्धैस्तत्र सुतैर्गंधपुष्प

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धूपादिभिःशिवं॥संपूज्यतस्मिन्हृष्टात्माचक्रेशिवमहोत्सवं॥४१॥अथोद्वासयितुंदेवं
कराभ्यांजगृहेप्रभुं॥नययौतत्करंदेवोरामःप्रापहिविस्मयं॥४२॥सशिष्यःक्लिश्यमानो-
पिकथंस्युर्मेमनोरथाः॥अथतत्रातयेरामस्तपस्तीव्रंसमाश्रितः॥४३॥ततस्तस्मात्स-
मुत्तस्थौलिंगात्ज्योतिर्मयःशिवः॥देव्यागणैश्चसहितःपुरतःप्राहतंस्मरन्॥माराम क्लिश्यतां
तातस्थास्याम्यत्रैवसर्वदा॥त्वयाचनव्यथाकार्यानमत्तोऽन्योसिभोप्रभो॥४५॥एवंप्रस-
न्नंतंनत्वास्तुत्वाचमुनिभिःसह॥तत्रैवस्थापयामासतल्लिंगंसंगमेश्वरं॥४६॥अद्यापि
दृश्यतेलिंगंकर्षणाद्युत्तराननं॥तत्संपर्कवशात्तत्रसंगमेतुजगद्गुरुः॥४७॥मध्यान्हात्प-
रतोद्यापिसर्वैस्तीर्थैःमहर्षिभिः॥कालेऽतीतेन्चमहतिमहेंद्रेचजगद्गुरुः॥४८॥पृष्टःस-
र्वाघशमनंप्राहेदंदेवसंसदि॥मागंगामाकुरुक्षेत्रंमागयामाचपुष्करं॥४९॥तत्रगच्छ
स्वश्रेष्टयत्रोदीचीमलापहा॥नारदउ॰॥एतद्वःकथितंविप्राभार्गवस्यमहात्मनः॥५०॥पु
चरितंतीर्थमाहात्म्यंश्रुतमात्राऽघनाशनं॥यस्तीर्थमेतत्सकृदप्युपेत्यसेवेत्क्रमाद्भार्ग-
वसंचरित्रं॥स्मरेदयश्चंपरिकीर्तयेद्वा भक्त्यासशसायुज्यमुपैतिशंभोः॥५१॥ ॥
इतिश्रीकृष्णामाहात्म्येमलापहासंगमवर्णनंनामपंचपंचाशत्तमोऽध्यायः॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥नारदउवाच॥ ततः पूर्वंवरंतीर्थंऐरावतमितिस्मृतं॥ तत्रले
भेगजैश्वर्यंतपसैरावतः पुरा॥१॥ तत्रस्नात्वानरस्तीर्थेगजैश्वर्यत्वमाप्नुयात्॥ मनोरथां
श्चलभतेशक्रलोकंसगच्छति॥२॥ ततोधनदतीर्थंप्राक्कुबेरोयत्रसंगमे॥ लेभेतत्कुबे-
मैश्वर्यंलोकपालत्वमप्यगात्॥३॥ लिंगतीर्थंततः पूर्वंशततलिंगंजलेस्थितंसिद्धसेव्यं-
महद्दिव्यंतत्स्थानंसर्वसिद्धिदं॥४॥ इंद्रेणकृष्णवेण्यांचकृताश्चक्रतवः परे॥ तीरेवि
श्वेश्वरोयत्रजटीसाक्षाच्छिवः स्थितः॥५॥ रुद्रस्यपश्चिमेस्थानंसद्योजाताह्वयंशुभं॥
वेणायांतुजटातीर्थंकोटिजन्माघनाशनं॥६॥ तस्यमाहात्म्यमतुलंवक्तुंस्कंदोपिनप्र-
भुः॥ मयूराख्योमहान्सिद्धः समाराध्यतुशंकरं॥७॥ सायुज्यंप्रापतेनेदंमायूरमितिकथ्य
ते॥ ततोवृषभतीर्थंतुसर्वपापविनाशनं॥८॥ ब्रम्हद्वेषाधेनुकश्चब्रम्हशापात्तुदेवलः॥
जातिस्मरत्वमापन्नोऽनड्डहोदेहमाश्रितः॥९॥ मुनीनांदर्शनात्कर्मस्मृत्वापूर्वकृतंमुदा
॥ द्विजत्वंप्रापतत्स्नानाद्गोचर्मभूमिदानतः॥१०॥ गतिंप्रापमहाप्राज्ञोवृषभोज्ञानमास्त-
वान्॥ तत्रस्नात्वाययोधीमान्सर्वलोकस्यपश्यतः॥११॥ एवंत्रयोदशैतानितीर्थानिक
थितानिच॥ येषांस्मरणमात्रेणसर्वपापंविनश्यति॥१२॥ भीमालिंगतटंनामपूर्वस्मा
त्तुनदीजले॥ यत्रास्तेशंकरः साक्षात्सूक्ष्मलिंगवपुर्धरः॥१३॥ लिंगतीर्थेनरः स्नात्वाशं-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 करंसंप्रपूज्यतु॥जातिस्मरत्वमाप्नोतिज्ञात्वामाहात्म्यमुत्तमं॥१४॥ततस्तीर्थंमहापुण्यं
 चित्रगुप्ताख्यमुत्तमं॥चित्रनामामुनिःप्राज्ञोराजर्षिर्बहुसंमतः॥१५॥मार्कंडेयस्यशि-
ष्योऽभूत्सर्वज्ञस्यतपोनिधेः॥प्रपच्छतंमुनिश्चित्रोभक्त्यासर्वोपकारणात्॥१६॥चित्र
उ०॥सर्वेषांप्राणिनांकर्मयथानुरूपमच्युत॥शिक्षाकार्याविविन्ध्यैवंतीर्थमेवदतद्गुरो॥
१७॥कस्मिन्दत्तंहिरण्यंचअन्नंवाबिल्वमात्रकं॥अल्पेनतपसासाध्यंपुण्यमानंत्यमश्नु-
ते॥१८॥मार्कंडेयउवाच॥तीर्थानांप्रवरंतीर्थंकृष्णावेण्यांतुपावनं॥छायाक्षेत्रेमहापुण्ये
देवह्रदमनुत्तमं॥१९॥इतितद्वाक्यमाकर्ण्यततापतपउत्तमं॥छायाक्षेत्रेततोवाग्मीश-
तवर्षंस्तुदुःसहं॥२०॥ततोगंगाप्रसन्नाभूत्तापसंतंकृशंमुनिं॥प्रोवाचजगतांधात्रीवरं
वरयसुव्रत॥२१॥इतिश्रुत्वाजगादोच्चैर्गंगांभुवनपावनीं॥नमस्कृत्वातुशिरसाप्रांजलि-
र्भक्तिनम्रधीः॥२२॥मातर्देहिवरंमह्यंसर्वलेख्यंजगत्त्रये॥मद्दिनापापपुण्यानांकर्तृत्वंमा
स्तुकर्मणि॥२३॥यमधर्मासनार्धेमेसर्वदास्तुममानघे॥प्रहस्यचित्रवाक्यंसाश्रुत्वाभ-
क्तानुकंपिनी॥२४॥तथैवभवतुक्षिप्रंत्वल्लेख्यंगुप्तमब्रवीत्॥चित्रगुप्तेतिनाम्नाचख्यातिं
यास्यसिचित्रगो॥२५॥अंतर्धानंजगामाशुस्वर्गंप्रापतपोबलात्॥एवमाकर्ण्यऋषयःसि
द्धास्कंदंतदोचिरे॥२६॥केनजातिस्मृतिःप्राप्ताछायाक्षेत्रेस्मयावहा॥तद्वदस्वमहाभा-

Jagannath Bhattarai Collection: Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गच्छ पयानोमहामते ॥२७॥स्कंदउ०॥जातिस्मरात्द्विधाभिन्नाकृष्णादेवनदीशुभा॥उत्त
रेतुप्रभूतायामनघात्माविशत्न्हदं॥२८॥तत्रापतंतीशैलात्सागंगाद्वारंप्रचक्षते॥वसि
ष्ठस्तपतांश्रेष्ठःपुत्रखेदमनुस्मरन्॥२९॥आलोक्यसर्वतीर्थानितत्रैवश्रांतमानसः
॥छायाक्षेत्रंमुनिर्यायान्मनसस्तुष्टिकारणात्॥३०॥सभृशंप्रापन्हाल्हादंमनःकालुष्य
नाशनं॥पद्मासनस्थःसमुनिर्बहुकालंतपश्चरन्॥३१॥कस्मिंश्चित्कालपर्यायेभूत्वाश्वा
कौशिकःस्वयं॥मेनकायाःसुकामिन्याःपृष्ठतोवेषमुत्सृजन्॥३२॥छायाक्षेत्रपथागच्छ
न्मुनिनादृष्टएवसः॥अर्धास्तमितदृष्ट्यातंजगादप्रहसन्मुनिः॥३३॥किमिदंक्रियतेनिंद्यं
स्वरूपंस्वंविहायतु॥गृहीतंह्विश्वुनोरूपंतपोनाशकरंपरं॥३४॥भोगाःसर्वललिताश्चाराधि
ष्णुश्चंचलगह्वराः॥त्यजैनांमेनकांहीनांबुद्धिमास्थायपौर्विकीं॥३५॥तपःसिद्धःसदा
भूत्वामनोनिर्विषयंकुरु॥खिन्नोऽनुतापःसहसासाधुदर्शनगौरवात्॥३६॥ज्ञानंप्राप्य
ऋषेर्वाक्यंश्रुत्वातंप्रणनामच॥विसृज्यरूपंसहसासारमेयस्यनिंदितं॥३७॥दिव्यंरूपंस
मास्थाययोगिज्ञेयंसकौशिकः॥त्राहीतिशिरसानम्यवसिष्ठंमुनिपुंगवं॥३८॥जातिस्म
रस्तदाचासीद्विश्वामित्रोमुनीश्वरः॥तत्तीरेतपसाप्रापअत्युग्रंज्ञानमुत्तमं॥३९॥ब्रम्हर्षेर्ष्या
वसिष्ठंतंजिघांसुःकालपर्ययात्॥तपतोऽग्रेगृहीत्वातंमहांतमुपलंमुनिः॥४०॥कराभ्यां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्क॰म यदसौमृत्युमेष्यत्यत्रनसंशयः॥ ततोऽनुतप्तः सहसाविश्वामित्रःप्रतापवान्॥ ४१॥ तस्यां- अ॰
११३ तःकरणंज्ञात्वाज्ञानदृष्ट्यात्रऋषीश्वरः॥धन्यस्त्वंकृतकृत्योऽसिब्रह्मर्षिरनुतापतः॥४२॥जा ५६
तोसीतिवचःश्रुत्वासमाश्लिष्यपरस्परं॥स्वाश्रमंकौशिकोयायाद्वसिष्ठस्तत्रतस्थिवान्॥
४३॥उपास्यदेवतामूर्तिश्छायारूपेणसंस्थिता॥ऋषेर्ध्यानादितातत्रप्रासासाभक्तवत्सला॥
४४॥छायाभगवतीदेव्यागंगामध्येनुकंपितः॥वसिष्ठस्तन्मतंज्ञात्वातत्रैवनिवसन्स्थिरः॥
४५॥तदाज्ञाधारकस्तत्रतस्थौदेव्यावचोगृणन्॥तत्रनद्यांस्नानदानाङ्गंगाद्वारेचमानवः॥
४६॥सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति॥तत्रकुंडानिबहुशःपीतनीलसितानिच
॥४७॥ह्रदाश्चपश्चिमेभागेसर्वपापहराणिच॥पतंतश्चनदीधाराःशिरसाताबिभर्तियः
॥४८॥सर्वपापविनिर्मुक्तोब्रम्हलोकेमहीयते॥तत्राद्यावनयंतीर्थंततःकन्याह्रदंतथा॥४९॥
ततोदेवह्रदंतीर्थंसोमह्रदमतःपरं॥सूर्यह्रदंततोज्ञेयंकृष्णवेण्यांतिकेद्विजाः॥५०॥षष्टिव-
र्षसहस्राणिवालखिल्याःसुमेधसः॥बदर्याश्रममासाद्यतपश्चक्रुर्मुदान्विताः॥५१॥अपृच्छ
न्नुपविष्टास्तेतीर्थंलोकपितामहं॥बदर्याश्चाधिकंतीर्थंत्वयादृष्टंवदस्वनः॥५२॥ब्रम्होवा॰
॥बदर्याश्चाश्रमेपुण्येविष्णोर्ममशिवस्यच॥उषित्वादशसाहस्रंवर्षाणांयस्तुतंतपः॥५३॥
पुमान्तत्फलमाप्नोतिदृष्ट्वादेवह्रदंसकृत्॥प्रयागेथसहस्राणिवर्षाणांफलमाप्नुयात्५४॥ २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कृ॰म तदाप्नोतिफलंसाक्षाद्दृष्ट्वादेवह्रदंनरः॥तीर्थान्यन्यानिशतशोदिविभुव्यंतरिक्षके॥५५॥ता अ॰
११४ निदेवह्रदेयांतिराहुग्रस्तेदिवाकरे॥ एकंवाब्राम्हणंतत्रभोजयित्वायथाविधि॥५६॥अ ५६
न्यत्रतीर्थसंघेषुकोटिब्राम्हणभोजनं॥कन्याह्रदेतुमध्याह्नेदेवदुंदुभिनिःस्वनः॥५७॥अ
द्यापिश्रूयतेयत्रतस्यपुण्यफलंश्रृणु॥क्षणमात्रंस्थितस्तत्रस्नात्वातीर्थेसमाहितः॥५८॥-
स्वनश्रवणमात्रेणकोटिजन्माघनाशनं॥पुत्रपौत्रसमृद्धिश्चयोगिनांगतिमश्नुते॥५९॥ए
तद्देवह्रदंनामतत्रतीर्थानिकोटिशः॥माययावरदोवीरःसंपतन्गिरिकंदरे॥६०॥तस्याद्यापिप्र
तिछायादेवह्रदसमीपतः॥विषये[1]चोत्तरेदेव्यादृश्यतेगिरिकंदरे॥६१॥पुरापहृत्यदैत्येभ्यो-
विष्णुस्त्रीरूपधृक्सुधां॥वंचयित्वाह्रदेतस्मिन्सुरेभ्यस्तांददौहरिः॥६२॥माययावरदः
पश्चादपतद्दैवतैःसह॥विधायैवंस्थितादेवातस्थानेपुण्यदेशुभे॥६३॥अपश्यन्पुंडरीकाक्षंत
तस्तत्रसहस्रपते॥समीपेतुस्थितादैत्यास्तस्मात्तत्रनदृश्यते॥६४॥स्त्रीरूपधारिणंदेवंसर्व
पापप्रणाशनं॥देवाश्चऋषयश्चैवतमुपास्यमुपासते॥६५॥एतत्क्षेत्रंकुरुक्षेत्रात्प्रयागा
न्नैमिषादपि॥सर्वेभ्यस्तीर्थवर्येभ्योप्यधिकंतत्प्रचक्षते॥६६॥नारदउवाच॥तदेतद्ब्रम्ह
णाप्रोक्तंमार्कंडेयःपुराब्रवीत्॥श्रोतव्यंचमुनिश्रेष्ठास्तत्सर्वंवोमयोदितं॥६७॥यइदं
श्रृणुयान्नित्यंभक्त्यापीयूषसंभवं॥तत्पुण्यंस्नानजनितंप्राप्नोत्येवनसंशयः॥६८॥ ॥इ-
तिश्रीकृष्णामाहात्म्येछायाभगवतीतीर्थवर्णनंनामषट्पंचाशत्तमोऽध्यायः॥५६॥ ॥ ३

१ टि- देशे.

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥स्कंदउ०॥ततःसप्तऋषीणांचतेपुर्यत्रमहर्षयः॥तपस्तत्संज्ञकंतीर्थं
यत्रप्रज्ञांलभेन्नरः॥१॥विश्वामित्रस्ततःप्राचींययौतत्रतपोधनः॥तापसैःपूजितस्तत्रसुतप्तै
तेपेमहत्तपः॥२॥ततस्तस्यपुरःसाक्षात्कृष्णान्वनिजरूपिणी॥श्यामांगीविष्णुचिन्हाढ्या
प्रीतास्मीत्यभ्यभाषत॥३॥तांदृष्ट्वासहसोत्थायप्रणम्यभगवत्तनुं॥विश्वामित्रोऽब्रवीद्वा
क्यंहर्षगद्गदयागिरा॥४॥विश्वामित्रउ०॥नमस्तेसर्वपापघ्निसंसारभयनाशिनि॥नाराय
णिजगन्मातस्त्राहिमांशरणागतं॥५॥स्तोतुंप्रगल्भःकोमातस्त्वांपरब्रह्मरूपिणीं॥तथा-
पिभक्तिहीनस्यस्तुतिधाष्टर्यंक्षमस्वमे॥६॥भूमिस्त्वंदेविभूतानांतत्वानांत्वंमनोमयं॥तापा
तिशमनात्तोयंपापानांदहनाच्छिखी॥७॥धूतपापानृणांचैवसर्वसत्वाश्रयाह्यसि॥पंचभूता
त्मिकैवत्वंभासिविष्णुमयीयतः॥८॥नकेवलंपूरयसिजलधिंजलसंपदा॥प्रपूरयसिभक्ता
नांकामान्सर्वान्मनोगतान्॥९॥त्वांप्राक्स्नातुंसमासाद्यपूर्यतेइतिवाग्मृषा॥त्वंवैप्रयाण
पाथेयंविष्णुलोकप्रदाह्यसि॥१०॥दूरात्स्मृताघौघघ्नीस्नानेनेष्टफलप्रदा॥मुक्तिस्त्व
द्दर्शनाद्देविनजानेस्नानजंफलं॥११॥तीर्थस्यामिनिधन्यास्तेत्वत्तीरस्थामृगादयः॥स्था
वराश्चाधिकंधन्याःस्वेच्छयास्नांतियेत्वयि॥१२॥त्वत्तीरवासिनःस्यामोमातर्जन्मनिजन्म
नि॥त्वत्तीरस्थावयंमातर्यत्किंचिदपराक्रमः॥१३॥तत्क्षमस्वाशुचिःकायःसदादोषःस्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कं॰म॰ वन्मलः प्रसीदमेदेविसदापरेज्येदेवेनसृष्टाजगतांविमुक्तये ॥ स्नानेनयस्यामयधूतपापः प्राप्नो अ॰
११६ तिविष्णोः पदमेवमर्त्यः ॥१४॥ नारद॰ ॥ एवंसंस्तुवतस्तस्यतुष्टादेवीवरंददौ ॥ वव्रेसोपीच्छया ५७
मुक्तिंतथास्त्वितिचसाब्रवीत् ॥ १५ ॥ आवयोर्यश्चसंवादस्तोत्रंचैवप्रकीर्तयेत् ॥ सिध्यंति
कामास्तस्यापीत्युक्त्वान्तरुपदधे ययौ ॥ १६ ॥ विश्वामित्रोप्यतःपश्चात्तत्रैवन्यवसच्चिरं ॥ तदे
तत्परमंतीर्थंविश्वामित्राख्यमद्भुतं ॥ १७ ॥ ततः प्राक् प्रवरंतीर्थंऋष्यश्रृंगाश्रमेशुभे ॥ ततः
कर्कटिकास्थानंतत्रस्नात्वाविमुच्यते ॥ १८ ॥ लवणाख्यंततस्तीर्थंततोलिंगंतटंशुभं ॥ तत्र
स्नात्वाशिवंदृष्ट्वारुद्रलोकेमहीयते ॥ १९ ॥ ततोभीमरथीयाताकृष्णायोगाभिकांक्षिणी ॥
यत्रशंभुःस्वयंभूतःसंगमेशेतिकीर्त्यते ॥ २० ॥ तत्संगमेमहातीर्थेस्नात्वादृष्ट्वाचदेवताः ॥ स
र्वजन्मकृतंपापंत्यक्त्वामुक्तिमवाप्नुयात् ॥ २१ ॥ गिरित्रयाभिधंदेवंतत्तीर्थंचमहाफलं ॥ तत्र
स्नात्वानरोभक्त्याब्रह्मलोकेमहीयते ॥ २२ ॥ तत्पार्श्वेलवणोनामगिरिर्भूत्वानिशाचरः ॥ देवीं
विशुद्धामायातोगच्छंतीपापमुक्तये ॥ २३ ॥ गर्जतंतमथासाद्यकृष्णावेणाभसातदा ॥ दृष्ट्वा
विष्णुश्चतरसाविभेदसमहासुरं ॥ २४ ॥ सोपितत्तोयसंस्पर्शान्नष्टाघौघोदिवंययौ ॥ कृ
तार्थस्तुततोदेवींस्तुत्वालेभेऽसुरोवरं ॥ २५ ॥ अतःस्नानेनविख्यातंतीर्थमेतन्महाफलं ॥
स्नायाद्यःलवणभेदेयःकृष्णांकृष्णांचसंस्मरन् ॥ २६ ॥ सर्वकामानवाप्नोतिविष्णुलोकंसगच्छति १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततः परं यत्र कृष्णातुंगभद्रासमागमः ॥२७॥ जातो जगद्धितार्थाय सर्वलोकविमोक्षदः ॥
तत्र संगे महानद्याः स्नानमात्रेण वै द्विजाः ॥२८॥ सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥
तत्र ब्रम्हेश्वरः साक्षाद्ब्रम्हणा निर्मितः पुरा ॥ २९॥ संगे स्नात्वा तमभ्यर्च्य प्राप्नोति परमां गतिं ॥
तन्नस्नानान्निवर्तंते ह्यघौघाः संस्मृतेरपि ॥ ३०॥ स्नानिवृत्तिं ततः प्राप्तात्कृष्णातीरमु-
त्तमं ॥ तत्संगमे नरः स्नात्वा गायत्रीं च त्र्यहं जपन् ॥ ३१॥ ब्रम्हलोकं व्रजेन्मुक्तो विशेषेण र-
विग्रहे ॥ ततो लिंगतटं नाम तीर्थं स्नानाद्धि मुक्तिदं ॥ ३२॥ भीमेश्वरस्ततो मध्ये यस्यादौ पूजनं
भवेत् ॥ ऋषय ऊचुः ॥ किमिदं भवता चोक्तं भीमो यत्रास्ति नामतः ॥ ३३॥ निवृत्तिसंगमः क
स्मात्ख्यातः कृष्णातटे गुह ॥ स्कंद उ० ॥ शृणुध्वं मुनयः सर्वे विचित्रं स्कमनोहरं ॥ ३४॥
श्रवणाज्जायते नित्यं निर्वृतिस्तु पदे पदे ॥ द्वापरे वासुदेवस्तु पांडवैः सह आययौ ॥ ३५॥ कृ-
ष्णातटं समासाद्य रम्यं भुवनपावनं ॥ मनसोपशमो यत्र तत्रा निर्वृतिरप्यभूत् ॥ ३६॥ उवा-
चोच्चैः स कृष्णस्तु धर्मराजं युधिष्ठिरं ॥ तीर्थं ज्ञानप्रदं साक्षाद्वैराग्यैकनिधिः प्रभो ॥ ३७॥ अ
स्मिन्तीर्थे संगमे यो दुर्लभश्च शरीरिणां ॥ किं किं न तीर्थराजोयं नरान्दास्यति स्कृवत ॥ ३८॥
श्रुत्वा कृष्णस्य वचनं प्रहसन्स युधिष्ठिरः ॥ त्वमेव सर्ववेत्तासि यथा योग्यं तथा कुरु ॥ ३९॥
एतादृशः पुमान्कोत्र सिद्धलिंगं सबीजकं ॥ स्थापयिष्यति वै यत्नाद्विना काशीं च केशव ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४०॥इतिधर्मवचः श्रुत्वाभीमोधर्मंचकेशवं॥अब्रवीदानयिष्यामिमुहूर्तेद्वादशेऽह्निके॥
४१॥तेतुष्टमनसः सर्वेसाधुसाध्वितितंब्रुवन्॥गच्छशीघ्रमितोभीमदेवस्थापितमत्रतु॥
४२॥वाराणस्यांतुजीर्णंयत्पूजार्हंसर्वकामदं॥स्वसामर्थ्यानुरूपंतुशीघ्रमानेतुमर्हसि॥
४३॥ओमित्युक्त्वाभीमसेनोऽवधिंसंश्रुत्यकृष्णतः॥द्वादशाहेमुहूर्तेचागमिष्यामित्वरान्वि
तः॥४४॥इत्युक्त्वासजगामाशुकाशींत्रिनयनात्मिकां॥लिंगंमहत्तदागृह्यस्कंधेधृत्वाह्युदा
रधीः॥४५॥सत्वरंपंचपंचाशद्योजनानिचचारह॥द्वादशेदिवसेप्राप्तेमुहूर्तेद्वादशेतदा
॥४६॥व्यग्राःपार्थानददृशुर्भीमंपरनिषूदनं॥मुहूर्तातिक्रमःकृष्णकिंकर्तव्यंतुतापसैः
॥४७॥तावत्कृष्णोजगादोच्चैरुपायंचिंत्यतामिति॥शुष्कंतुतिंतिडीवृक्षमूलंतत्तीरसं-
श्रितं॥४८॥आनयध्वंस्थापनायेत्युवाचमुनिसत्तमान्॥कृष्णवाक्याच्चमुनयोलिंगंदा-
रुमयंशुभं॥४९॥पूजार्हंपूजयामासुःपूज्यास्तेतपसोबलात्॥तावद्भीमोपितल्लिंगंगृही-
त्वारुष्टोऽभ्यगात्॥५०॥दृष्ट्वाभीमोपिसंक्रुद्धःप्रोक्तवान्किंकृतंहिभो॥तल्लिंगंप्राक्षिप
द्भीमोनद्यांबलसमुच्छ्रयात्॥५१॥तत्साहसंभीमकृतमवलोक्यतदाहरिः॥प्रोवाचऋषिसं
घानांशृण्वतांभीममित्यतु॥५२॥त्वतःकालातिक्रमेपिजातेकिंसाहसंकृतं॥तथापिशृणु
कौंतेयभीमलिंगंभवेदिदं॥५३॥पूजयेत्प्रथमंचैतत्पश्चान्मत्स्थापितंनरः॥सफलंपूजनं

१टि० द्वादशेइतिशेषः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य नोचेद्व्यर्थं भविष्यति॥५४॥ तथैवारक्त सदा लिंगं नागाकारं फणान्वितं॥ ख्यातिं या
स्यति सर्वत्र भीमेश्वरमिति स्थितं॥५५॥ श्रुत्वाध्यायमिमं सम्यक्श्रावयेद्वा समाहितः॥
निवृत्तिसंगमस्नानजनितं फलमाप्नुयात्॥५६॥ ॥इति श्रीस्कंदपुराणे कृष्णामाहा-
त्म्ये सप्तपंचाशत्तमोऽध्यायः॥ ॥श्रीशंकरार्पणमस्तु॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ स्कंदउवाच॥ ॥निवृत्तिसंगमादग्नेबाणयुग्मांतरेणहि॥ कृ-
ष्णातीर्थमितिख्यातंकृष्णपादाब्जवंदनात्॥११॥तत्तीर्थदर्शनान्नित्यंमहापातकनाशनं॥
कृष्णतीर्थेनरःस्नात्वाविष्णुलोकंसगच्छति॥२॥ततःश्रीपर्वतंदेवीगच्छंतीतंसनातनं॥
ददर्शदेववरंदैश्वसाक्षाद्धुंभोर्निकेतनं॥३॥नानाश्चर्यमयेतस्मिन्सिद्धगंधर्वसेविते॥स-
दासंन्निहितोरुद्रोदेव्यासर्वगणैःसह॥४॥तंदृष्ट्वाश्रीगिरिंदेवीसर्वदेवाश्रयंशुभं॥त्रायंती-
नाममात्रेणगंगाकृष्णाघहारिणी॥५॥विनयादिवगच्छंतींप्रीत्याखाहूयतांस्मरा:॥आगच्छ
वरदेगंगेसर्वलोकैकपावनि॥६॥सर्वगेत्वंजटोद्भूतेकृष्णावेणिमहापथि॥गिरिंदृष्ट्वामहा
रौद्रंसिध्धयोगिनिषेवितं॥७॥दुर्भेद्यंमंत्रतश्चैवंदर्शनादघनाशनं॥प्रादक्षिण्येनगंतव्यमि
मंदेशंविहायच॥८॥सामर्थ्यमत्रकिंतेस्यादृजुमार्गेणगच्छती॥भित्वैनमेहिचेत्याहुर्गि-
राश्चोभयतःस्थिताः॥९॥एतदाकर्ण्यसहसाकृष्णावेणीचुकोपह॥ततोविभेदतंशैलंदुर्भे-
द्यंजललीलया॥१०॥पातालगंगेत्यभिधांलेभेगव्हरगामिनी॥ततस्तुष्टास्तुतेदेवासर्वेदे-
वींवरान्ददुः॥११॥सान्निध्यंतेसदाचास्तुतथेत्युक्त्वाजगामह॥गंगात्रिपथगायत्रजलक
ल्लोलराशिभिः॥१२॥भोगावलीसमुद्भूतासीदितिलपर्वतांतिके॥रवेःकिरणजादेवीयमुना-
चापिसंगता॥१३॥नीलगंगेतित्रयपयोनामचक्रुर्मुदान्विताः॥गंगाचयमुनाचैवह्यंतर्गुप्त

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

 सरस्वती॥१४॥कृष्णवेणीभीमरथीतुंगभद्रामलापहा॥पंचगंगावेत्रवतीवेणुनादेलसांव
 रा॥१५॥सर्वाभिःसुशुभेगंगासंगताभिर्विचित्रिता॥पातालगंगांनीलांचकल्लोलाभिर्निचो
चिरे॥१६॥देवाश्चसिद्धसंघाश्चऋषयश्चतथापरे॥तुष्टुवुर्भक्तिनम्राश्चकृष्णवेणींत-
मोनुदां॥१७॥सर्वेऊचुः॥नमामत्वांकृष्णवेणींसर्वपापौघनाशिनीं॥जटाजूटसमुद्भूते
ब्रम्हण्येब्रम्हवादिनि॥१८॥पावनीपतितानांचत्वमोघ्नीस्नानमात्रतः॥देववंद्येमहाभागे
दर्पघ्नेगिरिकंदरे॥१९॥पंचरूपासितन्मात्रेघोतनीवरदेशुभे॥गंगागंगेतिजपतःसर्वाघौ
घविकर्षिणी॥२०॥सामर्थ्यदर्शिनीदेविसर्वेषांहितकारिणी॥ज्ञानविज्ञानरूपात्वंश्रीगिरौ
दृष्टवत्यसि॥२१॥नमोनमस्तेदेवेशिनमस्तेपापकर्षिणि॥नमोस्तुकृष्णवेणीतेभक्त्यातु
भ्यंनमोनमः॥२२॥स्तुतानिमेतांसमाकर्ण्यगिरिदर्पविदारिणी॥प्रोवाचतान्प्रहस्यैवंसर्वा
न्देवादिकान्मुदा॥२३॥कृष्णाउ॰॥गिरिंभेदितुमायातांमांनमन्यंतभोसुराः॥शृणुध्वंस
र्वएवैते हेतुंगिरिविदारणे॥२४॥मार्कंडेयोऋषिःसिद्धोदिव्यवर्षसहस्रकं॥ततुमत्रगि
रौतिष्ठन्मदर्थेपुण्यधीस्तपः॥२५॥तद्दर्शनार्थमायाताभगवच्चरणांबुजे॥ध्याननिष्ठंम-
हायोगकारिणंचतपस्विनं॥२६॥पातालविवरेदेवास्तिष्ठंतंबहुमानिनं॥श्रीशैलेदिव्यलिं
गंचतीर्थवर्यंविनाकथं॥२७॥पूतास्युःकथमेवंहिसद्गतिंयांतिमानवाः॥इत्याक्षिपद्रेम-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नसापरोपकृतयेमुनिः ॥ २८ ॥ एतादृशानांसिद्धानांयोगिनांध्याननिष्ठया ॥ तदंघ्रिरज-
साजुष्टपावनीह्यघहारिणी ॥ २९ ॥ वंदितुंयोगिनश्चरणौसमायातागिरिंसुराः ॥ तेषांपादर-
जोभिश्चसामर्थ्योत्कलुहारिणी ॥ ३० ॥ तद्दर्शनमहोत्पातहारिणीद्रष्टुमागता ॥ सदाशिव
महंद्रष्टुंमल्लिकार्जुनमंततः ॥ ३१ ॥ दिव्यलिंगंसदाशांतंभक्तानुग्रहकारकं ॥ यद्दर्शनान्म
हापापगजसंघसमुन्नतिं ॥ ३२ ॥ नाशयत्येवसुप्रीतः पंचाननमहाध्वनिः ॥ इतितद्वाक्य
माकर्ण्यत्राहित्राहीतिवादिनः ॥ ३३ ॥ सर्वेप्रांजलयस्तस्थुःकृष्णावेणींसुभक्तितः ॥ ततो
जगादसुप्रीतामत्तीरेयेवसंतिते ॥ ३४ ॥ पुण्यमासाद्यवैदेवामत्पदंप्राप्नुवंतिवै ॥ धन्यास्त-
एवमनुजाःश्रीगिरौशिवदर्शनात् ॥ ३५ ॥ इत्युक्त्वाप्रययौकृष्णागजंतीसमतीत्यगां ॥ श्रीशै
लेयःपुमान्गत्वाभक्त्यासंतुष्टमानसः ॥ ३६ ॥ पातालगंगांदृष्ट्वैमांसर्वपापैःप्रमुच्यते ॥ श्रू-
प्यालिसंगमेचैवछायायांश्रीगिरौतथा ॥ ३७ ॥ सर्वत्रसुलभाकृष्णाचतुःस्थानेषुदुर्लभा-
॥ तत्रापिदुर्लभतरानीलगंगासितासिता ॥ ३८ ॥ सर्वक्षेत्रमयःसोऽद्रिःसर्वदेवमयःशि-
वः ॥ सर्वतीर्थमयीकृष्णासर्वेब्रम्हसमाद्विजाः ॥ ३९ ॥ ततःस्वमंडलाद्भानुःकृष्णांदृष्ट्वा-
ह्यवातरत् ॥ सतांस्तुत्वाचनत्वाचवरंलेभेततोहरिः ॥ ४० ॥ ततश्चंद्रोह्यमृतवान्द्रष्टुमाश्व
यगामिनीं ॥ स्तुत्वातांचवरंलेभेकृष्णांतिकमितिद्विजाः ॥ ४१ ॥ स्नात्वापातालगंगायांस्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यंचंद्रमसेश्वरौ॥पूजयित्वालभेन्मर्त्यःसर्वकामनिवृत्तिता॥४२॥ततःसप्तनदीभेदंतीर्थं
त्याद्गुहस्तदा॥तत्रस्नात्वानरोभक्त्यासर्वपापैःप्रमुच्यते॥४३॥ततःसप्तनदीयोगात्पुन
स्तीर्थानितान्ब्रुवन्॥केदारेचोदकंपीत्वाकाश्यांतुमरणाद्ध्रुवं॥४४॥श्रीशैलशिखरंदृष्ट्वा
पुनर्जन्मनविद्यते॥स्नात्वापातालगंगायांदृष्ट्वातंमल्लिकार्जुनं॥४५॥सर्वपापविनिर्मुक्तो
मुक्तिंप्राप्नोतिमानवः॥इतितद्वाक्यमाकर्ण्यऋषयश्चतपोधनाः॥४६॥विस्मयात्परिप
प्रच्छुःस्कंदंसर्वज्ञमुत्तमं॥ऋषयऊचुः॥केमुक्ताःश्रीगिरेःशृंगंदृष्ट्वात्वद्वदनोद्गुह॥४७॥-
प्रतीतिस्तत्रकैर्दृष्टावदनोप्रीतितत्परान्॥स्कंदउ॰॥कान्यकुब्जेद्विजाःसप्तदुर्वृत्ताःपाप-
लोलुपाः॥४८॥अर्थापहारिणोनित्यंपरेषांलुब्धकाःशठाः॥चोराव्यसनिनश्चापिजन्मम
त्रेणवैद्विजाः॥४९॥बहिष्कृताद्विजैःसर्वैःपापकार्येषुतत्पराः॥तदाशरणमायाताब्राह्मणा
न्संशितव्रतान्॥५०॥ब्रूततीर्थंक्षेत्रमनुसर्वपापापहंचनः॥तद्वाक्यश्रवणाद्विप्राःश्रीशैलं
मुक्तिदायकं॥५१॥गच्छंतुमाचिरंसर्वेपापनिष्कृतयेपुनः॥सर्वतीर्थानितेविप्राःपर्यटंतोपि
सर्वतः॥५२॥तथापिनस्फुरत्वंचित्तेह्यावृताराक्षसैर्हठाः॥गंतुमिच्छुर्यदाविप्राःश्रीशैलंभक्ति
तत्पराः॥५३॥राक्षसाभीतिमापन्नामृतिमापुस्तदापथि॥श्रीशैलशिखरंदृष्ट्वायत्रागमन
शालिनां॥५४॥पापानिरूपतस्तत्रनिर्गतानीहतत्क्षणात्॥भस्मीभूतानिदृष्ट्वैवविद्वांसोत्ता- २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नतत्पराः ॥ ५५ ॥ धन्यामिमांयोगिगम्यांगतिमास्थायनिर्वृताः ॥ नीलगंगांसमाजग्मुःस्ना
त्वाभक्त्यैकमानसाः ॥ ५६ ॥ संपूज्यदेवंवरदंश्रीशैलेमल्लिकार्जुनं ॥ तत्रस्थाब्राम्हणाःप्रोचु
र्निःपापायूयमत्रतु ॥ ५७ ॥ तदासंशयमापन्नाः कथंनोभूतपापतः ॥ ब्राम्हणाऊचुः ॥ गच्छंतु
नंदिसान्निध्यमस्माभिः शंकरानुगं ॥ ५८ ॥ सभस्सयेद्यदाकिंचिद्धान्यंवातृणमेवच ॥ तदा
प्रतीतिविंदंतुह्यस्मद्वाक्यान्नसंशयः ॥ ५९ ॥ विस्मयंपरमंजग्मुर्नंदिनंपुरतःस्थितं ॥ शि
लामयंजडंविप्रायाथातथ्येनसंविशन् ॥ ६० ॥ अभक्षयत्तदाधान्यंसर्वेषांपश्यतांसतां ॥ सदा
शिवस्तदादृष्ट्वा अशपन्नंदिनंद्विजाः ॥ ६१ ॥ पर्याप्तमेतत्कार्यंचयत्रपापनिदर्शनात् ॥ शि
खरीश्वरेमहद्दिव्यंमल्लिकार्जुनमेवच ॥ ६२ ॥ तदेवभवतुक्षिप्रमितिसर्वेऽनुमेनिरे ॥
॥ इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येमल्लिकार्जुनवर्णनंनामाष्टपंचाशत्तमोऽध्यायः ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ऋषयऊचुः॥एतादृगंदिव्यलिंगंदर्शनान्मुक्तिदायकं॥नदृष्टंस्कंदत्वामा
भिर्मनःशांतिकरंतथा॥१॥यदक्षेत्रमितोलोकेवरिष्ठंचेदृशंगुरो॥स्कंदउ०॥शृणुध्वंमुन
यःसर्वेकथांचित्तोपद्वंहिकां॥२॥यत्क्षेत्रदर्शनाद्विमोह्यगस्त्यस्सुखमाप्तवान्॥त्रयाणाम
पिलोकानामुपकारकृतेमुनिः॥३॥विंध्यस्यदमनंविद्वानसाध्यममरैरपि॥काशीवियोग
जंदुःखंप्रमृजन्श्रद्धयान्वितः॥४॥आलोक्यसर्वतीर्थानिनलेभेशर्मकुत्रचित्॥श्रीशैल
मन्वगाद्देवात्पातालगंगयायुतं॥५॥तस्यवैशिखरंदृष्ट्वामुनिःसंतोषमाप्तवः॥शंकरंच-
नमस्कृत्यश्रीशैलेमल्लिकार्जुनं॥६॥स्तोत्रैर्नानाविधैर्देवंस्तुत्वाप्रांजलिरग्रतः॥तदोवा
चमहादेवोह्यगस्त्यंतपसांनिधिं॥७॥त्वयापीतःसमुद्रोवैहतौदैत्यौमहामुने॥वातापील्व
लनामानौविंध्याद्रिर्दमितस्त्वया॥८॥परोपकारणार्थंहियोजीवेत्सहिजीवति॥श्वसन्मृतः
सविज्ञेयोयःस्वार्थमुपजीवति॥९॥परोपकरणंयेषांजागर्तिहृदयेसदा॥सर्वतीर्थानित
त्रैववसंतिऋषिसत्तम॥१०॥परोपकरणंयेषांहृदयेसंवसेच्चिरं॥नश्यंतिविपदस्तेषां
संपदस्तुपदेपदे॥११॥करिकर्णाग्रन्चपलंजीवितंऋषिसत्तम॥परोपकारोयदिन्चेदजरा
मरसंभूतः॥१२॥स्कंदमाकारयामासदृष्ट्वेन्मुनिसत्तम॥महत्तेसुकृतंभूयादिष्टदर्शन
जान्मुने॥१३॥इतिदेववचःश्रुत्वाऋषिःपीयूषसन्निभं॥तदाजगामसुप्रीतःस्कंददर्श
नलालसः॥१४॥कृष्णांद्रष्टुंयदागस्त्यस्तीरेतीरस्थतीर्थकां॥पदेपदेवंदयन्सतीर्थानिविच्च

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

चारह॥१५॥दुर्गांददर्शसहसासपत्नीकौमुदान्वितः॥कनकारव्यांमहाभागांदर्शनामृतवर्षि
णीं॥१६॥लोपामुद्रालदोवाचआरव्यानंब्रूहिमेमुने॥तत्रास्थितस्तामुनिःप्राहलोपामुद्रांप-
तिव्रतां॥१७॥भगवत्याश्चमाहात्म्यंवक्तुमारभतात्ततः॥अगस्त्यउ०॥पश्यदेवींवरारोहे
दुर्गांकनकसन्निभां॥१८॥नृसिंहंनिजभक्तेशंप्रल्हादवरदंशृणु॥नारसिंहोयदालक्ष्म्या-
प्रल्हादंतुररक्षह॥१९॥भित्वाहिरण्यकशिपुंदैत्यंत्रिभुवनापहं॥श्रांतोनृसिंहःसहसाप्र
ल्हादस्तुतदाहरिं॥२०॥प्रांजलिःपरिपप्रच्छकिंचोपशमनंवद॥नृसिंहोवाचसंप्रीत्यामा-
धवेश्रांतवानहं॥पानकंचोत्तमंदैत्यवंशपावनकारय॥प्रल्हादःप्रीतमनसापानकंगुडजं
तदा॥कृत्वासमर्पयद्देवंसोऽपिवद्भक्तदापितं॥सहस्रकलशारूढंपीत्वातृप्तिमुपागमत्॥
२३॥प्रल्हादःप्रार्थयामासप्रसादोच्छिष्टमद्यवै॥अवशिष्टंयदिस्वामीन्त्रैलोक्येपावनंभ-
वेत्॥२४॥अट्टहासात्ततोदेवःसाधुसाध्वितितंब्रवीत्॥यस्ययोविहितःकामःपानकंक-
र्तुमुद्यतः॥२५॥तावदर्धंगृहीष्यामिभक्तानुग्रहतोऽसुर॥इत्याकर्ण्यतदादेवीलक्ष्मीकन-
कसुप्रभा॥२६॥तुतोषासुरवाक्येनभक्तानुग्रहकारिणी॥सुवर्णवृष्टिरभवत्तत्कालेभक्तितः
शृणु॥२७॥तावज्जगामतंद्रष्टुंनृसिंहंभक्तवत्सलं॥महापर्वतसंदर्प्पंभित्वामध्येनसाय-
यौ॥२८॥एकतोदिशिदुर्गासाऽपरतोपानकाधिपः॥मध्येविराजतेकृष्णासर्वेदेवास्तदाग
ताः॥२९॥प्रहस्यमनसादेवास्तुष्टुवुर्देवमंजसा॥देवाऊचुः॥नमस्त्रैलोक्यनाथायदैत्यद १

१ अउभावआर्षः

CC-0. Digitized by eGangotri and MIDF- Delhi

र्पविनाशिने॥३०॥नमस्तेवरदेशायनृसिंहायनमोनमः॥निष्किंचनजनैर्वंद्यानिष्किंच
नजनप्रिय॥३१॥वित्तमत्तश्चदेवेशानारसिंहनमोऽस्तुते॥सर्वेदेवाःसमाजग्मुर्नृसिंहंपा-
नकैस्तदा॥३२॥कोटिलक्ष सहस्रैश्चशतसंख्यैर्दशावरैः॥यथाभक्त्यानुरूपैश्चपूजां
चक्रुर्मुदान्विताः॥३३॥तद्भक्त्यानुपपौदेवोनारसिंहोऽधर्मेवच॥आहित्राहीतिजल्प
तःकृष्णांदृष्ट्वापुनर्ययुः॥३४॥इतिश्रुत्वामुनेर्वाक्यमगस्त्यस्यसधर्मिणी॥लोपामुद्रानरह
रिंपूजयामाससादरं॥३५॥अगस्त्योपिनिरूप्यैतत्स्वामिनंद्रष्टुमाययौ॥कृष्णातलोज-
गामाशुकलिकल्मषनाशिनी॥३६॥समुद्रंद्रष्टुमापेदेतरंगोल्लसतीजलैः॥पावयामास
देशांश्चस्नानहीनान्नरान्मुदा॥तस्यांतीर्थान्यनेकानिपापघ्नानिततोद्विजाः॥३७॥वक्तुंश
क्नोम्यहंनैवविशेषांश्चवदाम्यहं॥तीर्थवर्यान्महादेशेश्रृणुध्वंऋषिसत्तमाः॥३८॥ऋष
यऊचुः॥तानितीर्थानिवैस्कंदब्रूहिसर्वज्ञसुव्रत॥त्वन्मुखोद्गतपीयूषसेवनातृप्तिमा-
प्नुमः॥३९॥अतोदेवेशकृष्णायाःसागरावधितोवद॥स्कंदउ०॥अन्यत्तीर्थंप्रवक्ष्यामिती
र्थानामुत्तमोत्तमं॥४०॥विख्यातंतारकंतीर्थंयोजनांतरसंस्थितं॥याज्ञवल्क्यादयःसर्वेती
र्थान्यालोक्ययत्नतः॥४१॥तारकंचसमाजग्मुर्गंगातीरेविशेषतः॥तावत्तेददृशुर्वृक्षंरास
भैर्जुष्टमंततः॥४२॥तेषांदर्शनतोमुक्तास्त्राहीतिशरणंययुः॥याज्ञवल्क्यादयःसर्वेविस्मयंप्रापु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृ॰म रंजसा ॥ ४३ ॥ अभ्यर्थ्यवृक्षादुत्तीर्यस्ववृत्तांतंनिवेद्यच ॥ वयंब्राह्मणदायादारूपविद्याजनै अ॰
१२३ र्हृताः ॥ ४४ ॥ एकदावामदेवंतुदृष्ट्वाज्वलत्तपसाकृशं ॥ गंगातीरेध्याननिष्ठंहास्यंचक्रुरनादृताः ५९
॥ ४५ ॥ किंचिन्नोवाचसऋषिस्तपोव्ययविशंकया ॥ स्वकर्मणागतिःमाताचेदृशीविषयालु
रैः ॥ ४६ ॥ अवस्थांप्राप्नुवंतश्चवृक्षमूलमुपाश्रिताः ॥ भवतांदर्शनार्थंतुसमा गतास्त्वरण्यतः
॥ ४७ ॥ साधूनांदर्शनादेवमहापातकसंक्षयः ॥ जायतेतत्क्षणादेवसर्वदाकरुणात्मनां ॥ ४८
॥ इतिवाक्यंसमाकर्ण्यकृपाविष्टामनस्विनः ॥ कृष्णाजलैःसिषिंचुस्तेकरुणार्द्रितचेतसः ॥
४९ ॥ दिव्यदेहान्समासाद्यज्ञानमापुर्यथापुनः ॥ नमस्कृत्यऋषीन्सर्वान्स्नानंचक्रुस्तदाज्ञ
या ॥ ५० ॥ विमलांमतिमास्थायतत्रैवनिवसन्द्विजाः ॥ तारितायत्रऋषिभिर्ब्राह्मणास्तीर्थ
मुत्तमं ॥ ५१ ॥ तारकाख्यंतदाचक्रुःसर्वपापैकशोधनं ॥ कृष्णावेण्यांसदावंद्यंसिद्धदेवर्षि
सेवितं ॥ ५२ ॥ ततोतीर्थमहाद्दिव्यंऋषितीर्थमनुत्तमं ॥ याज्ञवल्क्यादयःसर्वेस्नानंचक्रुस्त
पस्विनः ॥ ५३ ॥ ऋषितीर्थमितिख्यातंसर्वकामैकसाधनं ॥ ऋषितीर्थेनरःस्नात्वाब्रह्म-
त्वंप्राप्नुयाद्ध्रुवं ॥ ५४ ॥ ॥ इतिश्रीस्कंदपुराणेकृष्णामाहात्म्येएकोनषष्ठितमो
ऽध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रीगणेशायनमः॥ ॥स्कंदउवाच॥पुरःपुरस्तदाकृष्णापावनीजनरंजनी॥सागरं
द्रष्टुमन्वेष्टुमाययौसात्वरान्विता॥१॥सागरोपितदादृष्ट्वाकृष्णांसर्वाघहारिणीं॥तत्र
चोत्प्लुत्यवरुणः समुद्राच्चसमुत्थितः॥२॥वारुणाख्यंमहातीर्थंसर्वतीर्थाधिपंतथा
॥मानयन्सनदीमाद्यामभ्यनंदत्श्रियायुतः॥३॥तत्रनारायणोदेवःशंखचक्रगदाधरःआ
विर्बभूवभगवान्जलात्सपुरुषोत्तमः॥४॥महेश्वरश्चस्वगणैःसुरैःसर्वैःपितामहः॥द्र
ष्टुंकृष्णाब्धिसंयोगंत्रऋषयश्चसमाययुः॥५॥अथसर्वेषुशृण्वत्सुकृष्णास्नेहाज्जगद्गुरुः
॥सादरंसागरंवाक्यमित्याहसजनार्दनः॥६॥इयंसुधामयीदेवीनिर्मितावैपुरामया॥जग
द्धितार्थमायातामाननीयात्वयांबुधे॥७॥नारदउवाच॥प्रसादइत्येवंवदन्तंवैविष्णुंनदी
पतिः॥जगृहेकृष्णावेणीतांसर्वैस्तैरभिनंदितः॥८॥ततोजयजयेत्युच्चैःसुरेषुसपरमर्षि
षु॥नदत्सुदेवतूर्येषुकृष्णावेणींसमाश्लिषत्॥९॥प्रवृत्तिरूपाकृष्णासासुखेनैकेनचां
बुधिं॥निवृत्तिवदनादेवीजाताभीमास्वयंपृथक्॥१०॥कृष्णांतुगर्वितांदृष्ट्वासमाधारेण
गच्छसि॥इतितस्यावचःश्रुत्वापृथक्भीमाव्यवस्थिता॥तन्मुखाख्यान्चवैवेणासर्वसं
कल्पनाशिनी॥कृष्णावेणीचपापघ्नीत्रैलोक्येसुंदरीद्विजाः॥१२॥द्विधासुखीकृष्णावेणी
ह्यालिलिंगांबुधिंतदा॥पुष्पाणिववृषुःसिद्धाजगुर्गंधर्वकिंनराः॥१३॥ननृतुश्चाप्सरः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संघा गंगासागरसंगमे॥अद्यापिशिवमुख्यास्तेसर्वेदेवाः सहर्षिभिः॥१४॥तत्रसन्निहि-
तादेवाः कृष्णायाः प्रियकाम्यया॥वरांश्चप्रददुः सर्वेसर्वतीर्थाभिवंदिते॥१५॥तीर्थेज-
न्मत्रयाघघ्नेहरेः स्मरणमात्रतः पश्चात्तुवारुणंतीर्थंवरुणोयत्रसंगतः॥१६॥ततः संगम
मत्यर्थंसर्वतीर्थोत्तमोत्तमं॥कृष्णाब्धिसंगमेस्नानंकोटिजन्माघनाशनं॥१७॥विष्णु
सायुज्यदंपश्चात्स्कंदआहजपन्शिवं॥मयासंक्षेपतोविप्राःप्राधान्येनोदितानित्व॥१८
सह्यात्प्रभृतितीर्थानियावत्सागरसंगमः॥अत्रतीर्थान्यसंख्यानिवक्तुंनगुरुरप्यलं॥१९
साकल्येनत्वमाहात्म्यमनंतंकोनुसंवदेत्॥एतान्यहरहर्विप्राः संस्मृतान्यपिभक्तितः॥२०
॥तत्रस्नानफलंद्युस्ततोक्तानिमयाऽधुना॥कृष्णासर्वाघसंघघ्नीसर्वपुण्यरसाधिका॥
२१॥जलमूर्तिर्जगन्मूर्तिस्तीर्थभेदेद्विधापिहि॥नैषाक्षेत्रबलात्तीर्थंनैषादैवतसंन्निधेः॥२२
॥नैषातीर्थबलात्तीर्थंपुण्यासर्वैवसर्वदा॥आदौमध्येतथाचांतेस्पृष्टाज्वालातृणंदहेत्॥
२३॥एवंसर्वत्रसततंकृष्णाहंत्यघसंचयं॥यथागुडमयः पिंडः सर्वत्रमधुरः किल॥२४॥
एवंविष्णुमयीकृष्णासर्वत्रसकलेष्टदा॥कृष्णावेण्योभयतटंयोजनांतरसंस्थितं॥२५॥क्षे-
त्रंविमुक्तिदंप्राहुरंतरासह्यसागरं॥मासंत्वहरहः स्नात्वात्रिपराकफलंलभेत्॥२६॥मा
घेमासितुयः स्नायाद्भक्त्याप्रागुदयाद्रवेः॥द्विपराकफलंतस्यस्यात्तथैवचकार्तिके॥२७॥ १

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संवत्सरंतुयः स्नायात्सर्वदानियतेंद्रियः॥ सर्वान्कामानिह प्राप्यमृतेमुक्तिमवाप्नुयात्॥-
२८॥ पुष्येवाजन्मनक्षत्रेव्यतीपातेच वैधृतौ॥ अमायां वै, यःकृष्णायांस्नानदानाद्यनंतकं
॥२९॥ सौभाग्यदांशांतिकरींसर्वोपद्रवनाशिनीं॥ जगद्धितार्थमायातांशरण्यांशरणंव्रजे
त्॥३०॥ लब्ध्वापि भारते जन्म कृष्णावेणींतुयेनराः॥ नमज्जंतिनपश्यंतिशोच्या
स्तेवलपापिनः॥३१॥ पराशरोपिभगवान्नदीनांमातरंवदन्॥ सह्यपादप्रसूतानांसर्वाधि-
क्यंजगाविति॥३२॥ त्रिभिःसारस्वतंतोयंसप्ताहेनतुयामुनं॥ सद्यःपुनातिगांगेयंदर्शना
देवनार्मदं॥३३॥ गोदावरीभीमरथीकृष्णावेणोत्तमोत्तमा॥ ख्यातिंतस्याःपुराविष्णुर्माय
यासमावृणोत्॥३४॥ सर्वैरभ्यर्थितस्तीर्थैर्ब्रम्हादेवमथाब्रवीत्॥ ब्रम्होवाच॥ अव्रतान्ह्य
नधीयानाह्ययज्वानश्चमाधव॥३५॥ कृष्णायाःस्नानमात्रेणयास्यंतिपरमांगतिं॥ नारदउ
वाच॥ इत्यर्थितोजगत्स्थित्यैतस्मान्माहात्म्यमावृणोत्॥३६॥ पुनर्जनानांकारुण्याद्द्वापरेद्वाद
शकेहरिः॥ प्रकाशमकरोत्सम्यक्प्रादुर्भूतेकलौ गतेहरिः॥३७॥ तदासर्वाणितीर्थानिकृष्णाया
मागतानिवै॥ अघनाशनसामर्थ्यंप्राप्नुवंतिपुनःपुनः॥३८॥ तदामोहस्यापगमात्सर्वेश्रद्धा
समन्विताः॥ येमज्जंतिजनाःकृष्णांकृतार्थाश्चभवंतिते॥३९॥ अन्यथायदिमन्यंतेतदा-
सामर्थ्यदर्शनात्॥ नरकंयांतिमोहात्तेमाहात्म्यंहिसदाममः॥४०॥ महापातकजान्दोषान्न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

शयित्वाचमोक्षदा ॥ स्नानमात्रेणतेनेयंकृष्णावेणीमहानदी ॥ ४१ ॥ तस्मादाजन्ममरणात्
कृष्णायामेवसंवसेत् ॥ तस्याःकृतदर्शनात्स्पर्शात्स्नानादपिविमुच्यते ॥ ४२ ॥ नियतेनैव
वक्तव्यंचिरस्तेनचधीमता ॥ पुण्यवृद्धिरिहात्यर्थंपापहानिःपदेपदे ॥ ४३ ॥ अशक्तत्वादि
नोपेतोदेवींनित्यंक्षमापयेत् ॥ सायंप्रातःशुचिर्नद्यांनैवपापमवाप्नुयात् ॥ ४४ ॥ अज्ञानाद्य
दिवाज्ञानाद्यन्मयादुष्कृतंकृतं ॥ तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते ॥ ४५ ॥ स्नान
कालेतुसततंदेवींसंप्रार्थयेदिति ॥ सह्यपादोद्भवेदेविश्रीशैलोत्संगगामिनी ॥ ४६ ॥ कृष्णवे
णेतिविख्यातेसर्वपापप्रणाशिनि ॥ सर्वपापविशुद्ध्यर्थंस्नास्येदेवित्वांभसि ॥ ४७ ॥ प्रसीदमे
देविसदाऽमरेज्येपूर्वंतुसृष्टाजगतांविमुक्तये ॥ स्नानेनयस्यामवधूतपापःप्राप्नोतिविष्णोःप
दमेवमर्त्यः ॥ ४८ ॥ ब्रम्हामृतानंदरसेनपूर्णांजलेनपूर्णामितिमेनिरेजनाः ॥ तांत्वावगाहामि-
पिबामिकृष्णांदेवान्नृषींस्तर्प्पयिष्येपितृंश्च ॥ ४९ ॥ दृष्ट्वाजन्मशतंपापंस्पृष्ट्वाजन्मशतत्रयं
॥ स्नात्वाजन्मसहस्राणिहंतिकृष्णाकलौयुगे ॥ ५० ॥ एवंतुनिवसन्मर्त्योधन्यःपुण्यःसवैद्विजः
॥ निपातःकृष्णवेणायांब्रम्हभूयायकल्पते ॥ ५१ ॥ तत्रस्थंतीर्थमालोक्यपूजनंप्रणतिंतथा ॥
कृत्वाययौमुनिर्यत्रगुहस्तत्रसमादरात् ॥ ५२ ॥ गुहःसत्कृत्यचमुनिंपप्रच्छागमकारणं ॥ सं-
सारेहिमहान्लाभोवैराग्यंपरमुच्यते ॥ ५३ ॥ परोपकारदक्षोसीत्युक्त्वाचांतर्दधेगुहः ॥ महा-

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यश्रवणात्त्वामिन्परांसिद्धिमवाप्स्यसि ॥ ५४ ॥ इदमेवहिमांगल्यमिदमेवधनार्जनं ॥ जी
वितस्यफलंचैतत्श्रवणंसर्वसिद्धिदं ॥ ५५ ॥ नाधोक्षजात्परोधर्मोनार्थश्चाधोक्षजात्परः ॥
नकामः केशवादन्योनापवर्गोहरिंविना ॥ ५६ ॥ इत्यादिमाहात्म्यमनंतशक्तिर्द्विजान्गुहोप्या
हसर्वेभ्यऋषिभ्यः ॥ मयाभवद्भ्यः कथितंमुनींद्रास्तथाभवंतोपिवदंतुसद्भ्यः ॥ ५७ ॥ आख्या-
नमेतत्परमंपवित्रंयःश्रावयेद्भक्तियुतोद्विजेभ्यः ॥ ससर्वपापानिविधूयविष्णोःप्राप्नोतिस
त्यंपदमेवभास्वत् ॥ ५८ ॥ पुत्रार्थीलभतेपुत्रंधनार्थीधनमाप्नुयात् ॥ विद्यार्थीलभतेविद्यां
जयार्थीलभतेजयं ॥ ५९ ॥ ज्ञानार्थीलभतेज्ञानंमोक्षार्थीमोक्षमाप्नुयात् ॥ यइदंपठतेनित्यंशृ-
णोतिश्रावयेदपि ॥ ६० ॥ सर्वान्कामानवाप्नोतिविष्णोःपदमवाप्नुयात् ॥ ६१ ॥ ॥ इतिश्री
स्कंदपुराणेकृष्णामाहात्म्येस्कंदनारदसंवादेउभयतोमुखीकृष्णासमुद्रप्रवेशोनामषष्टि
तमोऽध्यायः ॥ ॥ शुभंभवतु ॥ ॥ यथामत्यनुसारेणसावधानतयापुनः ॥ कृष्णा
माहात्म्यमेतत्तुशोधितंमेतथापिच ॥ १ ॥ दृष्टिभ्रमात्प्रमादाद्वास्वरव्यंजनमात्रकाः ॥ न्यूना
धिकाभवेयुश्चेत्क्षाम्यंतुसुधियोमयि ॥ २ ॥ ॥ ❀ ॥ ॥ ❀ ॥

हें पुस्तक वे· शा· सं· गंगाधरशास्त्री अभ्यंकर यांचे साह्यानें शुद्ध करून श्रीक्षेत्र वांई येथें सखाराम विठ्ठल नाफड
कर यांनीं आपले विराजवैभव छापखान्यांत छापिलें शके १८०७ कार्तिक शुद्ध १२. किंमत १॥· रु·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ इतिश्रीकृष्णामाहात्म्यं समाप्तं ॥

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi